अथ स्मृतिसार–समुच्चये नित्यकांडः प्रारंभः

नित्यकांडस्य विषयानुक्रमः

स्वस्ति देवसेनापतिंनौमिस्कंदंपरमधार्मिकं ॥ तारकारिंजगद्वंद्यंजगदीप्सितदायकं ॥१॥ कांडेनैमित्तिकेपूर्वस्मृतिसारसमुच्चये ॥ वेदोदितक्रियांकर्तुंका
लभेदोनिरूपितः ॥२॥ अधुनाव्रतचर्यादेस्तद्वार्हस्व्यस्यकर्मणः ॥ स्वरूपतोविनिर्देष्टुंव्यवहारोनिरूप्यते ॥३॥ तथाहिपूर्वमत्रस्मृतिसारसमुच्चयेनैमित्तिक
व्यवहारेणतदाश्रयतयाकालभेदोनिरूपितःतथाविधस्यकालभेदस्यकर्मणोन्यनविद्यतइति न्यायमनुस्मृत्यानित्यत्वेनविहितानांकर्मणांव्यवस्थितिदृष्टाविधयाप्रव-
र्तनीयातेनचगर्भाधानादिकर्मणांतन्मध्येप्रत्यवायदर्शनेनतदुक्तप्रायश्चित्तविधिरपिव्यवहारमुखेज्ञायतेतन्मध्येसूतकप्रवृत्तौनिर्णयोबोध्यः नानाविधाशांतयोपि
ग्रहस्थाश्रमतयाविविच्यंते तेनचविधिनादायादिविभागादेःस्वरूपतोव्यवस्थितिः यद्यपिपूर्वोत्तरकांडयोः कानिचित्पर्यवसितानितथापिसतिधर्मिणिधर्माश्चिं
त्यतइति न्यायमनुसृत्यधर्म्युपदेशपूर्वंधर्माणांव्यवस्थितिः क्रियाभेदेतेनचप्रत्यवायेपितत्रतत्रव्यवहारोविशिष्टतरः अग्न्याधानादानांव्रतलोपप्रायश्चित्तंविधि
हितमेवप्रवर्ततेपैतृकादीनांवर्णभेदेनव्यवस्थापनमाचरोविधयाग्रामजनपदादिभेदेनानिर्देष्टव्यं तत्रप्रायश्चित्तादिकंस्मृतिसारसमुच्चयतयामंत्रपूर्वंनिर्देष्टव्यं का
लोचितक्रियायाकालभेदोपिवाच्यः नचैवंपूर्वोत्तरकांडयोस्तत्ताद्विधिदृष्टतयापौनर्युक्त्यादोषशंकनीयः तत्कालेतत्स्मरणमितिन्यायेनवक्तुमुचितत्वात् येके-
चिदाहुः प्रकरणसांकर्यापत्तिरितितथाप्येतन्यसोढव्यमितिव्युत्पन्नांव्यवहारोपयुक्ततयावक्तुमेवशास्यंबोध्यं अन्यथाग्रंथभगरूपतयाततोवैलक्षणापत्तेः
तथाहिकात्यायनः पुनरुक्तिर्द्विरुक्तिर्वासदुक्तिर्वायथाक्रमात् ॥ वक्तव्यशास्त्रदृष्टत्वादन्यथाग्रंथभंगतेति ॥४॥ तदेतादृशस्यवचनस्यमहद्भिरादरणीयतययु-
क्तत्वमेवगम्यते किंचएतद्विषयेपैठीनसिरप्याह बहूनांव्यवहाराणांतत्तत्कालव्यवस्थितौ ॥ तत्तत्क्रियाचर्यभेदेविशेषोनाविदूषणामिति ॥५॥ इदमेवाधिकृत्य
हेमाद्रौप्रस्तावआकृतोतिदिक द्विजन्मत्वासिद्ध्येयस्मादुपनयनंकार्यमिति सर्वेजनितव्यवहारःअतएवाष्टवर्षंब्राह्मणमुपनयीतनमध्यापयीतिइरूयते तथापंचमे
वर्षेब्रह्मवर्चसकामइति तदेतद्वचनद्वयंत्रैवर्णिकसाधारणमुक्तब्राह्मणेविशेषविधिरितिचिंत्यते गोभिलः गर्भाष्टमेष्टमेवाब्देब्राह्मणस्योपनायनं ॥ पंचमेवत्सरेबो
ध्यंब्रह्मवर्चसलिप्सुभिरिति ॥६॥ कात्यायनोपि ब्राह्मणस्यप्रशस्तंस्यादष्टमेतूपनायनं ॥ पंचमेयत्कृतंपित्रापुत्रस्यायुर्विवर्द्धतइति ॥७॥ तदनेनवचनद्वयेनब्रा
ह्मणस्यैवेतिनिर्धार्यक्षत्रियवैश्ययोस्तूच्यते गार्ग्यः एकादशेक्षत्रियस्यवत्सरेतूपनायनं ॥ धनुर्वेदाधिकारस्यादतएवविनिश्चयइति ॥८॥ वशिष्ठः द्वादशा
दशेवैश्यउपनायनमर्हति ॥ कृषिवाणिज्यगोरक्षावेदाध्ययनसिद्धयइति ॥८॥ ननुब्राह्मणादीनामुपनयनकालोयंसंगृहीतः तत्कालस्यकदाचिदुपघातसमाद्य-

तिरेकः संभवातितार्हिवर्णधर्मोविनष्टइतिचेन्न तेषामबाधित्वप्रतिपादनात् अतएवोक्तमाश्वलायनेनसूत्रकृता अष्टमेवर्षेब्राह्मणमुपनयनेगर्भाष्टमेवैकादशेक्षत्रियं
द्वादशेवैश्यामितितदुत्तरंचोक्तं आषोडशाद्ब्राह्मणस्यानतीतःकालआद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्येति तदेतेनसूत्रकृद्धचनेनतदवधौनिर्णीतायांप्रागुक्त
विधियुक्तमुत्पश्यामः ननूपनयनशब्दःयोगोवारूढोवा योगत्वेउपसमीपेनयनमितिगायत्र्युपदेशताप्रतीयते नाद्वितीयःरूढत्वेकार्यानुनयस्यतत्प्रतीत्यायज्ञोप
वितधारणस्यतदसंगतोरितिचेन्न पैठीनसिवचनेनशब्दार्थनिर्धारणात्तथाहिपैठीनसिः चतुर्भिर्ब्राह्मणैर्धृत्वाप्याभिमंत्र्योपवीतकं ॥ पित्राद्त्तेततःकंठेधार्यंस-
व्येनानिश्चयइति ॥१०॥ तदुत्तरमपितेनैवोक्तं यज्ञोपवीतग्रहणमुपनायनमीर्यते ॥ तेनैवसर्वमंत्राणामाधिकारःप्रयुज्यतइति ॥११॥ एवंव्यवहारेव्यवस्थितेत-
दुपवीतमुपविश्यधार्यमुपतिष्ठतेतिविचिकित्सायांशाट्यायानिराह तिलकंब्रह्मसूत्रंचपाद्यमाचमनीयकं ॥ तिष्ठन्नेवयदाकुर्यात्सद्यःशूद्रोभवेद्द्विजइति ॥१२॥
गालवोपि यज्ञोपवीतग्रहणमभिमंत्र्यप्रदापितं ॥ उपविश्यैवतद्धार्यंशास्त्रमेवविनिश्चयइति ॥१३॥ अत्रत्याविशेषविधिनिर्णयामृतेस्थितइत्युपरम्यते यदासि
न्नुपनयनप्रकरणेयज्ञोपवीतंगायत्र्याभिमंत्रितंपित्राद्त्तंग्राह्यमितिवस्तुगतिः यदाहमरीचिः पित्राद्त्तंपरिग्राह्यंगायत्र्याभिमंत्रितं ॥ यज्ञोपवीतमेतद्धिब्राह्मण-
त्वप्रसिद्धिकृदिति ॥१४॥ अत्रहिब्राह्मणत्वप्रसिद्धिकृदित्युक्त्यायज्ञोपवीतस्यैवप्राधान्यंप्रतीयतेतदेतस्य यज्ञोपवीतस्यधारणेकोयंमंत्रइत्यपेक्षायांगालवआह
यज्ञोपवीतंपरमंपवित्रमितिमंत्रतः ॥ पित्राद्त्तंपरिग्राह्यंब्राह्मणत्वंप्रसिद्धतीति ॥ १५ ॥ एतेनब्राह्मणत्वंप्रसिद्धतीत्युक्त्यामंत्रामंत्राधिकारंप्रतीयते तेनचास्य
मंत्रस्यऋग्यजुः सामभ्यातिरिक्ततयासर्ववेदसाधारण्येनाथर्वणमंत्रत्वात् वेदत्रयाधिकारिणांत्रैवर्णिकानामपिसमानत्वमेवनिश्चेयंनसार्थवयमितिविवेकः
एतदाहपैठीनसिः त्रैवर्णिकानांगदितंवेदत्रयवतामपि ॥ सामानाधिकरण्येनधारणेमंत्रईर्यतइति ॥१६॥ तथाचवेदत्रयाधिकारेत्रैवर्णिकव्यवहारोपधारणाम-
त्रः एकएवेतिप्रतीयतेएतद्यज्ञोपवीतरूपेणाद्विजत्वसिद्धिः पूर्वाण्हएवसर्वत्रप्रतीयते यदाहलौगाक्षिः उपनायनएतद्धिधार्यंयज्ञोपवीतकं ॥ पूर्वाण्हएवसर्व
त्राद्विजन्मत्वंप्रतीयतइति ॥१६॥ तेनचोपनयनाद्द्वितीयंजन्मेतिप्रतीयते एतदाहवात्स्यायनः जन्मनाजायतेशूद्रःकर्मणाजायतेद्विजः ॥ वेदाभ्यासीतयोविप्रः
ब्रह्मज्ञोब्राह्मणस्मृतइति ॥१७॥ तथाह्यत्रब्रह्मज्ञइतिशब्देनतपोवेदाधिकारित्वमनेनभवतातिबोध्यं ब्रह्मतत्त्वंतपोवेदइतिकोशप्रतीतेःननुयज्ञोपवीतधारणंसूर्य
साक्षिकमुतचंद्रसाक्षिकमथवान्हिसाक्षिकमितिसंशयः तथात्वेबादरायणआह ऋक्सप्रदायविप्राणांवन्हिसाक्षिकमेवतु ॥ दतोयाजुषिकाणांतुसूर्यसाक्षित्व

मेवतादीति ॥१९॥ तच्छब्देनात्रोपनयनंलक्ष्यते विश्वावसुः ऋग्यजुःसामविदुषांक्षात्रियाणांयथाविधि ॥ सूर्यचंद्राग्नयस्तत्रसाक्षिणःपरिकीर्तिताइति ॥ २० ॥ तस्मादेभिर्वचनैस्तत्तद्वेदाधिकारिभिः तत्तत्साक्षितयायज्ञोपवीतधारणं युक्तमुत्पश्यामः ननुचंद्रसाक्षिणंचंद्रदर्शनाभावेकथमेतदुपयुज्यतइतिचेन्न दिवाचंद्रदर्शनाभावेपिशास्त्रदृष्ट्यातात्सिद्धेः यदाहकात्यायनः शास्त्रदृष्ट्याविनिश्चित्यचंद्रोदयमिमेयतः ॥ यज्ञोपवितबिभृयुःसोमवंश्याइतीरिता ॥ २१ ॥ तदेतेनउपनयनेसाक्षित्वंव्यवस्थापितमितिदिक्त्रयाणांसाक्षिणामपितदुपनयनेकृतहोमस्यवह्नेः आत्रिदिनंप्रत्यक्षत्वंव्यवस्थाप्यनदीतीरेतीर्थतटाकेवाव्रतांगत्वेनावभृतंविदध्युरितिवस्तुगतिः लोमशः व्रतमुद्दिश्योपनयनेत्रिदिनंवह्निरक्षणं ॥ चतुर्थदिवसेस्नात्वाताद्दिनेव्रतमुत्सृजोदिति ॥ २२ ॥ तत्राहियद्यपिरक्षणंकृतंतथापितस्यवह्नेःप्रत्यवायोमहानस्तीतिविशेयं बिह्वच्छः उपनीतस्यचबटोर्वह्नेर्मध्येचजुह्वतो ॥ मार्जारादिप्रवेशश्चेत्कथंहोमस्यासिद्धिता ॥ २३ ॥ प्रजापतेनत्वदेतामितिमंत्रेणतत्राहि ॥ प्रायश्चित्तंविधायाग्नौहोमंकुर्यात्प्रयत्नतइति ॥ २४ ॥ तथाचहोमंकुर्यात्प्रयत्नतइत्युक्त्याप्रायश्चित्तंनिर्दिष्टं तदनेनव्यवहारेणएकस्मिन्नेववह्नौवन्ह्यंतरेवेतिविधिसंशयःप्रसक्तः तथात्वेवासिष्ठआह तस्मिन्नेवतुवह्नौस्यात्प्रायश्चित्तंयथाविधि ॥ मार्जारादिप्रवेशेतुवह्निमध्येयथातथामिति ॥ २५ ॥ नन्वेवंसंकृतवह्नेर्होमांतरविधानेनभ्रष्टतास्यादितिशंकनीयं तदंगत्वेनबाधकाभावात् अतएवप्रयाजादीनांदर्शपूर्णमासांगतयाव्यवहारोलक्ष्यते एवंतत्प्रायश्चित्तेविनिर्णीतेतत्पूर्तिसिद्ध्येसाज्यतिलंदद्युरितिशिष्टाः एतदुक्तंहेमाद्रौ साज्यंतिलंप्रदद्युर्वैसुवर्णंनयथातथं प्रायश्चित्तंसमुद्दिश्यमार्जारादिप्रवेशतइति ॥ २६ ॥ बौधायनसूत्रकारोप्याह उपनीतबटुवह्निर्मध्येमार्जारादिप्रवेशेतस्मिन्नेववह्नौप्रजापतेनत्वदेतामितिहुत्वासाज्यतिलंससुवर्णंदद्युरिति आश्वलायनोप्याह उपघातस्यदोषस्यमार्जारादिप्रवेशने ॥ आज्यंचसतिलंदद्युः परिहारोभवेत्तत्तइति ॥ २७ ॥ विस्तरस्तुतत्तच्छाखिनांतत्तत्प्रयोगेषुव्यवतिष्ठतइतयदेतदल्पमुक्तं त्रिदिनमुद्दिश्यचतुर्दिनावध्यवभृथांतंबटोर्यज्ञोपवीतनाशेकिंतत्रविधानमितिचिंत्यते गालवः यज्ञोपवीतनाशश्चेदुपनीतस्यतद्बटोः ॥ यदात्ववभृथांतंचप्रायश्चित्तंकथंभवेत् ॥ २८ ॥ वन्ह्यंतरंसमुज्वाल्यब्रह्मजज्ञानमंत्रतः ॥ समिध्वर्वादिकंहुत्वाधारयेदुपवीतकमिति ॥ २९ ॥ शौनकः तीर्थस्नानात्पूर्वमेवयज्ञसूत्रंविनश्यति ब्रह्मजज्ञानतोहुत्वाधारयेदुपनीतकमिति ॥ ३० ॥ अत्रह्यवभृथमध्येयज्ञोपवीतनाशेव्रतवह्नौवन्ह्यंतरेवेतिसंशयेवन्ह्यंतरएवप्रायश्चित्तमुचितमिति वृद्धगार्ग्यः मार्जारादिप्रवेशस्यतद्होसंस्कृतिर्भवेत् ॥ यज्ञोपवीतनाशेतुवन्ह्यंतरविधानतेति ॥ ३१ ॥ मांडव्योपि वन्ह्यंतरेतुजुहु

याप्रायश्चित्ताहुतिंबुधः ॥ उपवीतस्यनाशेतुकुर्यादेवाविनिश्चयइति ॥ ३२ ॥ ननुमार्जारादिप्रवेशस्ययज्ञसूत्रनाशस्यचकिंविनिगमकमितिचेन्न विशेषविधिसंभवात् उपजीव्योपजीवकभावसंगत्याप्रधानत्वाच्च नहिमूलनाशेतरुःप्ररोहतीतिव्यवहारोप्यत्रसंगच्छते अतएवास्यहोमस्यआधानावाधिविहिततयाक्वेवप्रायश्चित्तं यज्ञोपवीतंवटोर्दत्वाशेषमाग्निकार्यंकुर्यादितिविवेकः एतदाहपैठीनसिः मूलंयज्ञोपवीतंस्यात्होमश्चैवोपसर्जनं ॥ तस्मात्प्राधानंकृत्वैववह्निकार्यंसमाचरेदिति ॥ ३३ ॥ शाट्यायनोऽपि वह्निकार्यंसमुद्दिश्यप्रत्यूहेसमुपस्थिते ॥ धृत्वायज्ञोपवीतंनुवह्निकार्यंसमाचरेदिति ॥ ३४ ॥ तथाचाग्निकार्यविधौयज्ञोपवीतमूलकत्वमेवयुक्तमुत्पश्यामः ननुहोमसमयेयज्ञोपवीतनाशःतर्हिकथंव्यवहर्तव्यमितिचेन्न तस्यलघुकार्यतयातदानीमेवतदुपस्थानात् यदाहविष्णुवृद्धःहोममध्येस्थितबटोर्नश्येच्चेदुपवीतकं ॥ हुत्वाज्याहुतिमंत्रैवपुनःसंधानमर्हतीति ॥ ३५ ॥ तदनेनवचनेनप्रायश्चित्तेसाधितेबटोर्दीर्घायुष्यसिद्धयेगोदानंदातव्यमित्याहशातातपः उपनीतबटोर्दैवादुपवीतंविनश्यति ॥ तत्कालेचैवगोदानंदेवमायुर्विवृध्धयइति ॥ ३६ ॥ अन्यत्सर्वंप्रयोगमुखेस्थितमितिदिक् यदत्रसावधानतयोपनीतौउपवीतनाशप्रायश्चित्तमुक्तं मौंजीदंडकृष्णाजिननाशेछेददाहेचकिमिदंप्रायश्चित्तमितिचिकित्सायांनिर्णयोव्याख्यायते हारीतःमौंजीदंडश्चाजिनंचाप्युपनीतौविनश्यति ॥ छेददाहेकिमत्रास्तिप्रायश्चित्तंविधीयतां ॥ ३७ ॥ त्रयाणामथसाधर्म्यात्प्रायश्चित्तमिदंमतं ॥ शंनोधातेतिमंत्रेणसमिदाज्यचरून्हुनेदिति ॥३८॥ लोगाक्षिःमौंजीदंडादिनाशेतुशंनोधातेतिमंत्रतः ॥ वन्ह्यंतरेप्रहोतव्यंप्रायश्चित्तमिदंमतमिति ॥३९॥ अत्राहि प्रायश्चित्तमिदंमतमित्युक्त्यासर्वमतसाधारणंप्रतीयते वन्ह्यंतरेप्रहोतव्यमितिवचनेनशांतिहोमतयाहोमांतरंविज्ञेयमित्यर्थः एतदाहकश्यपः होमांतरंतुविज्ञेयंमौंडीदंडादिनाशने॥ शांतिहोमोयमुदितबटोरायुष्यवृद्धयइति ॥ ४० ॥ यद्यपिसंस्कृतवह्नौतदुद्दिश्यैदंप्रायश्चित्तंप्रवृत्तंतथापितस्याविधेरनंगीकारात् यदाहगालवः विशेषविधिमुद्दिश्यविशेषहोममाचरेत् ॥ पूर्वसंस्कृतवह्नौतुकृतंचेन्निष्फलंभवेदिति ॥ ४१ ॥ तदेतद्वचनेनप्रत्यवायश्रवणात् वन्ह्यंतरंप्रतीतमेवेतियुक्तमुत्पश्यामः ननुत्रयाणांप्रायश्चित्तमेकविधयाप्रतिपादितंपार्थक्येननाशेतुयुक्तमेव सकृन्नाशेकथमितिचेत्ब्रूमः वृद्धवशिष्ठः मेखलादिसकृन्नाशेप्रायश्चित्तंकथंभवेत् ॥ एकस्मिन्नेवयजनेत्रिवारंतत्समाचरेदिति॥४२॥तथाहि त्रयाणांकृतसंकल्पानामेकस्मिन्नेववह्नौतदुद्देश्यतयापृथगेवप्रायश्चित्तकरणात् नकापिक्षतिरितियुक्तमुत्पश्यामः वृद्धयाज्ञवल्क्यः एकस्मिन्नेववह्नौस्यात्प्रायश्चित्तत्रयंयदि ॥ संकल्पपूर्वंहोतव्यंनदोषस्तत्रविद्यतइति ॥ ४३ ॥ मांडव्योपि सकृदेवचतद्

त्रप्राश्चित्तत्रयंयादि ॥ क्रमेणतत्तद्धोतव्यंविधिसकल्पपूर्वकमिति ॥४४॥ तथाचतदेताभ्यांवचनाभ्यांप्रायश्चित्तस्वरूपेनिर्णीतेपुनर्वह्निकार्यंसंस्कृतवह्नौकुर्यादिति
विवेकः ननुवह्निकार्यानंतरंयदिनाशस्तर्हिकथमितिचेत्ब्रूमः शाट्यायनिः तस्मिन्नेवदिनेकृत्वाप्रायश्चित्ताहुतिंबुधः ॥ परेद्युर्वह्निकार्यंचकुर्यादेवनसंशयइति
॥ ४५ ॥ विस्तरस्तुदिनकरग्रंथेस्थितइतिसावधानांविवेचनीयं यदत्रपूर्वंदंडादिनाशप्रायश्चित्तमुपनीतावुदाहृतं सर्वस्यापिवह्नेःप्रधानतयातन्नाशेकथमिति
चिंत्यते भगवतासूत्रकारेणोक्तमग्निनाशेपुनरुपनयनंविनासूत्रग्रहणेनेतितेनचात्रसूत्रग्रहणमात्रंद्विजन्मत्वलक्षणंविहायदंडादीनांपुनरन्यस्वीकारोवसीयतइतिचे
न्न वन्हिहोममात्रस्याविवक्षितत्वात्यदाहलोगाक्षिः उपनीतोवन्हिनाशेवन्हिंसंस्कृत्यपूर्ववत् ॥ उपनीतप्रकारेणहोमंसर्वंप्रकारयेदिति ॥ ४६ ॥ होमंसर्वं
प्रकारयेदित्युक्त्याअग्निजननादिकंविवक्षितं यदाहात्रिः कृत्वाग्निजननंतत्रविधिपूर्ववदाचरेत् ॥ उपनीतौवन्हिनाशेसूत्रंपूर्वंविशिष्यतइति ॥ ४७ ॥ स्मृति
रत्नाकरे कृतोपनीतौयदिचाग्निनाशः पुनस्तदासूत्रविहीतकर्म ॥ यथावदाचार्यमुखेनकार्यं नचेदिदंबंधुविनाशहेतुरिति ॥ ४८ ॥ तत्रप्रायेशेषोभट्टभास्करी
ये आयंतामितिमंत्रेणवन्हौसंसकृत्यहोमयेत् ॥ उपनीतौवान्हिनाशेप्राराश्चित्तंयथाविधीति ॥ ४९ ॥ गालवोपि वन्हेर्विनाशोभवतिस्नानात्पूर्वमुपाकृतौ ॥ आय
तामनुरेवात्रप्रायश्चित्तोविधीयतइति ॥ ५० ॥ स्नानात्तीर्थस्नानादित्यर्थः उपाकृताउपनयनइत्यर्थः नन्वस्यप्रायाश्चित्तस्यगुरुतरत्वेनकिमत्रदानंविवक्षित
मित्याशंकायांगौतमआह वान्हिनाशेसत्युपाकृतौआयंतामितिसामिदादीन्हुत्वागोदानंदद्युरिति आश्वलायनोपि वान्हिनाशप्रयुक्ततयागोदानमुपाकृतौविशेष
विधिरिति गोभिलः वान्हिनाशोयदाजातउपनीतौतदैवहि ॥ गोदानंसाधुकृत्वैवप्रायाश्चित्तांविशुध्यतीति ॥ ५१ ॥ तदनेनवचवेनप्रायाश्चित्तमात्रस्यवान्हि
नाशेकर्मलोपसंभवइतिनीयते नतावन्मात्रंबंधुविनाशहेतुरितिस्मृतिरत्नाकरोक्तेः यदाहगार्ग्यः विध्युदीरितमाचार्यःकर्मकुर्वन्यशोलभेत् ॥ अन्यथाप्रत्यवाये
नस्वयंनश्यत्यसंशयइति ॥ ५२ ॥ यदुक्तंरत्नेन प्रायश्चित्तमात्रंयुक्ततरमिति ॥ वान्हिनाशेप्रकुर्वीतप्रायाश्चित्तंयथाविधि ॥ ५३ ॥ उपनीतौबटोरेवतदायु
ष्याभिवृद्ध्यइति ॥ ५४ ॥ तन्नाकात्यायनवचनेननिरस्तत्वात् उपनीतौवान्हिनाशेबंधुनाशोभतेध्रुवं ॥ गोदानंतेनकर्तव्यंप्रायाश्चित्तांगमीर्यतइति ॥ ५५ ॥
केचिदाहुर्मेखलाजिनदंडान्जलेप्रक्षिप्यवस्त्रमाचार्यायदद्यादिति पैठीनसिः बटुनाविधृतंवस्त्रमाचार्यायप्रदापयेत् ॥ नववस्त्रंप्रकर्तव्यंदंडादीन्प्रक्षिपेज्जलइति
॥ ५६ ॥ एतत्क्षत्रियविषयं यदाहवृद्धयाज्ञवल्क्यः वस्त्रधारणमन्यद्यत्क्षत्रियस्यविधीयते ब्राह्मणस्ययथाब्राह्मिसूत्रेणसहवर्ततइति ॥ ५७ ॥ विस्तरोहेमाद्रौ

॥ ६२ ॥ अत्राहितार्थविषयसप्तमीत्रयोदशीचतुर्थीनांकेचित्प्राह्यतामाहुः तान्नषेधानुपपन्नइतिचेन्न बोधायनापस्तंबानाबाधकाभावात् तदुक्तंगृह्यपरिशिष्टे
बोधायनापस्तंबाःप्रदोषवर्ज्यमुपनीतिंकुर्युःअन्येप्राह्मायणाश्वलायनानश्रद्दध्युरिति एतदाहपैठीनसिः ब्रह्मोदनानिषिद्धंस्यात्प्रदोषेशास्त्रसंमतं ॥ त्रयोदशींच-
तुर्थींचसप्तमींचपरित्यजोदिति ॥ ६३ ॥ तदेतेनवचनेनत्रयाणांतिथीनांप्रदोषप्राप्ततयाब्रह्मोदनंनिषिध्यते तद्विधानंरात्रैकार्यमितिप्राह्मायणाश्वलायनमतं एत-
दाहवृद्धमनुः प्राह्मायणैःप्रकर्तव्यंरात्रावेवाश्वलायनैः ॥ ब्रह्मोदनमतःसिद्धंप्रदोषायांविगर्हितइति ॥ ६४ ॥ ननुप्रतिदिनेप्रदोषकालस्यसत्वात्तदुल्लंघनमनु
चितमितिचेन्न सामान्यप्रदोषस्यशास्त्रकृद्भिरनंगीकारात् यदाहवृद्धयाज्ञवल्क्यः सामान्यतःप्रदोषःस्यात्ब्रह्मोदनमिदंयदि ॥ चतुर्थ्यामथसप्तम्यांत्रयोदश्यां
परित्यजेति ॥ ६५ ॥ विस्तरस्तुस्मृतिरत्नाकरेबोध्यः अधुनाब्रह्मचारिधर्मोविविच्यते लोगाक्षिः नित्यंत्रिषवणस्नानंत्रिपुंड्रस्यनुधारणं ॥ एकभुक्तंगुरुकुले
वासोधर्मस्सईर्यतइति ॥ ६६ ॥ ननुकस्यायंधर्मइतिनामेनप्रतिपन्नमितिचेत्ब्रूमः पैठीनसिः ब्रह्मचारीत्रिषवणंस्नात्वागुरुकुलेवसेत् ॥ एकभुक्तंप्रकुर्वीतगायत्री
जपतत्परइति ॥ ६७ ॥ ननुलोगाक्षिवचनेत्रिपुंड्रस्यतुधारणमित्युक्त्याविरोधःप्रतीयते उपनीतिसमयेगोपिचंदनदानस्यप्रतीते यदाहकात्यायनः उपनीते [२]
स्तुसमयेदातव्यंगोपिचंदनं ॥ ब्रह्मवर्चसकामेनयज्ञसूत्रंप्रदापयेदिति ॥ ६८ ॥ तन्वनेनदानमात्रंप्रतीतंधारणेकिंबाधकमितिचेन्न तत्रापिबाधकसद्भावात्
तथाहि वृद्धयाज्ञवल्क्यः गायत्रीजपसिध्यर्थंधार्यंस्याद्गोपिचंदनं ॥ नद्वनात्रोपनीतेनस्मार्तकर्मप्रसिद्ध्यइति ॥ ६९ ॥ तथासतिबाधकंनास्तीतियदुक्तंतद्बाध

कमेवइतिचेत्ब्रूमः वृद्धगार्ग्यः उपनीतबटुर्यावत्तीर्थस्नानंभविष्यति ॥ गोपिचंदनमेताद्धितावधार्यंनसंशयइति ॥ ७० ॥ ननुसार्वकालंगोपीचंदनमेवध्रीयतां
किमसंगतमितिचेन्न श्रुतिविरोधापत्तेः तथाहिश्रुतिःत्रिपुंडभस्मनाकरोतियोविद्वान्ब्रह्मचारीग्रहस्थोवानप्रस्थोयतिर्वासमहापातकोपपातकेभ्यः पूतोभवतीति
ननुधारणेप्राशस्त्यसंभवेप्रत्यवायोनश्रूयतइतिचेत्ब्रूमः सूतसंहितायां ऊर्ध्वपुंड्रंद्विजःकुर्याल्लीलयापिकदाचन ॥ तदाकारेणशास्त्रेणबाध्यतेयमकिंकरैरिति
॥ ७१ ॥ ननुगोपिमृत्स्नानातदूर्ध्वपुंड्रमितिनव्यक्तामितिचेन्न शाकटायनस्मृतौप्रतीतेः तथाहि गोपिमृत्स्नैवोर्ध्वपुंड्रंभस्मनैवात्रिपुंड्रकं ॥ अन्यथैतत्प्रकुर्वाणोनर
कंप्रतिपद्यतइति ॥ ७२ ॥ ततोत्रेयंव्यवस्था स्मार्तैस्तीर्थस्नानावधिगोपिचंदनंधार्यमिति एतदाहात्रि तीर्थस्नानावधौनूनंगोपीचंदनधारणं ॥ तदूर्ध्वंतुत्रिपुं
ड्रंस्यात्धृतंतुबटुनाशुभमिति ॥ ७३ ॥ तदेतेनवचनेनतीर्थस्नानादूर्ध्वंत्रिपुंडधारणंयुक्तमुत्पश्यामः केचिदाहुरेकवत्सरोपाकर्मांतंधार्यमिति शाट्यायनिः उ-
पाकर्मांतमेकास्मिन्वत्सरेगोपिचंदनं ॥ तदूर्ध्वंतुत्रिपुंड्रंस्यात्धारणीयंवटोःशुभमिति ॥ ७४ ॥ तदसंगतमेवयोग्यताविरहात अन्यथास्मार्तमतभंगापत्तेश्च य-
दाहविदूरथः स्मार्तकर्मणियुक्तस्यात्रिपुंड्रंसार्वकालिकं ॥ उपनीतौस्नानमात्रमूर्ध्वपुंड्रप्रशस्यतइति ॥ ७६ ॥ किंविस्तरगवेषणयेतिदिक उपनयनप्रस्तावेपितुः

संध्यावंदनमंत्रस्यपार्थक्वायोगोनयुक्तस्तथापिगायत्र्यावेदमात्रस्यातावनाधिकारोस्तीतिसिद्धं अन्यथामूलमंत्रमात्रजपानर्हत्वात् ननुवेदाध्ययनतदाकार्यमि
तिचेत्ब्रूमः आदिमंतदुपाकर्मयावन्नभवतीहतु ॥ तावद्गुरुकुलेवासोनयुक्तोब्रह्मचारिणइति ॥८३॥ मांडव्योपि प्रथमोपाकर्मणिचेदुपावृत्तेयथाविधि ॥ कृत्वा
गुरुकुलेवासंवेदाध्ययनमाप्नुयादिति ॥८४॥ तथाचकिमेतावताशास्त्रेणप्रतिपन्नमितिःविचारेस्मार्तकर्मणियुक्तस्यबटोर्मूलत्रयमंत्राधिकारः संध्यावंदनवैदिक
मंत्राधिकारश्चप्रथमोपाकर्मसिद्धिमुद्दिश्यतावताप्रवर्तनेनयुक्तत इतिभावनीयमायुष्मता आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये ॥ पूर्णःप्रथमउल्लासोनित्य
कांडेशुभावह ॥८५॥ इतिश्रीआनंदगिरिस्वामिकृतेस्मृतिसारसमुच्चयेनित्यकांडेप्रथमउल्लासःसमाप्तः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

साबंशिवंविघ्नपतिंवरेण्यं । हरिंरमांसाधुसरस्वतींच ॥ सर्वान्वसिष्ठादिमुनीन्प्रणौमि । महेंद्रमुख्यानपिदेवसंघान् ॥१॥ ब्रह्मचर्यगार्हस्थ्यंवानप्रस्थयिंसन्यासइति चत्वारोद्विजातेराश्रमाःप्रतीताःतत्राद्योयंयथावद्विचारितःतन्मध्येस्नातकंनामव्रतमस्तितद्विषयेचिंत्यते लोगाक्षिः ब्रह्मचारीगुरुकुलेस्थित्वावेदानधीत्यच ॥ शास्त्राणिचसमभ्यस्यस्नातकंव्रतमाचरेदिति ॥२॥ शाट्यायनिरपि द्वादशेवत्सरेतीतेषोडसेवत्सरेथवा ॥ वेदशास्त्रंसमभ्यस्यस्नातकव्रतमाचरेदिति ॥३॥ अत्रहिस्नातकव्रतमाचरेदित्युक्त्यागुरवेदक्षिणांदत्वाब्रह्मचर्योत्तरमेकवत्सरंस्नातकविधानेनवैवाहिकंद्रव्यमार्जयेदितिप्रतीयते यदाहपैठीनसिः ब्रह्मचर्यंपरित्यज्यस्नातकेनाविधायतः ॥ द्रव्यमार्जयतेनूनंवैवाहिकमनुत्तमामिति ॥४॥ नन्वत्रस्नातकविधानंकीदृशमित्यपेक्षायांबादरायणआह ऽतुर्निगममूलेतुमंत्रानुच्चार्यहोमयेत् ॥ समिदादीन्यथायोगंबैल्वंतुसामिधंस्मृतामिति ॥५॥ गार्ग्यः अग्निमीळइषेत्वोर्जेअग्नआयाहिवीतये ॥ शंन्नोदेवीतियेमंत्रानिगमाद्याप्रकीर्तिताइति ॥ ६ ॥ निगमाद्याश्चतुर्निगमादिमंत्राइत्यर्थःअत्रिः हुनेद्वायत्र्यानूनंपायसंघृतामिश्रितं ॥ यज्ञोपवीतंपरमंमंत्रेणच्चपयोहुनेदिति ॥७॥ अत्रविशेषोहेमाद्राबुदाहृतः आचार्यायचगांदत्वाप्रार्थयेत्तंसमंत्रकं ॥ समावृतोस्मीतिततःब्रह्मचर्यादितिब्रुवन्निति ॥८॥ तदनेनवचनेनब्रह्मचर्यातिवृत्तिविज्ञानंसमावर्जनामितिप्रतीयतेततोप्यतिशयेभट्टभास्करीयेनिरुक्तः स्नातकेनविधानेनतीर्थयात्रांसमाचरेत् ॥ आवर्तयन्वेदशास्त्रंद्रव्यमार्जयतेतथेति ॥९॥ गोभिलः वसूतिचविवाहार्थमार्जयित्वामहामिमां ॥ स्नातकेनविधानेनततोगार्हस्थ्यमाचरेदिति ॥१०॥ नन्वेतावताप्रतिपादनेनाकिमत्रनिरुक्तमासीदित्याशंकायांसमावर्तनात्परमध्येत्वेकवत्सरंस्नातकव्रतंब्रह्मचर्यांगमेवेतिविवक्षितं तथाचब्रह्मचर्यंविशेषविधिविरहिततयास्नातकव्रतेद्रव्यार्जनंकृत्वातदूर्ध्वंगार्हस्थ्यमाचरेदिति प्रस्तुतोनुगतोवेदितव्यः अतविवाहयोग्यःकालभेदोनिरूप्यते तृतीयायांचपंचम्यांसप्तम्यांदशमीदिने ॥ सुलक्षणवतीकन्यामुद्वहेद्ब्राह्मणोत्तमामिति ॥११॥ हारितः वैधृतौचव्यतीपातेपरिघेवज्रएवच ॥ शूलेचनोद्वहेकन्यामन्यथाविधवाभवेदिति ॥१२॥ वसिष्ठः रात्रौविवाहःशस्तोयमहन्यपिकदाचन ॥ दोषहीनोभवेत्तत्रप्रदोषंतंपरित्यजेदिति ॥१३॥ गुरुः सावित्रश्चैवपवनःरोहिणीचतथाशशी ॥ मघामूलंचोत्तरास्याद्विवाहेशोभनाइमइति ॥१४॥ एभिर्वचनैःकालभेदप्रतीतेसंक्रमपर्वणोर्निषेधोयुक्ततरःयदाहलोगाक्षिः संक्रमेपर्वणाश्चैवविवाहंनैवकारयेत् कृतश्चेद्विधवानारीभविष्यतिनसंशयइति ॥१५॥ तदनेनवचनेनप्रत्यवायश्रवणेसातिसंक्रमपर्वणोर्विविक्ततयातादितरेषुशुद्धदिनेषुविवाहःकार्यइतिविवेकः ननुविवाहःकतिविधः विवाहाष्टविधोभवतितथाहिशांडिल्यः ब्रह्मो

गांधर्वविवाहलक्षणंमांडव्येनोक्तं समूहेषुसमंधिष्यपुरुषंपुष्पमालया ॥ वृणुतेयास्वयंनारीगांधर्वंतदुदीर्यतइति ॥२३॥ राक्षसविवाहःकात्यायनेनोक्तः युद्धे- ३
[५] विजित्यभूपालान्यःकन्यांहरतेबलात् ॥ राक्षसोयंविवाहःस्यात्क्षत्रियाणांकदाचनेति ॥२४॥ दैवविवाहलक्षणंस्मृतिचंद्रिकायांप्रतीतं मातापितृविहीनायावि-
धिनास्वयमेवतु ॥ भर्तारंवृणुतेयस्माद्विवाहोदैवईर्यतइति ॥२५॥ आसुरपैशाचयोर्लक्षणंशूद्राणामनुकूलमितितल्लक्षणंनात्रोदाहृयितइत्युपरम्यते कन्यायावर
णेगोत्रपरीक्षाकार्यैतिसर्वस्मृतिष्वविवादः यदाहकात्यायनः गोत्रंपरीक्षणीयंस्यात्कन्यायावरणेतथा ॥ मनयोयेप्रतीतास्युस्तत्संसर्गोविविच्यतइति ॥२६॥
ब्रह्मांडपुराणे कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगौतमः ॥ जमदग्निर्वसिष्ठश्चसप्तैते मुनयःस्मृताइति ॥२७॥ वृद्धयाज्ञवल्क्यः गोत्रेषुसप्तसुतथाप्युपगोत्रेषुमृ
ग्यते ॥ कन्यायावरणेनूनंयथाकन्यातथाहाविरीति ॥२८॥ यदेतैर्वचनैर्गोत्रविचारेप्रसक्तेतदत्राविविच्यते गार्ग्यः काश्यपेवत्सगोत्रंस्यादुपगोत्रंतदीर्यते ॥ त
योर्विवाहोनैवास्तिशास्त्रदृष्टंपुरातनामिति ॥२९॥ वृद्धमनुः भरद्वाजोप्यंगिरसमुपगोत्रंतादिष्यते ॥ तयोर्विवाहोनैवास्तिकृतंचेदेकगोत्रतेति ॥३०॥ पैठनासिः
अत्रेश्चपौरुकुत्स्यास्तंगोत्रंस्यादुपगोत्रकं ॥ तयोर्विवाहोनैवास्तिशास्त्रदृष्टंपुरातनामिति ॥३१॥ हारीतः विश्वामित्रोकौशिकाख्यमुपगोत्रंतदिष्यते ॥ संबंधो [५.]
नैवकर्तव्यस्तयोरेवपरस्परामिति ॥३२॥ गालवः गौतमेप्यथशांडिल्यमन्यद्गोत्रंप्रतीयते ॥ कन्यायोगोनतत्रास्तितयोरेवपरस्परामिति ॥३३॥ स्मृतिचिंतामणौ
प्रतीतमेतज्जमदग्निगोत्रे। यद्भार्गवंगोत्रमथाभियुक्तं ॥ तयोर्विवाहोनपरस्परंस्यात्कृतेसगोत्रंकथयंतिसंतइति ॥३४॥ स्मृतिरत्वावल्यां कौंडिण्यगोत्रमागस्त्यं

वासिष्ठेभेदईर्यते ॥ तेषांविवाहोनोमुक्तःपरस्परमतिप्रथेति ॥३५॥ एवंचगोत्रनिर्णयजातेजात्यंतरेगोत्रभेदसत्वेविवाहोथवृत्तेनवेतिचिंत्यते शाट्यायनिः जाते-
जात्यंतरेयोगोगोत्रभेदेनयुज्यते ॥ कन्यायावरणेनूनंकृतेचेत्पातितोभवेत् ॥३६॥ स्मृतिचंद्रिकायां जातौचेद्ब्राह्मणाद्याःप्रथितविषयतामाश्रितायत्रयोगस्तत्रैवं
युक्ततास्याद्भव.तत्रवरणेकन्यकायाःप्रतीतिः ॥ कृत्वान्यत्रैवमोहात्पततिचनिरयेजातिसांकर्यमेतत्त्यक्त्वातस्माद्द्विजाद्यैरनुचितमितितैर्युज्यतेयुक्तिविद्भिरिति
॥३७॥ तदेवंविधवचनैरांध्रद्राविडादिभेदवत्सयाब्राह्मणेषुब्राह्मणांतरैर्विवाहोनयुक्तस्तरइतिकन्यावरणंविसृज्यइतिविवेकः यदाहकाशकृत्स्नः आंध्रद्राविडक-
र्णाटाद्येविप्रास्तासुजातिषु ॥ पृथगेवप्रकुर्वीतविवाहमितिनिश्चयइति ॥३८॥ विस्तरःस्मृतिकौस्तुभेवधातव्यइतितादिक आतस्मात्प्राक्कन्यावरणेगोत्रपरीक्षा
निर्णीता तदधुनाकन्यायाःकुलविशुद्धिर्निर्णीयते यदाहपैठनासिः कुलंपरीक्ष्यकन्यायाःविवाहोहिप्रशस्यते ॥ अन्यथाकिल्बिषीभूत्वानरकेपरिपच्यतइति ॥३९
शांडिल्योपि परीक्ष्यकन्याविप्रेणविवाह्यातिप्रयत्नतः ॥ मातृतःपितृतःशुद्धाकन्यासापुण्ययोगिनीति ॥४०॥ ननुमातृतःपितृतःशुद्धत्युक्तांकिमत्रनिदानमिति
चिंत्यतेलोगाक्षिः मातरंचस्वसारंचपुत्रींचपरिवर्जयेत् ॥ पौत्रीमपियथायोगंतदन्यामुद्वहेत्बुधइति ॥४१॥ अत्रायंविवेकः मातरंचस्वसारंचेत्युक्त्याविरोधः

तारकामिति ॥ ४८ ॥ नन्वत्रकोयंविशेषोवाशिष्टइतिचेत्ब्रूमः काशकृत्स्नः मातापितृकुलेयत्रव्यभिचारादिलक्षणं ॥ नास्तियस्याविवाहार्हासाज्ञेयापतियोगि
नीति ॥ ४९ ॥ विस्तरोदिनकरग्रंथेद्रष्टव्यः क्वचिद्देशेमातुलकन्यामुद्वहंतिसोयमाचारोग्राह्योनवेतिचिंत्यते स्मृतिचंद्रिकायां देशाचारंतावदादौविचार्य
देशेदेशेयास्थितिःसैवकार्या ॥ लोकद्विष्टंपंडितावर्जयंति दैवज्ञोतालोकमार्गेणयायादिति ॥ ५० ॥ स्मृतिरत्नाकरे यस्मिन्देशेयआचारःपारंपर्यक्रमागतः ॥
नोलंघनोयःकुत्रापिग्राह्यएवमनीषिभिरिति ॥ ५१ ॥ निर्णयपारिजातेपि ॥ यद्यपिस्यात्त्रिलोकज्ञस्त्रैलोक्याकर्षणक्षमः ॥ तथापिलौकिकाचारंमनसापिनलंघ
यादिति ॥ ५२ ॥ तदेतैर्वचनैर्लौकिकाचारप्राप्ततयामातुलकन्योद्वाहप्रसक्तः तदत्रविचार्यते पैठीनसिः मातुलस्यसुतामूढ्वामातृगोत्रांतथैवच ॥ समानप्रवरां
चैवत्यक्ताचांद्रायणंचरेदिति ॥ ५३ ॥ तदेतेनवचनेननिषेधेप्रसक्तेआंध्रगुर्जरामहाराष्ट्रादूषयंतीतिप्रतीतिः लोगाक्षिः आंध्रगुर्जरदेशेषुमहाराष्ट्रेषुकीर्त्यते ॥
मातुलसुतोद्वाहोमातृहत्याप्रसूचकइति ॥ तेनेयंदेशव्यवस्थावसीयते अतएवाहमनुराह द्राविडाश्चैवकर्नाटायेपिकेरलभूसुराः ॥ मातुलस्यसुताप्राप्त्याभार्यै
तिपरिगृण्हतइति ॥ ५४ ॥ पूर्वोक्तनिषेधश्रवणेनकुतइयंदेशव्यवस्थेतिचेन्न युक्तायुक्तव्यवस्थायांपर्यवसितत्वात् यदाहकाशकृत्स्नः मातुलस्यसुतासैयमार्यै
वस्यान्नसंशये ॥ स्नुषापरिणयःकस्मादांध्रैस्तुपरिगृह्यतइति ॥ ५५ ॥ तदनेनवचनेनआंध्रदेशव्यवस्थायांप्रतिपत्तिर्गृह्यतएवेति ननुश्वश्रुसदृशींकन्यागुर्जरा
कुतउद्वहंतीतिचेन्न महाराष्ट्रेतदंगीकारात् यदाहविष्णुवृद्धः श्वश्रुपत्नीयथायोगंमहाराष्ट्राप्रगृण्हते ॥ तन्मतेनैवदोषोस्तिदेशेष्वन्येषुभिद्यतइति ॥ ५६ ॥ तद
नयाव्यवस्थायामातुलकन्योद्वाहःकेरलद्राविडविषयेकर्नाटकविषयेपिनदुष्यंतीतिहेमाद्रौस्थितं कर्नाटेषुद्राविडेषुकेरलेषुद्विजन्मसु ॥ मातुलस्यसुतोद्वाहःपू-
ज्यएवनसंशयइति ॥ ५७ ॥ वचनांतरविधानंगौरवग्रस्तमितिपराक्रियते अधुनास्त्रीपुंसाघटनाविषयोविचार्यते गुरुःविप्राणांग्रहमित्रत्वंशूद्राणांयोनिरेवच ॥
गणकूटंक्षत्रियाणांवश्यंवैश्येषुसंमतमिति ॥ ५८ ॥ अत्रह्यादौविप्राणांग्रहमैत्र्यंप्राधान्यमित्युक्तं किंतत्ग्रहमैत्र्यमित्यपेक्षायांमुहूर्तरत्नमालायामुक्तं स्युःसूर्य
स्यैवामित्रगुरुकुजरवयःसूर्यसौम्यावथेंदोः सूर्योभानुर्गुरुच्चाप्यथकुजविषयेभानुशुक्रौचसौम्ये ॥ भूपुत्रोविध्विनोचप्रभवतिगुरवेसौम्यसौरीचशुक्रे शुक्रेसौम्यः
शनेस्युःसुहृदइतिमतासर्वसिद्धांततइति ॥ ५९ ॥ योनिप्राधान्यंशूद्राणामित्युदाहृतं तद्विषयेपरस्परविरोधःवासिष्ठेनोक्तः विरोधस्यादाखुरयोस्तथैवमाहिषाश्वयोः॥
ओतुभुजंगस्यतथाप्येवंहस्त्यश्वयोरपीति ॥ ६० ॥ गणकूटंक्षत्रियाणामित्युक्तं तद्विषयेत्वेवंव्यवस्था भरद्वाजः उत्तमंस्वगणंप्रोक्तंमध्यमंदेवमानुषं अधमंरा-

अत्रेषांविषयविभागोप्येवं गार्ग्यः अश्वीमृगशिरोहस्तस्वातीतिष्यपुनर्वसू ॥ मैत्रश्रवणरेवत्यइतिदेवगण
क्षसंविद्याद्गणकूटस्यलक्षणमिति ॥ ६१ ॥ अत्रेषांविषयविभागोप्येवं गार्ग्यः अश्वीमृगशिरोहस्तस्वातीतिष्यपुनर्वसू ॥ मैत्रश्रवणरेवत्यइतिदेवगण
इति ॥ ६२ ॥ कण्वः अग्निर्मघाविशाखाचआश्लेषाशततारकं ॥ धनिष्ठावेधसंयुक्तंज्येष्ठामूलंतुराक्षसमिति ॥ ६३ ॥ नारदः भरणीत्रीणिपूर्वाचरु
द्रातथैवच ॥ त्रीण्युत्तराणिविज्ञेयामानुषाःपरिकीर्तिताइति ॥ ६४ ॥ वैश्यानांवश्यकूटंप्रधानमित्युक्तं तत्कीदृश्यमित्यपेक्षायांसूत्रकारआह वश्यम
मितितथाहिवराहमिहिरः कोर्पिसिंहश्चमेषेभवतिचवृषभेकर्कटोयश्चजूकः कन्येयंयुग्मकेचप्रभवतिचधनुःकीटसंज्ञाविहेतौ ॥ तस्मादूर्ध्वंकुलीरेभवति
मेषकीटौहरेचेत्कन्यायांनक्रचापोभवतिचमकरोयस्तुलायांहिगीतः ॥ ६५ ॥ तौलिःकुंभेचकीटेभवतिचजुतुमौत्योपिचापेसमुक्तः आकोकेरश्चमत्स्य
चमकरेकन्यकाकुंभयुक्तः ॥ मीनेतस्मात्कुलीरःप्रथितइहमतोयेप्यमीराशयःस्युर्वश्याएतेसमुक्ताः प्रथितमुनिगणैर्योग्यतायांनिदध्यादिति ॥ ६६ ॥ तत्र
ज्योतिःशास्त्रानुरोधेनघटनायांनिर्णीतायांयेषुयेषुवर्णेषुमुख्यत्वंततोदितरेष्वपिशोधनीयमितिविवेकः एतदाहपैठीनसिः घटनासुपरीक्ष्यैवयोजयेच्छात्रा
ज्योतिःशास्त्रानुरोधेननचेद्व्यत्ययतांव्रजेति ॥ ६७ ॥ लोगाक्षिः दंपत्योःशोभनंबोध्यंघटनायांपरीक्षणं ॥ ज्योतिःशास्त्रानुरोधेनविवाहेयोग्यताश्रि
॥ ६८ ॥ यद्यपीदंज्योतिःशास्त्रानुसंधानंस्मृतिव्याकुलिभावानुकूलंतथापिनिबंधनकृद्भिरंगीकृतमेवेतिसमाधेयं तदुक्तंहेमाद्रौ अनुक्तमन्यतोग्राह्यं
सूरिभिः ॥ शास्त्रांतरेचाविदितेयोग्यत्वेघटतेतरामिति ॥ ६९ ॥ इतऊर्ध्वंप्रकृतमनुसरामः विवाहप्रस्तावनामनूद्यदंपत्योर्विवाहात्पूर्ववासरेस्वस्तिवाच
शांतिविधायताइनएवेकौतुकबंधनंवेदध्युरितिसर्वमुनिसिद्धांतः यदाहलोगाक्षिः विवाहात्पूर्वदिवसेग्रहशांतिविधायतु ॥ कौतुकंबंधयेत्तत्रस्वस्ति
वेकामिति ॥ ७० ॥ कात्यायनोपि कौतुकंपूर्वदिवसेविवाहात्तत्समाचरेत् ॥ तदूर्ध्वंसूतकंनास्तिसत्यंसत्यंनसंशयइति ॥ ७१ ॥ अत्रहिकौतुकबंध
कर्तव्यंविवाहादित्युक्तं तेनसूतकनिवृत्तिरिति यदितदास्तांपश्चात्तस्यविवेकंवक्ष्यामः गालवः वरःश्वश्रुगृहंयायात्कृतकौतुकमंगलः ॥ सहधर्मश्चय
कत्याकन्यांददेत्पितेति ॥ ७२ ॥ गार्ग्यःगोत्रप्रवरमुच्चार्यवरवध्वोर्यथाक्रमं ॥ कन्यावरणमित्युक्तंसर्वशाखासुनिश्चयइति ॥ ७३ ॥ मांडव्यः माल
कन्यायाःपादौप्रक्षाल्ययत्नतः ॥ वरस्यकन्यांदिशतइत्युक्तंसर्वसूत्रभिरेति ॥ ७४ ॥ यदेतैर्वचनैःकन्यायाविवाहक्रमेप्रवृत्तेतन्मध्येसदसियाददीप
किंप्रायश्चित्तमित्यपेक्षायांशांडिल्यआह अघोरेभ्योथघोरेभ्यमंत्रमुच्चार्ययाजुर्षां ॥ सामेदादोन्क्रमात्धुत्वाशेषंकुर्याद्यथाविधीति ॥ ७५ ॥ अत्रैवदा

[७] ... तन्मध्यवह्निनाशेदःप्रायश्चित्तंचाकिंभवेत् ॥ ८१ ॥ सुमंगलीरितवधूमंत्रमुच्चार्या
यत्नतः ॥ शांतिहोमंप्रकुर्वीतलौकिकाग्नौयथाविधीति ॥ ८२ ॥ विवाहव्रतेलोकतःप्रतीतोयंव्यवहारोस्तिसफलंसमिधमेकंवरोगृण्हीयादिति तस्ययदिकदा
चिन्नाशोभवतिकिंप्रायश्चित्तविधानंएतदनूद्याहगौतमः वरसमिधोनाशेस्वास्तिवाचनपूर्वंवह्निमुज्ज्वाल्यवन्ह्यंतरेकनिक्रददितिमंत्रेणसमिदादीन्हुत्वापयोहिर-
ण्यवर्णामित्येकर्चाहुत्वापुनःसमिदंतरंगृण्हन्प्रायश्चित्तीभवतीतिविज्ञायतइतिविस्तरस्तुस्मृतितरंगिण्यांद्रष्टव्यः वैवाहिकेकर्मणिकंठसूत्रंकन्याप्रदानानंतरंनि-
बध्नंतिमेवलौकिकमताकाभितिचिंत्यते पैठीनसिः उपनीतौयथाभुंक्षुयज्ञसूत्रप्रधारणं ॥ विवाहेवनितानांहिकंठसूत्रप्रधारणमिति ॥ ८३ ॥ तदेतेनवचनेनकंठ
सूत्रप्रधारणं वनितानांलौकिकमितिप्रतीयते उपनीतिस्थानेतद्विधानात् अन्यथाभर्तुतात्पर्यानुरोधेनतासांसंस्काराभावेकर्मानर्हतापत्तेः यदाहकात्यायनः क-
र्माधिकारसिध्यर्थंकंठसूत्रप्रधारणं ॥ वनितानामिदंयुक्तंशास्त्रमेतद्विनिश्चयइति ॥ ८४ ॥ नन्वेतद्यदिलौकिकंतर्हितस्यधारणेकिमयंमंत्रइतिचेत्ब्रूमः लोगा [७]
क्षिः मांगल्यतंतुनेत्युक्त्वामंत्रेणानेनयत्पतिः ॥ कंठबध्नातियत्सूत्रंशास्त्रीयंतत्रनिश्चयइति ॥ ८५ ॥ नन्वत्रविवाहदीक्षायांकौतुकसूत्रप्रतीयस्नानंनित्यंतीर्थस्नान।
त्तन्निवृत्तेः तद्यदिछेदादिनानश्यतितदाकिंतत्प्रायश्चित्तमितिविवक्षायांगौतमआह कौतुकंचेद्विनष्टंस्यात्प्रायश्चित्तंकथंभवेत् ॥ आयुर्दाइतिमंत्रेणहुत्वानंतरे
विधिरिति ॥ ८६ ॥ नन्वत्रवन्ह्यंतरेविधिरित्युक्त्याविवाहाग्निरन्यतरइतिप्रतीयते सयदिव्रतमध्येविनश्यति तत्रकिंप्रायश्चित्तंविधेयमितिसंशयेशाट्याय-

निराह विवाहाग्नौविनष्टेतुतद्वधूवरयोर्भवेत् ॥ मृतिरेकत्रनिश्चित्यशांतिहोमंतदाचरेदिति ॥ ८७ ॥ शांतिहोमलक्षणंवह्निविनाशेलोमशेनोक्तं वह्नौसतिविनष्टे
स्मिन्विवाहेमंत्रपूर्वकं ॥ होतव्यंतेनदोषस्यविनाशोभवतिध्रुवमिति ॥ ८८ ॥ गार्ग्यः शंवतीरितिमंत्रेणसमिदाज्यचरून्हुनेत् ॥ पायसंजुहुयात्पश्चाद्गायत्र्यानात्र
संशयइति ॥ ८९ ॥ तत्रैवविशेषतोगोदानमुक्तंहेमाद्रौ विवाहेवह्निनाशंचेद्गोदानंनप्रयच्छति ॥ तत्पूर्वयोर्नाशोवरस्यगर्भंशपिष्यतीति ॥ ९० ॥ तदेतत्प्रत्य-
वायंदृष्ट्वाविवेकवत्तयागोदानंनिर्धारितमेवेतिचिंत्य विस्तरोभट्टभास्करीयेद्रष्टव्यः विवाहाग्निस्थधर्मास्तुभगवतासूत्रकारेणाश्वलायनेन जनपदधर्मा
ग्रामधर्माश्चतान्विवाहेप्रतीयादित्युक्तंतदत्रकेषुचिद्देशेषुविवाहलग्नात्परतःश्वशुरगृहगमनंतत्प्रमाणंनवेतिचिंत्यते गार्ग्यः विवाहव्रतमुद्दिश्यग्राम
धर्मःसनातनः ॥ देशधर्मोपिसंग्राह्यःतत्तत्कालव्यवस्थयेति ॥ ९१ ॥ अत्रापितत्तत्कालव्यवस्थयेत्युक्त्याविवाहहोमोयंतन्मंतश्वशुरगृहेनकार्यइतिप्रतीयते ननु
विवाहकार्यमुद्दिश्यसर्वसाधारण्यंवक्तव्यं किमत्रपक्षांतरंसमाधानमितिचेत्ब्रूमः लोगाक्षिः महाराष्ट्रेचसौराष्ट्रेविवाहोत्तरंभवतु ॥ निर्गच्छेतुश्वशुरगृहाद्विवा
हेलौकिकोह्ययमिति ॥ ९२ ॥ गोभिलः तीर्थस्नानाद्यधर्याथानिवासःश्वशुरवेश्मनी ॥ वह्निसंरक्षणंतत्रस्वस्यगेहततोव्रजेदिति ॥ ९३ ॥ एतेनविवाहात्पंचमेह्निश्व
शुरगृहात्स्वगृहंप्रतिनिर्गमनं शास्त्रवाद्यधानामतिनिषिद्धः अयमपिदेशाचारइतिकेचित् ...

रोभार्ययासमंस्वगृहव्रंजेदितियदुक्तंतत्रचिंत्यते बादरायणआह औपासनंचतुर्थाह्निकर्तव्यंतुद्विजन्मभिः॥ अग्निसिद्धिस्ततोयेनगार्हस्थ्यंतेननिश्चितमिति ॥९८॥ अत्रहौपासनंचतुर्थेह्नीत्युक्तंसोयमौपासनाग्निःवैवाहिकोनवेतिचिंत्यते कात्यायनः विवाहाग्नौप्रकर्तव्यऔपासनविधिर्द्विजैः ॥ तेनगार्हस्थ्यमुक्तंयंसर्वकर्मसुशोभनामिति ॥ ९९ ॥ ननुवह्नेर्भेदाभावोयंनिरूपितःकुतोस्यानित्यतेतिचेन्न सामित्समारोपणेनासिद्धत्वात् तथाहिवृद्धमनुः समिदारोपणंवह्नौविवाहाग्निःप्रतीयते ॥ यावदेषविवाहाग्निस्तावद्गार्हस्थ्यमीर्यतइति ॥ १०० ॥ मांडव्यः व्रतलोपेनयःकोपिविवाहाग्निंप्रशामयेत् ॥ कृत्वासांतपनंकृच्छ्रंब्राह्मणेषुविशुध्यतीति ॥ १०१ ॥ नन्वौपासनवह्नौकोदयोयंसमिद्धोमःकेनमंत्रेणप्रतीयतइतिचेत्ब्रूमः गौतमः कृत्वाप्रत्यवरोहेतिसमिधोयंयथाविधि ॥ अयंतेयोनिमंत्रेणसमिदारोपणंचरेदिति ॥ १०२ ॥ अत्रैवविशेषोनिर्णयपारिजातेस्थितः व्रीहिन्मुष्टिप्रमाणेनप्रत्यहंहोमयेद्व्रती ॥ विवाहाग्निःप्रसंतुष्टोवांछितंदिशतेतरामिति ॥ १०३ ॥ तथाविधस्यहोमस्यकीदृशोमंत्रोनिर्धार्थुःइतिचेत्ब्रूमः मरीचिः नाममंत्रेणजुहुयात्सूर्यायाग्नेप्रजापते॥स्वाहांतेनचतुर्थ्यंतयुक्तेनविधिरीरितइति॥१०४॥तथाच होमद्रव्यास्तद्धोहोममंत्रेचप्रतीतोविशेषः प्रयोगमुखेविदितइतिसमाधातव्यं प्रकृतोपयोगेत्वयंविशेषः केषुचिद्देशेषुचतुर्थदिनएवतदुदौपासनविधिंविहायतीर्थस्नानंकृत्वागेहमाव्रजंतसोयमाचारोयुक्तोनवेतिचिंत्यते विदूरथः औपासनविधिंहित्वाशास्त्रमन्यच्चरंतिये ॥ ब्राह्मण्यमेषांहिकुतःपतितास्युर्नसंशयइति ॥१०५॥ नन्वयंदेशव्यवहारोऽस्त्विातिचेन्नकर्मलोपसंभवात् तथाहिरल्हः ब्रह्मकर्मसमारंभःऔपासनविधिर्भवेत् ॥ तंपारित्यजतेमूढोब्राह्मण्यात्पातितोभवेदिति ॥ १०६ ॥ विस्तरोदिनकरग्रंथेद्रष्टव्यः आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये पूर्णोद्वितीयउल्लासोनित्यकांडेशुभावहः ॥ १०७ ॥ इतिश्रीआनंदगिरिस्वामिकृतेस्मृतिसारसमुच्चयेनित्यकांडेद्वितीयउल्लासः

अमरैरभिवंद्यमानपादाममरीभिःसततंनिषेव्यमणां ॥ गिरिजांगजगामिनींत्रिनेत्रांकलयेचेतसिशंकरार्धयामां ॥ १ ॥ विवाहेवृत्तेभार्यावत्सरांतेषुयदैवमृतुमभिमृशातितदागर्भाधानविधिःप्रयोक्तव्यइतिस्मृतिकृद्भिरंगीकृतंयदाहपैठीनासिः ऋतुसंवेशनेकालेगर्भाधानंप्रयोजयेत् ॥ वनितानामथाशास्त्रांपितृणामृणमुक्तयइति ॥ २ ॥ बादरायणोपि गर्भाधानंप्रकर्तव्यंवंशस्यैवाभिमुक्तये ॥ ऋतुसंवेशनंयत्रतत्रैवातिविनिश्चयइति ॥ ३ ॥ अत्रहिऋतुसवेशनेगर्भाधानकार्यमित्युक्तंतद्यदिऋतुदर्शनेकार्यंतदयुक्तमेवसूतकसंभवात्एतदुक्तंब्राह्मपुराणे प्रथमेहनिचांडालीद्वितीयेग्रामसूकरी ॥ ३ ॥ तृतीयेहनिशूद्रीस्याच्चतुर्थेरजकीतथेति ॥ ४ ॥ तदेतेनवचनेनचतुर्दिनावध्यशुचित्वंप्रतीयतेतदूर्ध्वंकार्यमितिनिर्णयःएतदाहलोगाक्षिः गर्भाधानंप्रकर्तव्यंपरित्यज्यचतुर्दिनं ॥ विषमेवासमेवापितदाषोडशघस्रयुगीति ॥ ५ ॥ तथाचतुर्दिनान्यतीत्यषोडशदिनावधिगर्भाधानकालइतिविवरणंगम्यते तेनविवरणेजातेसमदिवसेकिंफलाविषमादिवसेकिंफलामित्यपेक्षायां ज्योतिःसिद्धांतेगुरुराह युग्मेवाविषमेवापिगर्भाधानंप्रकारयेत् ॥ कन्यांसूतेथाविषमेसमेपुत्रंप्रसूयतइति ॥ ६ ॥ ननुगर्भाधानस्यज्योतिःशास्त्रोक्त्यादिनांतरंमृग्यंनवेतिविचिकित्सायांकालप्राप्ततयानतस्यादिनमार्गणेतिविवेकः यदाहमरीचिः आषोडशादिनंयत्रगर्भाधानेनसूच्यते ॥ तिथिवारादिकंतत्रतदूर्ध्वेपरिशोध्यतइति ॥ ७ ॥ गालवः आषोडशादिनांतंयत्कालप्राप्तंविधीयते ॥ तदूर्ध्वंयदिकर्तव्यंदिनंतत्रविशोधयेदिति ॥ ८ ॥ एतदुपघाताविषयेद्रष्टव्यं यदाहकात्यायनः सूतकादेस्तुसंबाधेऋत्वंतरसमागमे ॥ ज्योतिःशास्त्रानुरोधेनगर्भाधानंप्रकारयेदिति ॥ ९ ॥ अत्रहोममंत्रोमनुनाप्रकाशितः यन्मेमातेतिमंत्रेणसमिदाज्यचरून्हुनेत् ॥ गर्भाधानेकर्मणिचतदेंद्राणींप्रपूजयेदिति ॥ १० ॥ विस्तरोहेमाद्रौद्रष्टव्यः यदत्रसूत्रकृताभगवतामहेश्वरेनिंद्यर्क्षतिथिवासरेषुप्रथमर्तौदंपत्योरभिवृद्धयेशांतिरित्युदाहृतं कानितानिनिंद्यर्क्षतिथिवासराणीत्यपेक्षायांविविच्यते गार्ग्यः कृत्तिकाभरणीज्येष्ठाविशाखासुभविष्यति ॥ प्रथमर्तुर्यदितदाप्याश्लेषायांचदुःखभागिति ॥ ११ ॥ नारदः अष्टम्यांचचतुर्दश्यांषष्ठ्यांचैवभवेद्यदि ॥ प्रथमर्तुस्तदाशांतिंकुर्यादायुष्यवृद्धयइति ॥ १२ ॥ गुरुः कुजवारेरवेर्वारेमंदवासरएवच ॥ प्रथमर्तुर्यदिभवेत्तदाशांतिर्विधीयतइति ॥ १३ ॥ अत्रहिसूत्रकृदुक्तौयोगविशेषेउपलक्षणंप्रतीयते यदाहकात्यायनः शूलेगंडेव्यतीपातेव्याघातवज्रएवच ॥ प्रथमर्तुर्यदिभवेत्परिघेशांतिमाचरेतइति ॥ शांतिस्वरूपंकीदृशमित्यपेक्षायांबादरायणआह सूर्याचंद्रमसौयत्रदेवताभुवनेश्वरी ॥ समिदाज्यचरून्हुत्वाघृतदूर्वातिलान्हुनेदिति ॥ १४ ॥ अत्रलोगाक्षिर्विशेषमाह सवितात्प्यायस्वमंत्रौगायत्रीमनुरेवदूर्वातिलाक्षतद्रव्यंपृथगेवप्रकीर्तितमिति ॥ १५ ॥ अत्रगोदानमुक्तंहे

गाद् ॥ प्रथमतुभ्रमद्रागमुलस्यशुभदांगर्भादिति ॥ २४ ॥ तद्दैतेयनैर्भयसूत्रेणजनत्रकादशशांतिविधानामीतीयवक्षायामुक्तांत्वियशांतिमियोहः तत्रदानमात्रं [illegible] ॥ २५ ॥ शाकटायनः [illegible]
र्विशिष्यते यदाहमांडव्यः वत्सदानेपौर्णमास्याछागंसंक्रमणेभवेत् ॥ यद्यमायामतडुहदानमेवांविनिर्दिशेदिति ॥ २५ ॥ विष्णुवृद्धः ग्रहणेतिलकुंभस्यदानंकु-
श्मांडसंयुतं ॥ कृत्वादोषैर्विमुच्येतप्रथमतौतदासतीति ॥ २६ ॥ वृद्धवसिष्ठः मघादिभेष्वनिष्टेषुप्रथमर्तुःसमन्विता ॥ दत्त्वैवदशदानादिमुक्ताभवतिसाक्षणा-
दिति ॥ २७ ॥ एवंविधैर्वचनविशेषैर्दानमाहिस्नानिवृत्तिसूचिताश्राद्धेतुविशेषःलोमशः घृतकुंभंस्वर्णयुतंतिलकुंभसमन्वितं ॥ दत्त्वापितृदिनेनारीप्रथमतौप्रशां-
स्यतीति ॥ २८ ॥ तथाहिदानविधानमात्रंयन्निरूपितंदानमंत्रापेक्षाजातैवेत्यर्थः शौनकः वत्सेनपुत्रसंपत्तिर्वंशवृद्धिश्चजायते ॥ तस्मादस्यप्रदानेनमतःशांतिंप्र-
यच्छमइति ॥ २९ ॥ गार्ग्यः धर्मस्त्वंवृषरूपेणजगदानंदकारक ॥ तस्मादस्यप्रदानेनमतःशांतिप्रयच्छमइति ॥ ३० ॥ ॥ लोगाक्षिः छागोऽग्निस्सर्वदेवांगंछागस्त्वं
सर्वपापनुत् ॥ प्रयच्छामिद्विजाग्र्यायमदोषंव्यपोहत्विति ॥ ३१ ॥ अत्रहिग्रहणविपर्येमहान्दोषइतिमाहपदानदद्यादित्याहगालवः तदभावेविकल्यते ग्रहणेप्र-
थमर्तुश्चमहादोषविनिर्दिशेत् ॥ तदोषपरिहारायमाहिषदानमीरितमिति ॥ ३२ ॥ तद्दानमंत्रः [illegible] मृत्युनाशकरं [illegible] ॥
तस्मात्तवप्रदानेनशांतिमद्यप्रयच्छमे ॥ ३३ ॥ इतरेषांदानानामवधारणीनांमत्राधिकारोत्तरप्रकरणांतरे यथाक्षतइतिसाधूपरम्यते यदत्रगर्भाधानेनिर्णीतदेवयो-

गेनकदाचिद्यदिगर्भिणीतन्मध्येकर्मद्वयंप्रतीयते तद्दर्तुधर्माश्चतेविविच्यते पैठीनसिः गर्भेजातेपुंसवनंतृतीयेमासिशस्यते ॥ गर्भस्यैवाभिवृद्ध्यर्थंहोमकर्मसमा-
रभेदिति ॥ ३४ ॥ लोगाक्षिः कुर्यात्पुंसवनंमासितृतीयेगर्भवृद्धये ॥ अन्यथापुंप्रसूतौस्यात्कन्यारंभनाश्रसंशयइति ॥ ३५ ॥ इदमेवपुत्रकामेऽपिप्रकृतिर्वाविज्ञायते
यदाहगालवः नकुर्यात्पुत्रकामोऽपिकुर्यात्पुंसवनंशुभे ॥ नित्यमेतद्विधेयंस्यादन्यन्नैमित्तिकंभवेदिति ॥ ३६ ॥ अत्रान्यन्नैमित्तिकंभवेदित्युक्त्यापुत्रकामेणावप्रती-
नायामपिनित्यमेतद्विधेयतइतिविवेकः यदाहरल्लः नित्यंपुंसवनंकर्मतृतीयेमासिशस्यते ॥ पुंस्प्रसूतिविधानायतद्वीर्यस्याभिवृद्धयइति ॥ ३७ ॥ किमत्रहोमावि
धानमितिप्रोच्यते भरद्वाजः कुर्यात्पुंसवनंकर्ममाविदन्पारिपंथितः ॥ मंत्रेणानेनजुहुयात्समिदादीन्यथाक्रमामिति ॥ ३८ ॥ अत्रैवहिरण्यदानमुक्तंहेमाद्रौ हिर-
ण्यंतत्रदातव्यंहोमेपुंसवनेमतं ॥ पुंस्प्रसूतेर्निमित्तत्वात्तत्पुंसवनमर्पितइति ॥ ३९ ॥ तत्रैवदंपत्योर्नीराजनंसंकीर्णबंधुभोजनमपिमन्यामहे यदाहकात्यायनः कृ-
त्वापुंसवनंकर्मनीराजनमथाचरेत् ॥ दंपत्योरथतद्बंधून्भोजयेदापिषड्रसैरिति ॥ ४० ॥ चतुर्थेमासिसीमंतोन्नयनंप्रशस्तं यदाहगार्ग्यः सीमंतकर्मकुर्वीतचतुर्थे
मासिगर्भतः ॥ दोहलेछायथाजातावानितातांयथाविधिरिति ॥ ४१ ॥ अत्रहिगर्भिणीदोहलेछायांवस्त्रकंचुकभूषणैःकुसुमाविशेषैरपिगर्भिणीसंस्कार्येति वि-
ष्णुवृद्धः गर्भाच्चतुर्थेमासेतुवस्त्रकंचुकभूषणैः ॥ गर्भिणीसंस्कृतायत्रसीमंतंतच्चकथ्यतइति ॥ ४२ ॥ [illegible]

जातकर्मविधानंस्वायंभुवसूत्रेउक्तं जातेसुतेतनययांवातत्कालेनद्यांतदाकेवास्नात्वास्वास्तिवाचनपूर्वकंदूर्वाक्षीररसयुक्तंस्वर्णरसंपाययेदिति शाट्यायनिः दूर्वा
क्षीररसोपेतंपेषयित्वाहिरण्यकं ॥ पाययेत्तत्शिशोर्नूनंजातकर्मैतदीर्यतइति ॥५०॥ तद्विषयेमंत्रोगार्ग्येणोक्तः आयुष्यमथवर्चस्यंमंत्रेणानेनमंत्रवित् ॥ पायये
त्तत्शिशोर्नूनंहिरण्यरसमेवात्विति ॥५१॥ ततःपितामंत्रांतरेणशिशोर्हृदयंस्पृष्ट्वाब्रूयादितिनिर्णयपारिजातेस्थितं अंगादंगेतिमंत्रेणहृदयस्पर्शनंशिशोः ॥ कुर्व
न्नेवंवदेन्नूनंपितासम्यग्विचक्षणइति ॥५२॥ ततोमूर्धानमाजिघ्रेदितिस्मृतितरंगिण्यांस्थितं शिशोर्मूर्धानमाघ्रायजातकर्मविधौपिता ॥ द्वादशेह्नियथायोगकारिष्य
इतिसंवदेदिति ॥५३॥ अत्राह्निकारिष्यइतिसंवदेत्युक्त्याद्वादशेह्निविधानंमंत्रपूर्वंवह्निहोमइतिविवेकः ननुतत्रैवहोमःक्रियतांकिंद्वादशाहावसानमितिचेन्न ताव
देवास्यमंत्राधिकारत्वात्अन्यथासूताकिनःसर्वकर्मप्रवृत्तेः यदाहलौगाक्षिः जातकर्मद्वादशेह्निमंत्रपूर्वंतुहोमतः ॥ भवेत्तत्रैवसंस्कारोवह्नावितिविनिश्चयइति
॥५४॥ जातूकर्ण्यः जातकर्मणिहोमेस्मिन्पितुर्वैवाधिकारता ॥ जातमात्रेशिशोर्नूनंद्वादशेह्निविधीयतइति ॥५५॥ होमविधानंपैठीनसिनोक्तं यन्मेगर्भेतुव-
सतःमंत्रमेतदुदीर्यतु ॥ समिदाज्यचरूनत्रजुहुनेत्तन्मंत्रविद्बुधइति ॥५६॥ कर्णवेधमपितद्दिनएवकार्यमितिविवेकः गालवः द्वादशेह्निपिताकुर्यात्शिशोश्चेत्कर्ण
वेधनं ॥ भूरिद्रविणसंपत्तिर्जायतेनात्रसंशयइति ॥५७॥ कात्यायनः द्रविणोदाइतिमनुहोमेतस्मिन्विधीयते ॥ समिदाज्यचरूनेवमुनेत्तन्मंत्रविद्बुधइति
॥५८॥ यदेतन्नामकरणंतद्दिनएवाभिहितं एतदुक्तंवात्स्यायनेन पितैवनामकरणंद्वादशेहनियत्नतः ॥ कर्णवेधनसंयुक्तंकरोतीतिविनिश्चयइति ॥५९॥
नामकरणेत्रैविध्यंप्रतीयते मासप्रयुक्तंनक्षत्रप्रयुक्तंस्वाधिष्ठानदेवताप्रयुक्तमिति एतदाहगौतमः मासनामचनाक्षत्रंनामस्वस्याधिदेवता ॥ यन्नामतस्यकुरुतेपि-
तानात्रैवसंशयइति ॥६०॥ नामकरणस्यकिमधिष्ठानोमंत्रेतिविवक्षायांहोमविषये पराशरआह कृणुष्वपाजमंत्रेणनामकर्मणिहोमयेत् ॥ समिदादीन्यथावाह्नि
शास्त्रमेवंविनिश्चयइति ॥६१॥ नन्वत्रत्रयाणांकर्मणांपृथगेकोवाह्निसंशये वृद्धयाज्ञवल्क्यआह त्रयाणांकर्मणामत्रजातकर्मादिसंस्कृतौ ॥ वह्निरेकोविनिर्धार्यः
स्वास्तिवाचनपूर्वकमिति ॥६२॥ विस्तरोहेमाद्रौद्रष्टव्यः यदत्रशिशुजनननिमित्ततयापूर्वत्रजातकर्मसंस्कारोभिहितः तदनुगततयाद्वेकर्णवेधननामकरणकर्म-
णिनिरूपिते जननेयद्यरिष्टप्रवृत्तिस्तद्विषयेशांतिरधुनानिरूप्यते लौगाक्षिः संक्रमेचेत्पितृदिनेग्रहणेचंद्रसूर्ययोः ॥ जातोवापिमृतोवापिकुलक्षयकरोभवेदि
ति ॥६३॥ गोभिलः अमायांदर्शमास्यांचव्यतीपातेभवेज्जनिः ॥ जातोवापिमृतोवापिकुलक्षयकरोभवेदिति ॥६४॥ नारदः ज्येष्ठारेवातिसर्पांतेमूलाश्विनि

मघादिषु ॥ जातोवाऽपिमृतोवापिकुलक्षयकरोभवेदिति ॥ ६५ ॥ लोमशः कृत्तिकायांभरण्यांचविशाखायामतःपरं ॥ आर्द्रायांयदिसंजातःकुलक्षयप्रभवेदि
॥ ६६ ॥ कात्यायनः सदंतजननंयत्रकुटुंबस्यविनाशनं ॥ कुर्याच्छांतिमतोनूनंयथावित्तानुसारतइति ॥ ६७ ॥ यदेतैर्वचनैररिष्टसूचनेनशांतिःकीदृग्विधेत्यपे
यांव्यवहारमुखेनविज्ञाप्यते भरद्वाजः पितृश्राद्धदिनंयत्रचंद्रसूर्यग्रहस्तथा ॥ शांतिरेवककारास्यात्प्रतीतःसूर्यसंक्रमइति ॥ ६८ ॥ यदेतेनवचनेनसामान्यव
हारेणैवसिद्धोहोमद्रव्यमंत्रानिरूप्यंते गार्ग्यः आसत्येनेतिमंत्रेणतथाप्यायस्वमंत्रतः ॥ समिदाज्यचरून्हुत्वापरमाक्षतुहोमयेदिति ॥ ६९ ॥ शौनकः दुरि
षुदुष्टेषुसद्योजातेतिमंत्रतः ॥ धान्यंचसतिलंहुत्वागोदानेनविमुच्यतइति ॥ ७० ॥ वृद्धयाज्ञवल्क्यः द्वयोस्तुपर्वणोरत्रव्यतीपातःप्रसूयते ॥ शांतिरेकप्रकार
द्विषनाड्यांयथातथामिति ॥ ७१ ॥ नन्वत्रपूर्वैर्विषनाडीनसंगृहीताविषनाडीजननेकिमेतत्फलमित्यपेक्षायांजातूकर्णीराह विषनाड्यांयदिभवेत्सुतोवाकन्यकाथ
सकुटुंबस्वयंजग्ध्वास्वयंविलयमाप्नुयादिति ॥ ७२ ॥ एतेषुशांतिविधानंकीदृशमित्यपेक्षायांस्मृतिरत्नाकरेऽभिहितं त्रैयंबकंमंत्रमुदीर्ययत्नहुत्वासमित्पूर्वमिहाहु
॥ अपैतुमृत्युमनुनातथैवजुहोतितत्राज्यतिलंयथावदिति ॥ ७३ ॥ नक्षत्रारिष्टेभट्टभास्करीयेशांतिविधानंप्रकाशितं नक्षत्रदेवनामंत्रैःसमिदाज्यचरून्हुन
गोदानंसर्वथाकार्यंतद्दोषपरिमुक्तये ॥ ७४ ॥ मूलनक्षत्रजातस्यगोमुखप्रसवोविशेषः यदाहशाट्यायनिः मूलेजातोयदिशिशुःशांतकर्मणितंशिशुं ॥ श
धायगोगर्भादुत्पत्तिंसूचयेच्छिशोरिति ॥ ७५ ॥ तदेतेनगोप्रसवनिमित्तेनतदरिष्टनाशः यदाहरुद्रः गोमुखप्रसवंकृत्वामलअस्याशिशोरनु ॥ मातुःपितुररि
ष्टंवैनश्यत्यसंशयइति ॥ ७५ ॥ सदंतजननेविशेषमाहहारितः समिदाज्यचरून्हुत्वारुद्रगायत्र्याततः ॥ बिल्वपत्रतिलैर्हुत्वासदंतजननंसुखमिति ॥ ७७ ॥
रःस्मृतितरंगिण्यांद्रष्टव्यः एवमुक्तरीत्याजनननिमित्तशांतीनिरूपितावांततः पूर्वंद्वादशेह्नित्रीणिकर्माणिनिरूपितानिअधुनानिष्क्रमणान्नप्राशनचौलानांस्वरू
निर्णीयते यदाहकश्यपः पंचमेमासिकर्तव्यमुपनिष्क्रमणंशिशोः ॥ चंद्रदर्शनमेतद्धिशिशोरत्रनिरूप्यते ॥ ७८ ॥ एतद्धोमविधानंशौनकेनोक्तं कृत्वानव
मंत्रात्समिदादेर्यथातथं ॥ होमंसायाह्नसमयेकार्यंचंद्रस्यदर्शनमिति ॥ ७९ ॥ तदेतस्मिन्कर्मणिचंद्रदर्शनंबालस्यविशेषविधिः अथषष्ठेमास्यन्नप्राशनंशि
धेयं यदाहसंवर्तः षष्ठेमासिप्रकर्तव्यंयदन्नप्राशनंशिशोः ॥ यज्जुहोतित्वन्नपतेमंत्रेणसमिदादिकानिति ॥ ८० ॥ तथावाशिष्ठस्यचौलकर्मणःकीदृग्विधान
रितिचिंत्यते कात्यायनः चंद्रताराबलंवीक्ष्यचौलकर्मसमारभेत् ॥ शिशोर्दीर्घायुषोलाभोभवत्येवनसंशयइति ॥ ८१ ॥ काशकृत्स्नः तृतीयेवत्सरेकार्यं

[illegible] गर्भाधानंपृथक्कर्मकर्तव्यनात्रसंशयः ॥ [illegible]शिष्यतइति ॥८८॥ यद्येतेनवचनेनपु-
सवनादीनांकर्मणांतत्कालेकर्तव्यतायांदिनसंपन्नातथासतितेषामपकर्षमुखेनउपनीतौकिंव्यवाहितामितिचेन्न तत्रानुकूलतयातद्वचनस्यप्राप्तत्वात्यदाहलौगा-
क्षिः कर्णवेधनकालेपिचौलस्यसमयेपिच ॥ उपनीतौयथायोगमपकर्षस्तुकर्मणामिति ॥८९॥ वृद्धयाज्ञवल्क्यः अपकर्षस्यसमयःकर्मणामभिगीयते ॥
कर्णवेधनचौलाभ्यामुपनीतौकथंचनेति ॥९०॥ ननुकर्मणामपकर्षमुखेनयदिक्रियतेतर्हिसांकर्यंकुतोनस्यादितिचेन्न क्रमकरणेबाधकाभावात् यदाहमनुः
क्रमेणाक्रियतेकर्मसंघातेनैवदुष्यति ॥ तस्मात्पुंसवनादीनांचौलादौतुप्रयोजकामिति ॥९१॥ एतत्कालातिरिक्तविषयंतत्कालप्रवृत्तौयुक्तमेवसंभवति यदा-
हहारीतः कर्मणांनैवसंघातस्तत्तत्कालप्रवृत्तिना ॥ संघातोयदिसंजातःप्रायश्चित्तंविनिर्दिशेदिति ॥९३॥ [illegible]प्रायश्चित्तंविनिर्दिशेदित्युक्तंतत्किंप्राय
श्चित्तमित्याशंकायां[illegible] [illegible] ॥ [illegible]रेदिति ॥९४॥ [illegible]
[illegible] ननुकर्मलोपे[illegible]मात्रेण
[illegible] यदाहगार्ग्यः हिरण्यधान्यदानंचधान्यदानांवानिर्दिशेत् ॥ कर्मलोपेसतियद्वाप्रायश्चित्तंविधानादिशेदिति [११]
॥९५॥ एतदुक्तरीत्याप्रायश्चित्तविधानंसांकर्यपरिहारोयथायोगंलुप्तदोषपरिहारश्चविज्ञायतेतरां यदुक्तंस्मृतिचिंतामणौ कालेथलुप्तेसतिकर्मकुर्यात्संघात

मेवोतिचयुक्तमेतत् ॥ दानेनविज्ञायततत्रसर्वसंपूर्तिमेतीतियथावदेवामिति ॥९६॥ विस्तरोभट्टभास्करीयेस्थितइतिदिक् अधुनागर्भाधानादिविषयेकार्याका
र्यताविचार्यते हारीतः ऋतुस्नातांतुयोभार्यांसंनिधौनोपगच्छति ॥ घोरायांभ्रूणहत्यायांयुज्यतेनात्रसंशयइति ॥९८॥ भ्रूणहत्याशिशुहत्येत्यर्थःतथाच तत्का-
लगर्भाधानसंस्काराभावेभ्रूणहत्यादोषप्रसक्तौकुत्रतदभावइतिचेत् लौगाक्षिः प्रवासेबंधनेजातेव्याधिग्रस्तेचभर्तरि ॥ गर्भाधाननतत्कालेदोषमस्यप्रसूय-
तइति ॥९८॥ तथाहियद्यप्यस्यगर्भाधानसंस्कारंविनास्त्रीसंगोनयुक्ततरः तथाप्येतदुपघातेननदोषोविविच्यतइतिभावः शाट्यायनिः नभ्रूणहत्यादोषोस्ति
बंधनादिनिमित्ततः ॥ गर्भाधानान्नतत्कालेतस्माद्युक्तंविधीयतइति ॥९९॥ ननुपूर्वंषोडशदिनावधिगर्भाधानकालइत्युक्तं कयाचिद्विधयाभूमोरजःप्रवृत्तौकिय
द्दिनादूर्ध्वंसूतकग्रहइतिचेत्ब्रूमः पराशरः ऋतुस्नातातुयानारीपुनरेवरजस्वला ॥ अष्टादशदिनादर्वागशुचित्वंनाविद्यतइति ॥१००॥ व्यासोपि अष्टादशादि
नात्पूर्वंयदिस्नाताशुचिर्भवेत् ॥ पुनरेवतदानारीस्नानमात्रेणशुध्यतीति ॥१०१॥ तदनेनवचनेनदोषस्यदिनावधिकतयातदूर्ध्वंदोषांगीकरणीयतामापद्यते अ-
न्यथास्नानमात्रेणशुद्धिरिति ननुमातरिगुर्विण्यांसत्यांप्राक्तनयस्यचौलादिकंयुज्यतेनवेतिसंदेहः शाकटायनः मासात्सप्तमतःपश्चाद्गर्भिण्यांमातरिष्यते ॥

नयनविवाहादिकंयुज्यतेनवेतिसंदेहः देवलः मातारजस्वलायत्रविवाहोपनयौशिशोः ॥ चौलेचवर्जतेनूनंनांदीश्राध्धात्परंभवेदिति ॥१०९॥ अत्रहिनांदी
श्राध्धात्परंभवेदित्युक्त्वासामानाधिकरण्येनप्रस्तुतंप्रक्रांतं तत्रविवाहेविवाहसमयेस्त्रीप्रक्षालयतिपुमानभिषिंचतीतिपादप्रक्षालनेविरोधापत्तिरितिचेन्न व्या-
सवचनेनानिर्वाहात् तथाहि पादप्रक्षालनंयत्रतद्वधूवरयोर्यदि ॥ मातानास्तिपिताकुर्यान्नशास्त्रंतुविहन्यतइति ॥११०॥ ननुपितुरधिकारोयुक्ततरः पित्राय-
दिद्वारलोपःतर्हिमातुःकथंसंगच्छतइतिचेद्ब्रूमः तदीयज्येष्ठादीनामधिकारविधानात् तर्हिमातुःकियानधिकारइतिचेत् प्रदानरूपजलमात्रस्यस्वीकारस्त्वविव-
क्षितं यदाहशाट्यायनिः विधवायादिनारीस्यात्कन्यादानंप्रतीयते ॥ पादप्रक्षालनादंयत्तज्येष्ठपुत्रःकरिष्यतीति ॥१११॥ तदेतद्वचनेनतस्याःप्रदानमात्राधि-
कारासिध्धौरजस्वलायांसूत्यामपिज्येष्ठपुत्राधिकारोविवक्षितः ननुकन्यायाःप्रदानेकथमत्रक्रमइतिविवक्षायांवृध्धयाज्ञवल्क्यआह पिताभायाचतत्पुत्र पितृ
भ्रातातत:परं ॥ दायादोमातुलःश्चैवपूर्वाभावेपरःपरइति ॥११२॥ मनुरपि पितुर्ज्येष्ठस्ययःपुत्रःपुत्रादायादएवच ॥ माताचमातुलोवापिकन्यादानेधिकारिण
इति ॥११३॥ एवंकन्यादानविषयेऽधिकारतस्यानिर्णीते उपनयनात्पूर्वदिनेमेघगर्जनेसतिकाचव्द्देशेउपनयनंत्यजातितदेतद्युज्यतेनवेतिसंदेहः वासिष्ठः पूर्वास्मि
न्दिवसेयत्रवारिदःपरिगर्जति ॥ उद्दतीतिःपरित्याज्यानांदीश्राध्धेकृतेभवेदिति ॥११४॥ तथाचनांदीश्राध्धलक्षणेनपूर्वेद्युरुपनयनांगतयाग्रहहोमोविवक्षितः
एतदुक्तंरह्लेन नांदीश्राध्धंप्रकर्तव्यंभवेद्वारिदगर्जनं ॥ यदिजातंचपूर्वेद्युस्ततोदोषोनाविद्यतइति ॥११५॥ विस्तरोहेमाद्रौद्रष्टव्यः आनंदगिरिणाप्रोक्तेस्मृति-
सारसमुच्चये ॥ पूर्णस्तृतीयउल्लासोनित्यकांडेशुभावहः ॥११६॥ इतिश्रीआनंदगिरिस्वामिकृतेस्मृतिसारसमुच्चयेनित्यांकडेतृतीयउल्लसः ॥॥ ॥॥ ॥॥ ॥॥

भानवेतेनमस्तुभ्यंलोकसंरक्षणायच ॥ यत्रीमयायजगतांकारणायनमोनमः ॥ सर्वेषामेवकेमर्णांगमाधानपूर्वकव्यवहारज्ञातशीस्त्रदृष्टतयातन्मूलऋतुदर्शन
कालव्यवस्थाचिंत्यते कात्यायनः ऋतुदर्शनकालश्चेद्रात्रिकालव्यवस्थितौ पूर्वापरादिनंयत्रसंदेहेनिर्णयःकथं अर्धरात्रात्पूर्वदिनंतस्मादूर्ध्वंपरदिनंइतिव्यवस्था
विशेयाऋतुदर्शनतस्थितावीति शाट्यायनिः रात्रित्रिधाविभज्यैवव्यवस्थांपरिकल्पयेत् ॥ भागद्वयेपूर्वदिनंतदूर्ध्वंतुपरंदिनमिति ॥ २ तत्रह्युभयोर्वचनयोर्वि-
रोधापत्तिः भागद्वयंभागत्रयमितिव्यवहारात् तथासतिकिंनिश्चितमितिचेन्न अर्धरात्रस्यसंमतत्वात् यदाहहारितः त्रिभागकल्पनायत्रमहाराष्ट्रेषुदृश्यते ॥
प्रागर्धरात्रमेतद्धि सर्वविप्रेषुसंमतमिति ॥ ३ ॥तथाहितदनेनवचनेनाविरोधपरिहारसिद्धौअर्धरात्रात्परंपरादिनंग्राह्यमितिवस्तुगतिः ननुऋतुदर्शत्वेतंजननेक-
थमितिचेत्ब्रूमः भरद्वाजः अर्धरात्रात्पूर्वदिनंजननोपिरजस्यपि ॥ मरणेपियथायोगंसमानन्यायऊह्यतामिति ॥ ४ ॥ कश्यपोपि जननेमरणेचैवरजोदर्शनएव
च ॥ अर्धरात्रात्परस्ताच्चेत्परंदिनमिहेष्यतइति ॥ ५ ॥ तदेताभ्यांवचनाभ्यांरजसीयंव्यवस्थाकल्पिता सैवसर्वत्रानियतेतिध्येयं ननुवनितानांकंठसूत्रंशा-
स्त्रविहितं ब्राह्मणस्ययज्ञोपवीतंयथातथाकर्माधिकारविहितत्वात् किमस्यरजोदोषोस्तिनेतिविवक्षायांगौतमआह ब्रह्मसूत्रवदेतद्धि कंठसूत्रंविनिश्चितं ॥
आर्तवाद्वाजननतःसूतकंनमृतेनमिति ॥ ६ ॥ देवलः मंत्रपूर्वमिदंधार्यंनारीभिःकंठसूत्रकं ॥ तत्पवित्रमितिप्रोक्तंत्रयीमयमिदंयतइति ॥ ७ ॥ ननुकंठसूत्र
स्यमंत्रपूर्वधारणमुक्तंकिमस्यवैदिकउतपुराणादिश्रुतइतिविवक्षायांमत्रोभारतेशांतिपर्वणिप्रतीतः त्रयीमयनमस्तुभ्यंकंठसूत्रनमोस्तुते ॥ सर्वयज्ञस्वरूपायस-
वित्रेभवतेनमइति ॥ ८ ॥ तत्रैवधारणंसस्यगेवोपपादितं धृत्वाकरेकंठसूत्रंदर्शयित्वारवेरपि ॥ धारयेन्नित्यतंयस्मान्नित्यमेवाविधियतइति ॥ ९ ॥ विस्तरः
स्मृतिचंद्रिकायांद्रष्टव्यः अधुनास्रावपातयोराधिकृत्यमातुःसूतकविषयेविचार्यते लौगाक्षिः स्रावेत्रिदिनमाशौचंपातेसप्तदिनंभवेत् ॥ स्रावश्चतुर्थमासांतस्त
दूर्ध्वंपातईर्यते ॥ १० ॥ भरद्वाजः मातुरेवत्वघंप्रोक्तंस्रावपातान्नसंशयः ॥ प्रसूत्यासर्वबंधूनांसूतकंचेतदिष्यतइति ॥ ११ ॥ अत्रहिसर्वबंधूनांसूतकमिष्यत
इत्युक्त्यासूतकप्रवृत्तौसपिंडादिनिर्णयोव्याख्यायते स्मृतिदर्पणे आसप्तमादेककुलोद्भवानां सपिंडसंज्ञाभवतिद्विजानां चतुर्दशात्सोदकसंज्ञतास्युः सगोत्र
जास्तत्परमेकविंशादिति ॥ १२ ॥ तदेतेनवचनेनसपिंडादिलक्षणविधौसूतकंप्रवृत्तिरेवंविज्ञेया यदाहस्मृतिरत्नाकरः सापिंड्यंयत्रजातंजननमृतिविधौयद्द
शाहेनशुद्धं सोदकंयत्रजातंत्रिदिनमिहभवेत्सूतकंवामृतिर्वा ॥ सागोत्र्यंयत्रकीर्त्यंभवतितदुपरिस्नानमात्रेणशुद्धिरुक्तंशास्त्रयदुक्तंभवतिचजगतिख्यापि-

स्रावोमासद्वयादूर्ध्वंऋतुमत्याविधीयते ॥ चतुर्मासावधितथामातुरेषाद्यमिष्यतइति ॥ १८ ॥ कात्यायनोपिः मातुरेवाद्यमुद्दिष्टंस्रावोमासद्वयात्परं ॥ चतुर्मासावधिःसोयंशास्त्रमेवंविनिश्चितमिति ॥१९॥ ननुमातुरेवाद्यमुद्दिष्टमित्युक्तं शुक्लशोणितसंयोगेनगर्भस्रावेपितुरप्यधिकारोस्तीतिचेन्न सूतकविषयेमातुरेव विहितत्वात् ॥ अन्यथारजोदर्शनेपिभर्तुरद्यापत्तेः वृद्धयाज्ञवल्क्यः रजोदोषस्तथास्रावःमातुरेवविधीयते ॥ नभर्तुर्गर्भस्रावेनजननेसूतकंभवेदिति ॥ २० ॥ मांडव्यः गर्भस्रावेसूतकंस्यान्मातुरेवविनिश्चितं ॥ गर्भधारणमेतद्धिमातुर्यस्माद्विशिष्यतइति ॥ २१ ॥ नन्वेतदद्यंमातुःकियद्दिनावधिभवतीत्यपेक्षायां कांक्षितत्वआह स्रावेतुत्रिदिनंप्रोक्तंसूतकंमातुरेवहि ॥ तदूर्ध्वंपंचगव्येनशुद्धिःतस्याविशिष्यतइति ॥ २२ ॥ व्यासोपि स्रावेतुत्रिदिना-दूर्ध्वंपंचगव्येनशुध्यति ॥ अर्हत्येवततोनूनंदैवेपित्र्येचकर्मणीति ॥ २३॥ ननुपंचगव्येनशुद्ध्यतीत्युक्तंपंचगव्यविधानंकीदृशमित्यपेक्षायांशौनकआह गायत्र्यादायगोमूत्रंगंधद्वारेतिगोमयं ॥ आप्यायस्वेतिचक्षीरंदधिक्राव्णेतिवैदधि ॥ २४ ॥ ॐ आ[illegible]यमनुमामादिति ॥ २५ ॥ननु[illegible]नानां स्रावेसतिस्नात्वाएकाहाशुद्धिंव्रजनीति स्नात्वास्रावेथशुद्धास्यादेकाहाद्धानितायतः ॥ दैवेपित्र्येचकर्मणिचयोग्यत्वंसासमर्हतीति ॥ २६ ॥ तत्कथं[illegible]सूतकग्रहणमितिचेन्न तस्यमहाराष्ट्रसौराष्ट्रविषयत्वात् यदुक्तंस्मृतिरत्नाकरे सौराष्ट्रेचमहाराष्ट्रेएकाहाशुद्धिरिष्यते ॥ आंध्रद्राविडकर्नाटास्त्र्यहंसूतकिनस्मृता

इति ॥ २७ ॥ श्लोप्याह गोराष्ट्रद्राविडश्चैवआंध्रश्चैववनिताजनः ॥ त्र्यहंसूतकिनोभूत्वास्रावेशुद्धिंव्रजंतिहीति ॥ २८ ॥ विस्तरोभट्टभास्करीयेद्रष्टव्यः स्रावानंतरंक्रमप्राप्तत्वात्पातोनिरूप्यते विष्णुवृद्धः आपंचमंसमाश्रित्यत्वासप्तममिदंस्मृतं ॥ पाताख्यंगर्भपातोयंतन्मातुरघमीर्यतइति ॥ २९ ॥ आपस्तंबः पातःपंचमतःपश्चान्मासादासप्तमंस्मृतं ॥ स्याद्ध[illegible]प्रतीयतइति ॥ अ[illegible]प्रतीयत[illegible]मासादूर्ध्वमर्धमासो [illegible] आंध्रद्राविडदेशेषु[illegible]मर्ह्यते ॥ पाते[illegible]तन्मातु[illegible]इति ॥ ३० ॥ ननुपातेपिमातु[illegible]गर्भ [illegible]अधिकारादितिचेन्न [illegible] जन [illegible] ॥ [illegible] ॥ ३१ ॥ मांडव्यः [illegible] ॥ ३२ ॥ ननुमातु[illegible]पेक्षायांअत्रिराह [illegible]सूतकमीर्यते ॥ ननु[illegible] ॥ ३३ ॥ [illegible]सूतकंमातुरीर्यते ॥ त्रिदिनसूतकं[illegible]इति ॥ ३४ [illegible] [illegible] ॥ अधीतिदिनमेतद्धिब्राह्मणेषानगद्यतइति ॥३५ ॥

णोनिर्णीतेतमेवसमाधिकृत्यस्वकीयपरकीयताविचार्यते देवलः पितामहश्चतत्पुत्रस्तत्पौत्रःपत्न्ययस्तथा ॥ एतेस्वकीयविज्ञेयाभ्रातृपत्न्यस्तथापरइति ॥४१॥
परेभ्रातरइत्यर्थः वृद्धवासिष्ठः पितापितामहोभ्रातापितृव्यस्तत्सुतःसुतः ॥ पौत्राश्चपत्नयस्तेषांस्वकीयाःपरिकीर्तिताइति ॥४२॥ तदेताभ्यांवचनाभ्यांस्वकी-
यताज्ञानसंभवेसापिंड्यंविज्ञेयमितिसापिंड्यलक्षणमुच्यते हारीतः सापिंड्यंसाप्तपुरुषंकूटस्थादभिगीयते ॥ दशाहंसूतकंतेषामन्येषांत्रिदिनंभवेदिति ॥४३॥
गार्ग्योपि साधिंड्यंयत्रनिर्दिष्टंदशाहंसूतकास्थितिः ॥ आसप्तमंभवेताद्धिकूटस्थस्याविधानतः ॥४४॥ अन्येषांत्रिदिनंभवेदित्युक्त्यासोदकत्वंनिर्दिश्यते लोमशः
सप्तमात्पुरुषादूर्ध्वंचतुर्दशसुकीर्त्यते ॥ सोदकत्वयतस्तेषांत्रिदिनंसूतकास्थितीरिति ॥४५॥ सूतकशब्दःमृतजातोपलक्षकः ननुसोदकादूर्ध्वंसगोत्रत्वंयावादिति
शंकायांभरद्वाजआह आचतुर्दशमासाद्ययावत्स्यादेकाविंशति ॥ सगोत्रजत्वंतावाद्धिस्नानाच्छुद्धिःप्रकीर्त्यतइति॥ ४६ ॥ ननुस्वकीयपरकीययोःकीदृशीआशौ
चस्थितिरितिविवक्षायांवासिष्ठआह स्वकीयाशौचमध्येतुपरकीयोयदापतेत् ॥ स्वकीयेनैवशुद्धिःस्यात्परकीयेननकचिदिति॥ ४७ ॥ एतावताशास्त्रेणकिंविदि
तमासीदितिविवक्षायांकूटस्थादिलक्षणसिद्धिरितिसंतोष्टव्यमायुष्मता यदत्रप्रयोजनवत्तयाकूटस्थादिलक्षणसिद्धौप्रसूतिकामृ तिर्दुर्मृतिर्नवेतिचिंत्यते वृद्धगा
र्ग्यः प्रसूयांम्रियेतयातुसूतकेसमुपस्थिते ॥ नायंमृतिर्दुर्मृतिःस्यात्संस्कारेणाविशुद्ध्यतीति ॥४८॥ वृद्धयाज्ञवल्क्यः सूतिका पिमृतिरियंदुर्मृतिर्नभवेद्ध्रुवं ॥
संस्कारेणविशुद्धायांकर्मकर्तुमिहार्हतीति ॥४९॥ ननुप्रसूतिकाःकर्मणिकर्तव्येकिमियंबाधकतापत्तिरितिचेन्न विशुध्यनंगीकारेणतत्संभवात् तर्हिकथमियं
शुध्यतीतिचेद्ब्रूमः पैठीनसिः गायत्र्याकूर्चविन्यासेघटेसप्तजलेशुभे ॥ स्नापयित्वाततःकर्मकुर्वीतसुविचक्षणइति ॥५०॥ गालवोपि गायत्रीमंत्रशुद्धेनघ
टेनादायतज्जलं ॥ शतवारंस्नापयित्वाशुद्धैवस्यात्प्रसूतिकेति ॥५१॥ पूर्वंकाचिच्छतशूर्पस्नानमुक्तं तदेतस्याविरोधइतिचेन्न तस्यकण्वमाध्यंदिनविषयत्वात्
अब्लिस्यापितत्वापत्तेश्च यदाहापस्तंबः शतशूर्पजलस्नानंप्रसूत्यायदुदाहृतं ॥ काण्वमाध्यंदिनानांस्याच्छताब्लिगैर्यथाविधीति ॥५२॥ ननुप्रसूतिकैवोद्बंध-
नादिनासर्पदंशेनवामृतातर्हितस्याःतत्कालसंस्कारोस्तीति तस्यदुर्मृतित्वात् तथाहिमांडव्यः प्रसूतिकैवोद्बंधनाद्यैःसर्पदंशेनवामृता ॥ त्रिपक्षकोर्ध्वंकुर्वीतत
स्याःकर्मयथाविधीति ॥५३॥ ननुत्रिपक्षकोर्ध्वंकुर्वीतेत्युक्तंतत्कालेकाष्ठवद्दहनेनतस्याःकथंकर्मकार्यइतिचेद्ब्रूमः लौगाक्षिः बुद्धिपूर्वंमृतासाचेच्छावासंस्कारमर्ह
ति ॥ अबुद्धिपूर्वंम्रियतेह्यस्तिसंस्कारमर्हति ॥५४॥ नन्वस्थिसंस्कारतमशुचिरित्युक्तंतदस्थिसंस्कारः कदाकार्यइत्यपेक्षायांदशाहात्पूर्वंकार्यमितिविवेकः

यदाहशाट्यायनिः दशाहात्पूर्वतःकार्योह्यस्थिसंस्कारएववतु ॥ अबुद्धिपूर्वंम्रियतेसर्पदंशादिनासतीति ननुदुर्मृतेसत्यांतथाविधायांबंधूनाकथमाशौचमितिचेत्
ब्रूमः बंधवेयोस्वकोयास्युर्दशाहसूतकंभवेत् ॥ तदूर्ध्वमपिनोशुद्धियावत्कर्मसमापनमिति ॥५५॥ अत्रोहविषेशाविधेर्वक्तव्यत्वेस्छानांतरप्रयोजनमितितदेतावतावि
रम्यते यदत्रप्रसूतिकामृतिर्विषयेनिर्णयोभिहितः ततएवरजस्वलामृतिविषयेतत्कालेकर्मयोग्यतास्तिनोतिचिंत्यते कात्यायनः रजस्वलाभवेन्नारीमृताकेनापिहेतुना
॥ तत्कालेकर्मयोग्यत्वमस्तिनेत्यत्रसंशयः ॥५६॥ कृत्वाघटोदकस्नानंवारुणेनचमंत्रतः ॥ अभिमंत्र्यभवेत्शुद्धिस्ततःकर्मणियोग्यतेति ॥५७॥ वारुणेनचमंत्रतइत्यत्र-
शतवारंवरुणमंत्रेणाभिमंत्रयेदित्यर्थः अत्रेयमाशंकावरुणमंत्रोयंस्त्रियादिपरइति एतदाहशाट्यायनिः सूर्योदेवोतिमंत्रेणशतवारंघटादेकं ॥ स्नापयेदभिमंत्र्येनां
शुचिर्भवतिसूतकीति केचिदाहुः आपावमानमंत्रेणमंत्रितंतद्घटोदकं ॥ गृहीत्वात्वभिषिंचेत्सूतिकासाशुचिर्मतेति ॥५८॥ किमत्रनिदानमितिचेत्ब्रूमः तदेतत्स
र्वमतांतराविषयमिति यदाहविष्णुवृद्धः ॥ मंत्रेणानेनाभिषिंचेदिदंविष्णुर्विचक्रमे ॥ सूतकीसाशुचिर्नारीकर्मण्यस्याः प्रसिद्धिरिति ॥५९॥ गार्ग्योप्याह इदंविष्णु
रितिप्रोक्तासूतिकामभिषिंचति ॥ रजस्वलांतलोनारीकर्मयोग्याभविष्यतीति॥६०॥अत्रापिशतशूर्पस्नानंकेषांचिन्मतं तादृशैरनादरणीयं यदाहशाकटायनःशतशू
र्पजलस्नानंस्त्रीवयादिषुसंमतं॥ विप्रेषुवैष्णवोमंत्रःसूतकींपावयिष्यतीति ॥ ६१ ॥ ननुएतावतासंस्कारेणाकर्मार्थमयशुद्धिरुदीर्यतइतिचेन्न अन्यथादुर्मृतिसामान्यात्
यदाहगालवः रजस्वलामृतिःसेयंदुर्मृतिर्नभविष्यति ॥ अभिमंत्रितंदेहंशास्त्रवद्दहनंबुधइति ॥ ६२ ॥अत्रापितद्बंधनादिनामृतिःसंभवतितदानींदुर्मृतिरेवेतिविभाव
नियं तत्रचसंस्काराभावेसतिकाष्ठवद्दहनमिष्यतेनान्यथाशाखासंस्कारोवातद॥स्थिसंस्कारोवास्यात्बंधूनासूतकतूक्तमेवयदाहवृद्धयाज्ञवल्क्यः काष्ठवद्दहनेजातेया
वत्संस्कारतास्थितिः स्वकीयेष्वर्थविज्ञेयमाशौचंतावदप्यलमितिमरीचिः स्वकीयानामघंसर्वंपरकीयेषुनीयते ॥ दशाहांतरमेताध्दिततःकर्मणिवेष्यतइति ॥६३॥
विस्तरोहेमाद्रौद्रष्टव्यः अधुनादुर्मृतिमधिकृत्यव्यवहारविषयोविचार्यते उद्बंधनेनाम्रियतेजलेवाम्रियतेयदि म्रियतेसर्पदंशेनदुर्मृतिपरिकथ्यतइति ॥६४॥ व्यासः
व्याघ्रपादादितोयस्तुयुध्देवानिधनंगतः ॥ राजाज्ञायाचनिहतोदुर्मृतोयंप्रकथ्यतइति ६५ जाबालिः शृंगिणादंष्ट्रिणावाथबंधनेनापियोमृतः ॥ जलाद्यैर्म्रियतेयोथदुर्मृतः
सोपिकथ्यतइति॥६६॥ननुदुर्मृतस्याक्रियाधिकारंकथमितिचेत्ब्रूमः हारीतः तत्कालेनवकर्मास्तिदुर्मृतानांयथाविधि ॥ दशाहादूर्ध्वमेतेषांक्रियाकार्यानसंशयइति
६९। नन्वरन्यादिमृतौशवस्यमृतिसंदेहदहनंयुज्यतेनवेतिसंदेहः शाट्यायनिः शवस्यमृतिसंदेहयोवाकोवाभवेदिति ॥ नतस्यदहनकार्यंशास्त्रेमतद्विनिश्चितमिति।७०।

नसूतकंभवेत् ॥ त्रिदिनंसूतकंयेषामेकाहाच्छुद्धिरिष्यतइति ॥७५॥ एतावताशाक्षेपाकोयमत्रसिद्धांतइतिविवक्षायांदुर्मृतानांशाखासंस्काराविशेषावाध
रार्तीविवेकोद्रष्टव्यः प्रागत्रस्रावपातयोर्निवृत्तयोर्बालसूतकविषयेविचार्यते मनु जातेमृतेमृतेजातेसपिंडानांदशाहकं ॥ त्रिदिनंसोदकानंस्यादितिशास्त्र-
स्यानिश्चयइति ॥७६॥ अत्रविशेषमाहजाबालिः नालइछेदनागर्वांदाशौचंकुरुतेद्विजः ॥ छिन्नेनालेततः पश्चात्सूतकंतुविधायतइति ॥७७॥ तदयमर्थः का-
लेयनवमेमासिमृतएवजातः तदाबंधूनांदशरात्रंजातत्युक्तमेवतत्रादिजननंजातः नालछेदनात्पूर्वंयदिम्रियतेतदाबंधूनांसूतकाभावाः नालछेदनेजातेसतिय-
दिम्रियतेतदाबंधूनांसूतकमुक्तरीत्याग्राह्यं ननुसूतकशब्दोयोगोवारूढोवायोगत्वेसूतेजननामांतत्युत्पात्तिसिद्धः रूढत्वेप्रसूतिमात्रोपपत्तेश्चेतिचेन्न रूढस्यैवावि
वक्षितत्वात्तथाहिजातसूतकमिदंमृतिसूतकव्यवहारसंभवानियोगत्वेपिनदोषःसूतंजननंसूतंमृतिरितितदुत्पत्तेःतस्मादुभयथापिसूतकशब्दःसंभवतीतिकेचिदा
हुःसूरूपलक्षणमितितत्रउभयथापिशब्दव्यवहारस्यैवसिद्धत्वात् एतदाहगार्ग्यः बोधयसूतकशब्दोयंरूढ्यायोगेनानिर्वृतः ॥ जातकेमृतकेवापिरजस्यपितथाबुधैर [१५]
ति॥७८॥ननुशिशोर्मृतसूतकंमातापित्रोरेवयुक्तंकिमितरेषांबंधूनामितिचेन्न याज्ञवल्क्यवचनेननिरस्तात् दशाहदुत्तरसूत्याबंधूनांसूतकंनाहि ॥मातापित्रोर्भवेन्नू
नदशरात्रंतादप्यतइति॥ ७९ ॥ केचिदाहु पुंसप्रसवेबंधूनासूतकमितरथानेतितदसंगतमेवकाण्वमाध्यंदिनविषयत्वात् स्वजात्युक्ताशौचनंसर्ववर्णसमानंतथाहि

पैठीनसि काण्वमाध्यंदिनानांचेत्पुंस्प्रसूतौतुसूतकं ॥ कन्यायाःप्रसवेनास्तिद्राविडानांतुविद्यतइति ॥८० ॥ ननुसवर्णसमानमित्युक्तं यदनेनाकिमापन्नमितिचेत्ब्रू
मःयज्जातेविषयमंगीकृत्ययदभिहितंनिषेधस्वरूपंतादितरेषामपवादकृद्भवतीति यदाहकात्यायनः एकजातिनिषिद्धत्वेसर्वजातिसमानता ॥ इतरेषांभवेन्नूनं
कात्यायनवचोयथेति ॥८१॥ विस्तरःस्मृतितरंगिण्याद्रष्टव्यः बालसूतकमाधिकृत्यवपुनर्विशेषोवगम्यतेगौतमः आदंतजननात्सद्यआचूडात्त्रैशिकीस्मृता ॥ त्रि
रात्रमुपनयतस्ततऊर्ध्वंदशाहकमिति ॥८२॥ सर्वविभक्तिकस्तसिःउपनयतः उपनयनपर्यंतमित्यर्थः आदंतजननादित्येतदुपलक्षणं [illegible]
तियदाहवृद्धगार्ग्य एकवत्सरजातस्याशिशोःसूतकमिष्यते ॥ बंधूनांस्नानमात्रेण [illegible] ॥ ८३॥ [illegible]
प्यसंकृतेपोत्यर्थः तेनतृतीयवत्सरगा[illegible] [illegible]
[illegible] ॥ ८४ ॥
[illegible] ॥ ८५ ॥ [illegible]
[illegible] ॥ ८६ ॥
[illegible] पैठीनसिःमातापित्रोःसूत[illegible] ॥ [illegible]

यद्युक्तंतदेतोपिविनिश्चयादिति ॥ ९२ ॥ विस्तरोभट्टभास्करीयेद्रष्टव्यः आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये ॥ पूर्णश्चतुर्थउल्लासोनित्यकांडेशुभावहः ॥ ९४ ॥ इतिश्रीआनंदगिरिस्वामिकृतेस्मृतिसारसमुच्चयेनित्यकांडेचतुर्थउल्लासः ॥

गुरवेसर्वलोकानांवटमूलनिवासिने ॥ भव्यायजगतांनित्यंदाक्षिणामूर्तयेनमः ॥१ ॥ यदत्राशौचविधौजननिमित्ताशौचंमृतिविषयंचविचारितं तेनक्र
मप्राप्ततयाउपनीतबटुविषयेतदधंविचार्यते जाबालिः मातापित्रोस्तुमरणंव्रतमध्येयदापतेत् ॥ वटुसर्वंस्थापयित्वावन्हिनत्वाबहिर्व्रजेदिति ॥ २ ॥ ननुस
र्वंवन्हिसन्निधौस्थापयित्वेत्युदाहृतं यज्ञोपवीतंकिंकार्यमित्याशंक्यलोगाक्षिराह यज्ञोपवीतंनामुंचन्वान्हिसंनिधिमेत्यच ॥ दशाहादुत्तरंपूर्वंव्रतमेवसमाचरेदि
ति ॥ ३ ॥ तदनेनवचनेनवन्हिसंरक्षणेजातेपुनःपूर्ववस्त्रादिधारणंनित्यतयासमापन्नं तत्रप्रायश्चित्तविधिरस्तिवानवेत्याशंकायांवृद्धयाज्ञवल्क्यआह मंत्रेणा
नेनजुहुयादग्निंदूतंवृणीमहे ॥ समिदाज्यचरून्हुत्वाव्रतशेषंसमापयेदिति ॥ ४ ॥ ननुवटोर्मातापितृमरणेज्येष्ठाद्यभावेतस्यकर्माधिकारोस्तिनेतिचिंत्यते वृद्ध
वसिष्ठः ज्येष्ठाद्यभावेकुर्वीतमातापित्रोःक्रियांततः ॥ यज्ञोपवीतविधृतमधिकारस्ततोभवेत् ज्येष्ठादिसत्वेकथमितिचेत्ब्रूमः ॥ ५ ॥ देवलः अधिकारोनचा-
स्तस्यमुख्यत्वेपितृकर्मणः ज्येष्ठादीनांभवेद्देतत्क्षौरमेतत्समाचरेदिति ॥ ६ ॥ पैठीनसि प्रायश्चित्तंततःकृत्वावन्हौतत्रयथाविधि ॥ तदादंडादिकंधार्यंपू
र्ववन्नात्रसंशयोति ॥७॥ ननुतस्यैववटोर्मरणेकिंविधानमितिविवक्षायांवृद्धमनुः चतुर्दिनांतरालेतुबटुःप्रम्रियतेयदि ॥ दंडादिकंजलेक्षिप्त्वावन्हिनातेनदाह
येदिति ॥ ७ ॥ स्त्रुःप्रायश्चित्तमाह अग्निर्मूर्धेतिमंत्रेणवन्हौहोमंविधायच ॥ तेनैववन्हिनानूनंबटोर्दाहोविशिष्यतइति ॥ ८ ॥ ननूपनीतस्यवटोरेवमृतौजा
तायांतस्यकर्मकर्तुमधिकारोस्तिनेतिविवक्षायांकात्यायनआह यज्ञोपवीतंविधृतंमंत्रपूर्वंयतोद्विजः ॥ कर्माधिकारोभवतिततस्तस्यैवनिश्चयइति ॥ ९ ॥ मां
डव्योपि उपनीतबटोर्नूनंव्रतमध्येयदामृतिः कर्माधिकारोबंधूनांसूतकंभवतिध्रुवमिति ॥ १० ॥ तदनेनवचनेनबटोर्व्रतमध्येयदिमरणंतदाबंधूनांदशरात्रंसूत
कंकर्माधिकारोस्त्येवेतिनिर्वाहः स्मृतिचिंतामणौ वटुर्मृतोयस्तुचतुर्दिनेभ्यस्तत्कर्मकुर्याद्दशवासरांतः ॥ तत्सूतकंतत्रसपिंडनंवायुक्तंयदेतत्किलशास्त्रसिद्ध
मिति ॥ ११ ॥ विस्तरोनिर्णयामृतेबोध्यः उपनयनप्रकरणादुत्तरांविवाहप्रकरणंसंगत्यापन्नमितिवरविषयेसूतकंविचार्यते आश्वलायनः वरस्यमातापितरौ
प्रमीतौचेत्कथंविधिः ॥ तदाविवाहकृत्सर्वंमंगलंतुपरित्यजेत् ॥ १२ ॥ लोगाक्षिः त्रयोदशादिनेगत्वापुनर्धृत्वायथाविधि ॥ प्रायश्चित्तंप्रकुर्वीतपावमान्या
शतत्रयमिति ॥ १३ ॥ पावमान्यास्वादिष्ठयेतिपावमानर्चैत्यर्थः यदाहगालवः स्वादिष्ठयेतिमंत्रेणवरोमंगलवस्त्रकं ॥ धृत्वाप्रायश्चित्तमत्रकुर्वीतैवनसंशयइति
॥ १४ ॥ ननुवरस्यैवयदिसाक्षान्मरणंतस्यकोविधिरितिविवक्षायांजाबालिराह वरस्यैवमृतिर्जाताहुत्वाग्नेयंबकेणतु ॥ शास्त्रवद्दहनंकृत्वातत्कर्माचरणंचरे

[illegible] तथाहिबादरायणः विवाहव्रतमध्येतुवरस्यैवयदामृतिः ॥ पुनर्विवाहंकुर्वीरन्क्षत्रिया
यानसंशयइति ॥ २३ ॥ त्रिकांडमंडनोपि क्षत्रियाणांविधिःप्रोक्तोपुनर्वैवाहिकोविधिः ॥ ब्राह्मणायदिकुर्वीरन्पतितास्तेनसंशयइति ॥ २४ ॥ ननुतत्रैवक-
कस्याश्चिद्भर्तुसहगमनबुद्धिर्जातायांयुज्यतेनवेतिविचारःशांडिल्यःभर्तुःसंगमनेबुद्धिर्विवाहेतुमृतेसति ॥ भर्तर्येवाधिकारोस्तितत्कालेनात्रसंशयइति ॥ २५ ॥
कात्यायनोपि विवाहव्रतमध्येतुमृतेभर्तरियासति ॥ कुर्यात्सहैवगमनंसास्वर्गयात्यसंशयइति ॥ २६ ॥ विस्तरोदिनकरेग्रंथेद्रष्टव्यः गर्भिणीमृतिविषयेवि-
चार्यतेलौगाक्षिः ॥ गर्भिणीम्रियतेयत्रशिशुहत्यासमापतेत् ॥ २७ ॥ दहनेसतिकर्तव्यंकिमत्रेत्येवसंशयइति उदरंतुविदार्यैवशिशुमन्यत्रभूतले ॥ खनेद्दहेदि
दंशास्त्रंयथावद्भवतिध्रुवमिति ॥ २८ ॥ ननुयदिखननेयोगोनजातस्तर्हिकोयंव्यवहारइत्याशंकायांशाट्यायनिराह कांस्यपात्रेणसहितांगर्भिणींपरिदाहयेत् ॥
आतिछंतीतिमंत्रेणगोक्षीरंस्त्रावयेत्ततइति ॥ २९ ॥ नान्वयदुर्मृतिर्नवेतिविवक्षायांगोभिलआह दुर्मृतिर्नभवेदेषाशास्त्रोक्तस्याविधानतः ॥ तत्कालेकर्मकर्तॄ-
व्यपुत्राद्यैर्नैवसंशयइति ॥ ३० ॥ [illegible] यागर्भिणीतुम्रियतेदशाहेनारायणस्यैवबलिंविदध्यात् ॥ नचेदियंभूतपत्तेर्नियोगा [१७]
[illegible] ॥ ३१ ॥ [illegible] नारायणबलिंकुर्याद्गर्भिणीम्रियतेयदि ॥ [illegible] ॥ ३२ ॥ ननुगर्भिणी

मात्रस्यनारायणबलिरुतप्रसूतिकारजस्वलयोर्मृतौचतदस्तीतितिचिंत्यतेनिर्णयामृते उद्बंधनादिमरणेसर्पदंशहतौयथा ॥ नारायणबलिःकार्यःपैशाचस्याविवृत्तय
इति ॥ ३३ ॥ संवर्तः शृंगिदंष्ट्रादिभिर्वापियुद्धेशस्त्रादिभिस्तथा ॥ जलाद्यैर्म्रियतेयत्रनारायणबलिःस्मृतइति ॥ तदेतैर्वचनैर्दुर्मृतौसर्वत्रतसाम्योपिनारायाण
बलिः कर्तव्यइतिविवेकः अन्यथाकरणेकोयंपरिपाकइतिविवक्षायांकात्यायनआह नारायणबलिर्नास्तिदुर्मृतौसतियोभवेत् ॥ पैशाचयोनिसंप्राप्तोबधूनामेव
[illegible] ॥ ३४ ॥ [illegible] ॥ दुर्मृतौसतिबंधूनाबाधक
[illegible] ॥ ३५ ॥ [illegible] ॥ दुर्मृतानांसवर्णां-
[illegible] ॥ ३६ ॥ [illegible] यद्यगर्भिणीसंस्कारांतरेतद्भर्तुर्यदाकर्ममंत्रग्रहणे मातुःपितुर्वाप्रसूता-
याभार्यायांकर्मकथंसंभवतीतिचिंत्यते वृद्धयाज्ञवल्क्यः कृतेतुमंत्रग्रहणेवनिताचेत्प्रसूयते ॥ मातुःपितुर्वातत्कर्मकथंसिध्यतिसंशयः ॥ ३७ ॥ एको
दिष्टावसानस्यात्कर्मसर्वंयथाविधि ॥ सपिंडीकरणंतत्रसूतकांतेभविष्यतीति ॥ ३८ ॥ वृद्धमनुरपि सूतकांतेतुकर्तव्यंभार्याचेत्तुप्रसूयते ॥ सपिंडीकरणंन्यू
नंतत्कालेनास्तिसंशयइति ॥ ३९ ॥ स्मृतिदर्पणे आशौचमध्येयदिशावकर्तुःप्रेतस्यभार्यायादिवाप्रसूता ॥ तत्कर्मणोनैवयथोक्तकालेततत्सूतकांतेचसापिंडनं
स्यादिति ॥ ४० ॥ यदेभिर्वचनैःसपिंडीकरणस्यपत्नीसूतकांतरा [illegible]

घुत्वंसंभाविष्यतीति ॥४५ ॥ गार्ग्योपि मातापितृमृतौनूनंसूतकेमंत्रपूर्वकं ॥ दहनादिप्रकर्तव्यंसुतकंतत्रविद्यतइति ॥ ४६ ॥ ननुजातसूतकमध्येमंत्रगृही
मीतापितृमृतौकिंसूतकंसपिंडैर्ग्राह्यमितिविवक्षायांनिर्णयामृते ॥ शावसूतेगुरुत्वेनसपिंडैर्गृह्यतेतरां मंत्रस्यग्रहणेनूनंभार्याचोद्धिप्रसूयतइति ॥ ४७ ॥ विस्तारो
हेमाद्रौद्रष्टव्यः अधुनापितृमातृमरणंपुत्रस्यदेशांतरास्थितेकिंथामितिचिंत्यतेमरीचिः पितामृतोथवामातापुत्रादेशांतरास्थितः ॥ संस्कारेकोयमत्रास्यादधिकारी-
तिसंशयः ॥ ४८ ॥ ज्येष्ठोवाथकनिष्ठोवायोवागेहेव्यवस्थितः॥ सएवात्राधिकारीस्यात्कर्मणोन्योनविद्यतइति ॥४९॥ ननुज्येष्ठदेशांतरस्थेकथामितिविवक्षायांब्रू-
मः कनिष्ठेनैवसंस्कारःकर्तव्योनात्रसंशयः ॥ दशाहाभ्यंतरेप्राप्तेज्येष्ठेतस्यैवानिर्दिशेदिति ॥ ४० ॥ मांडव्यः कनिष्ठेनकृतंकर्मज्येष्ठस्तत्रगृहीष्यति ॥ पवित्रे
णसमंवस्त्रंशेषकर्मकरोत्यसाविति ॥ ५१ ॥ अत्रहिविशेषकर्मकरोत्यसावित्युक्तेनायमर्थःपर्यवसितोभवति नास्थिसंस्कारोविवक्षितःशतांजलिमात्रंविवक्षित
मितियदाहपैठीनसिःशतांजलिप्रकुरुतेपवित्रेणसमंस्वयं ॥ शेषकर्मप्रकुरुतेज्येष्ठभ्रातानसंशयइति ॥ ५२ ॥ ननुकनिष्ठोयादिदेशांतरस्थस्तस्यकोयंव्यवहारइ-
त अत्रब्रूमः शातातपः कनिष्ठोवपनंकृत्वासमागत्यस्वकंगृहं ॥ भ्रातातिलांजलिंदत्वास्वयंस्नात्वाविशुध्यतीति ॥ ५४ ॥ नन्विदंदशाहाभ्यंतरविषयं तदुत्तीर्णे
सतिकथंकार्यमितिचेदत्रब्रूमः व्यासः श्रुत्वातुवपनंकार्यंशाखासंस्कारसंयुतं ॥ पृथक्कर्मप्रकुर्वीतशास्त्रमेवंविनिश्चितमिति ॥ ५५ ॥ ननुज्येष्ठोवाकनिष्ठोवा
सपिंडीकरणानंतरंकथमत्रप्रवर्ततेतिचेन्न विधेःप्राप्तविषयत्वात्यदाहलौगाक्षिः विधिवत्तुप्रकर्तव्यंकर्मपुत्रेणनिश्चयः ॥ दशाहाभ्यंतरादूर्ध्वंसपिंडीकरणेकृत
इति ॥ ५६ ॥ केचिदाहुरत्रज्येष्ठेनवाकनिष्ठेनवाकर्मण्याचरितेएकाहसूतकीभूयशतांजलिंदत्वाविष्णुश्राद्धेनशुद्धोभवतीतितदेतदनुपपन्नं ब्राह्मणव्यतिरिक्त
विषयत्वात् यदाहगोभिलः ब्राह्मणव्यतिरिक्तोयःप्रीतिश्राद्धंसमाचरेत् ॥ दशाहाभ्यांतरादूर्ध्वंब्राह्मणश्चेत्समंत्रकमिति ॥ ५७ ॥ स्मृतिरत्नाकरे पुत्रेदेशांत
रस्थेपितरियदिमृतप्राप्तएवाथगेहंउत्तीर्णेचेद्दशाहेसकलमपिविधिंशास्त्रतःसंगृहीष्यन् ॥ एकोद्दिष्टोत्तरंयत्प्रतिदिनमसकृत्प्रत्यगेवप्रकृत्वाज्येष्ठोवातस्यपश्चादव
रजइतियत्कीर्तितंकर्मकुर्यादिति॥५८॥ननुपुत्राभावेसतितत्कालेदशाहादुत्तीर्णेसतिकीदृग्विधोव्यवहारइतिविवक्षाय.वृद्धगार्ग्यआह श्रुतंदशाहांतरेचेदस्थिसं-
स्कारमर्हति ॥ उत्तीर्णेतद्दशाहेतुशाखासंस्कारमर्हतीति ॥ ५९ ॥ तदयंनिर्गलितार्थः तदयंज्येष्ठोवाकनिष्ठोवाकृतकर्माचरणोभवतिसमागतेतदास्मिन्कृतेनक-
र्मणादशाहांतरात्शुद्धोभवति अन्यथापुनरवशाखासंस्कारार्हः पुत्राभावेदशादिनाभ्यंतरेसमागमेअस्थिसंस्काराच्छुद्धोभवति तदन्यथाशाखासंस्कारेणतिअ-

त्रेदंदेवलआह ज्येष्ठेनवाकनिष्ठेनसपिंडीकरणेकृते ॥ देशांतरगतानांतुपुत्राणांतुकथंभवेत् ॥ ५९ ॥ श्रुत्वातुवपनंकार्यंदशाहांतंतिलोदकं ॥ सर्वकर्मप्रकुर्वी
तनात्रकार्याविचारणेति ॥ ६० ॥ सूतकव्यवस्थायांमनुराह बंधूनांसूतकंनास्तिकृतसंस्कारकर्मणि ॥ स्वयंतुसूतकीभूत्वासर्वकर्मसमाचरेदिति ॥ ६१ ॥ वि
स्तरोहेमाद्रौद्रष्टव्यइतिदिक यदत्रदेशांतरपुत्रविषयसंस्कारविधौनिर्णीतायांकाचिद्भर्तारमृतौकस्याश्चिद्वनितायाःसहगमनविवक्षायांकथंव्यवहारइतिचिंत्यते
लौगाक्षिः मृतेभर्तरियानारीसहगंतुंसमीहते ॥ पदेपदेक्रतुफलंलभतेनात्रसंशयइति ॥ ६२ ॥ काश्मीरखंडेपिभर्तारमनुगच्छेतपातिव्रत्यस्यधर्मवित् ॥ अश्वमे
धफलंलब्ध्वापातिसालोक्यमश्नुतइति ॥ ६३ ॥ ननुपतिसालोक्यमश्नुतइत्युक्तंकस्याश्चित्स्वबुध्यभावेभर्तर्यंतःकरणाभावेपितदेतद्युज्यतेनवेतिसंदेहः कात्या
यनःयातुदुर्बुद्धिमाश्रित्यपतिनासाकमीहते ॥ गंतुंरौरवमेतस्यानिर्दिष्टंनात्रसंशयइति ॥ ६४ ॥ कूर्मपुराणे अग्निभीतातुयानारीपतिसर्गरूमीहते ॥ मृत
तिरयमासाद्यपैशाचींयोनिमाप्नुयादिति ॥ ६५ ॥ अत्रेयामाशंकाभर्तरिदूरास्थितेदशाहाभ्यंतरेतत्पत्न्याःश्रवणेसहगमनंयुज्यतेनवेति याज्ञवल्क्यः पतिभ
क्तिस्तुयानारीसहगंतुंसमीहते ॥ दशाहाभ्यंतरेचास्मासहसंगमनंभवेदिति ॥ ६६ ॥ याभर्तुर्भावकृतबुद्धिरस्तिसांतर्दशाहेगमनंविदध्यात् ॥ भर्तासहाश्म
न्दिविप्रयातिसंपूज्यतेसात्रिदशैःसमस्तैरिति ॥ ६७ ॥ अत्राशंकांकेचिदाहुः यावद्वतुदर्शनंभर्तृसालोक्ययोग्यतास्तीतिनैषःब्राह्मणधर्मोविज्ञेयःआत्महत्या
दोषसंभवात्यदाहशाट्यायनिः ऋतुस्नानांतरेयत्रभर्तासंगमनंभवेत् ॥ विप्रस्त्रियामात्महत्याभवत्येवनसंशयइति ॥ ६८ ॥ ननुवर्णांतरेयुज्यतेनवेतिसंदेहः
वृद्धमनुः अज्ञानेनयुतानारीबालवैधव्यसंयुता ॥ ज्ञात्वासहैवगमनंकुर्यात्तद्वतुदर्शनमिति ॥ ६९ ॥ पैठीनासिः दशाहोत्तरस्त्रोनार्यासहसंगमनंयदि ॥ क्षत्रि-
यादेर्विधिरयंब्राह्मणादेर्नयुज्यतइति ॥ ७० ॥ तदेतद्वचनबलेनयावद्वतुदर्शनसहगमनंक्षत्रियादिधर्मइतिसंतोष्टव्यमायुष्मता यद्व्रसहगमनविषयेनिरूढलक्ष-
णेननिर्वाहितेतत्सम्बन्तयतयातत्संस्कारोविचार्यइतिचिंत्यते व्यासः सहसंगमनेजातेवध्वासंस्कार्यताकथं ॥ सकृदेवद्वयोःकार्यःपृथगेवेतिसंशयः ॥ ७१ ॥
सहैवगमनंयस्मात्सर्वकर्मसहैवतु ॥ कर्तव्यंनात्रसंदेहोव्यासस्यवचनंयथेति ॥ ७२ ॥ गोभिलोपि स्त्रीपुंसोर्योगतोयत्रदहनंसंभविष्यति ॥ सहैवकर्मकर्तव्यं
शास्त्रमेतद्विजानतः ॥ ७३ ॥ ननुभार्यामग्नौसहसंगमनेसहैवकर्मकार्यमित्युक्तःनैतदुपयुक्तंभवति शरीरद्वयस्थित्वात्पृथगेवव्यवहारार्हत्वादितिचेन्न सकृद
हनविधेःप्रयोजकत्वात्यदाहलौगाक्षिःयत्रैवतुसकृद्दाहःपृथक्कर्मकथंभवेत् ॥ तस्मादेतद्वयंयुक्तंकर्मकुर्वीतयत्नतइति ॥ ७५ ॥ ननुदशाहाभ्यंतरेतदस्माद ह

मगोकायांमतिचश्च सहगमनस्यप्राशस्त्यात् अन्यथादंभकरपोटन्यायेनसहगमनवैयर्थ्यापत्तेः [illegible]
[१९] विपर्ययंप्रकुर्वाणःस्वयमेवाविनश्यतीति ॥ ७९ ॥ गार्ग्योपि विपर्ययेमहान्दोषोदंपत्योः सहसंगमे ॥ कुर्वीतकर्मयत्नेनसहैवश्राद्धमप्यथेति विस्तरोहेमाद्रौ
द्रष्टव्यः प्रागत्रसहगमनसंस्कारोनिर्णीतःअधुनामसूरिकयामृतानांदुर्मृतित्वंनोतिचिंत्यते वृद्धमनुः मसूरिकामृतायेतुकालेकर्मनविद्यते ॥ दुर्मृतिर्वानवासेयं
दुर्मृतिःपरिचिंत्यतामिति ॥ ८० ॥ वृद्धयाज्ञवल्क्योपि मसूरिकाव्याधिमृतादुर्मृतास्तेप्रकीर्तिताः ॥ नकर्मकालेकर्तव्यंशाखासंस्कारतामवेदिति ॥ ८१ ॥
अत्रहिशाखासंस्कारताभवेदित्युक्तांकियद्दिनादूर्ध्वंसविधिःसंभवतीत्याशंकायांकात्यायनआह त्रिपक्षादुत्तरंकार्यःशाखासंस्कारएषहि ॥ दुर्मृतेर्दुर्मृतित्वेनगीय
तेसामसूरिकेति ॥ ८२ ॥ गोभिलः मसूरिकामहारोगमध्येसर्व्यप्रतिष्ठिता ॥ तन्मृतानांनकालेस्तिकर्मकालांतरेविधिरिति ॥ ८३ ॥ कालांतरशब्दोयंत्रिपक्षो
[illegible] यदाहपैठीनसिः त्रिपक्षादुत्तरंकार्यंमसूर्यांम्रियतेयदि ॥ शाखासंस्कारतः[illegible]तौ[illegible]यइति ॥ ८४ ॥ ननुशाखासंस्का
[illegible] मसूरिकामृतो[illegible]नारायणबलियतः ॥ [illegible]प्रेतो[illegible]कार्यांवि [१०]
[illegible] ॥ ८५ ॥ [illegible] मसूरिकयामृतः ॥ नारायणबलि[illegible]प्रेतत्वविनिर्मुक्तयइति ॥ ८६ ॥ ननुमसूरिकामृतानां[illegible]दहना
[illegible]वदहनंसंभवतिनेतिविवक्षायामत्रब्रूमः लौगाक्षिः मसूरिकामृतोयस्तुदहनंनास्यकारयेत् ॥ खननंतस्यविज्ञेयमन्यथाग्रामनाशनमिति
८७ ॥ मांडव्योपि मसूरिकायांम्रियतेखननंतस्यकारयेत् ॥ दहनेसतिराष्ट्रस्यविद्रवोनात्रसंशयइति ॥ ८८ ॥ स्मृतिचिंतामणौ

मसूरिकायांम्रियतेजनोयंनारीपुमान्वाखननंविधेयं ॥ नचेदिदंग्रामविनाशकृत्स्यान्नारायणाख्योबलिरस्यकार्यइति ॥ ८९ ॥ नारायणबलिमात्रेण
[illegible]स्यप्रेतस्यमुक्तिरितिचेत्तत्रूमः बादरायणः तिलायुतंप्रकर्तव्यंयोमसूरिकयामृतः ॥ प्रेतत्वहानिर्नैवास्तिबंधूनांचदुःखपीडनमिति ॥ ९० ॥ विदूरथः
प्रेतत्वस्यनिवृत्त्यर्थंजुहोत्येवतिलायुतं ॥ मसूरिकामृतस्यास्यबंधुपीडानिवृत्तयइति ॥ ९१ ॥ तदेतैर्वचनैर्मसूरिकायाःरोगाधिष्ठानरूपत्वाद्दुर्गतिरधिकतरेति
नारायणबलिस्तिलायुतमपिद्वयमवश्यंकार्यमित्युक्तमेवोक्त [illegible]हेमाद्रौ तिलायुतंप्रकर्तव्यंनारायणबलि[illegible] ॥ [illegible]
॥ ९२ ॥ [illegible]
[illegible] ॥ ९३ ॥ [illegible]
[illegible] ॥ नचेदस्तिमहान्दो
[illegible] ॥ ९४ ॥ [illegible]शाखासंस्कारा[illegible]रिति अरण्येकाष्ठवद्दग्ध्वाक्षिप्तंतदशाहतः॥ऊ-

॥ १०१ ॥ तथाचदहनविधिसंभवेविप्राधिकारतयासर्वकर्माणिसमन्वयोस्तीतिबोदितव्यं एतदाहरलः सर्वकर्मणियोग्यत्वंदहनेसतिकुहिनः ॥ तस्माद्रो
दानगदकंस्यात्प्रायश्चित्तमिदंस्मृतामितिविस्तरोहेमाद्रौद्रष्टव्यः अधुनाकुष्टिमृताविषयनिर्णयानंतरंघटोत्सर्गविधानिरूप्यते ॥ यदाहकात्यायनः घटोत्सर्गंप्रकु
र्वीतनारीवापुरुषोपिवा ॥ जात्यापरिभ्रष्टतयातयोरेवनसंशयइति ॥ १०२ ॥ लोगाक्षिः यानारीविधवाजातागर्भिणीप्रभविष्यति ॥ घटोत्सर्गंप्रकुर्वीततस्या
इतिविनिश्चयइति ॥ १०३ ॥ गोभिलः यःपुमान्ब्राह्मणोभूत्वाशूद्रस्त्रियमभिव्रजेत् ॥ सशूद्रवद्बहिष्कार्योघटोत्सर्गविधानतइति ॥ १०४ ॥ वृद्धयाज्ञवल्क्यः
नारीवापुरुषोवापिजात्यंतरसमागमे ॥ तदन्नभोजनात्त्यक्तातावत्ताब्राह्मणशुचिरिति ॥ १०५ ॥ तदेतैर्वचनैर्विधवायांगर्भिण्यांपुरुषस्यशूद्रयोनिसंबंधेतयो-
रेवशूद्रान्नभोजनेघटोत्सर्गपूर्वंपरित्यागोयुक्ततरइतिसर्वमुनिमतासिद्धांतः ननुघटोत्सर्गपूर्वंपरित्यागइत्युक्तं कोयंघटोत्सर्गोनामकेनप्रकारेणसविधिःकर्तव्यइति
संशयः यदाहदेवलः अरण्येबंधुनिर्गत्वानववस्त्रेणसंयुतः ॥ घटमास्फोटयेत्तत्रजलपूर्णंनसंशयइति ॥ १०६ ॥ वृद्धहारितोपि जलपूर्णंघटंनीत्वाबंधुभिः
सकलैरपि ॥ अरण्येवस्त्रसंयुक्तंपादैःसंभिद्यतेतरामिति ॥ १०७ ॥ तदेतद्विधानेनघटस्फोटेजातेजीवन्नपिमृतएवेतिविज्ञायततःकर्मकुर्यादितिनिश्चयः यदुक्तं
स्मृतितरंगिण्यां घटस्फोटेनसहसापराभिमुखतांगताः ॥ निवृत्ताःकुत्रचिद्देशेशाखासंस्कुर्युरादरादिति ॥ १०८ ॥ स्मृतिचिंतामणौ दत्तैवजातंपतितत्व-
मेतद्विलोक्यकुर्याद्घटभेदमत्र ॥ शाखाभिधानेनतुसंस्कृतिःस्याद्यदातदैवेतिविनिश्चितंस्यादिति ॥ १०९ ॥ स्मृतिचंद्रिकायामपि कृत्वातद्घटभेदनंचसक-
लाश्रुंधवोदूरतःशाखासंस्कृतिमस्यशास्त्रविहितंकुर्वीततस्मात्परं ॥ कृत्वैवंमृतिसूतकंदशदिनंतस्मात्परस्तादपिप्रत्यक्षंसकलंचकर्मनिचयंकुर्युश्चविष्णोःपरमिति
॥ ११० ॥ अत्रहिविष्णोःपरमित्युक्तंकोयमर्थोस्यविज्ञायतइतिविवक्षायांसर्वंविष्णुनामपूर्वकमितिविवेकः तदन्नकेनविधानेनततःशुद्धिरितिविवक्षायांनाराय-
णबलिविधानेनविवेकोवक्तव्यः यदाहगौतमः पतितस्यैवसंस्कारोनारायणबलेर्विधिः ॥ सर्वंचविष्णुनाम्नैवसंस्कारोस्यभविष्यतीति ॥ १११ ॥ ननुसंस्का
रकरणेतस्यबंधुसंनिधानेवस्त्रयुक्तस्तातिनास्तीतिविवक्षायांग्रामाद्बहिर्निवासनंसिद्धमिति यदाहपैठीनसिः ग्रामान्निर्वासनंकार्यंपतितस्येतिनिश्चयः ॥ विष्णु
श्राद्धंप्रकुर्वीतप्रतिवत्सरमेवहीति ॥ ११२ ॥ विष्णुश्राद्धविधानंप्रयोगमुखेनावगम्यतइतितूष्णीमुपस्थीयतइतिदिक आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये ॥
पूर्णःपंचमःउल्लासोनित्यकांडेशुभावहः ॥ ११३ ॥ इतिश्रीआनंदगिरिस्वामिकृतेस्मृतिसारसमुच्चयेनित्यकांडेपंचमउल्लासः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ष्ठाष्टेसंस्थितोतिंतरोहितहेतुंविघ्नराजमभिनौमिवरेण्यंस्कंदमप्यभिमतंसुखहेतुंनौमिभास्करमतःप्रणतोस्मि पितृमातृदशाहमध्येमातरिमृताश्रयामेकोद्दिष्टानंतरं
तत्कर्मकर्तुमुचितंभवति मातृमृतिदशाहमध्येयादिपितामृतःतदातत्कर्मकथमितिविवक्षायांयत्नचिंत्यते लौगाक्षिः मातुर्दशाहमध्येतुपितायदिमृतिंगतः ॥तत्क
र्मनास्तितत्कालेकथमत्रव्यवस्थितिः ॥१॥ पितुर्दशाहपूर्वंतुकर्तव्यंसर्वकर्मतः ॥ तत्शेषमेकोद्दिष्टांतंकर्तव्यंनात्रसंशयइति ॥ गोभिलोपि मातुर्दशाहेपितरिमृ-
तेकर्मापितुर्वरं ॥ तत्कृत्वामातृशेषंस्यादितिशास्त्रस्यनिश्चयइति ॥२॥ वृद्धयाज्ञवल्क्येनोक्तं पितुर्दशगुणंमातागौरवेणातिरिच्यते ॥ गर्भधारणपोषाभ्यांतेन
मातागरीयसीति ॥३॥ तदेवंविधवचनेजाग्रतिसतिकथंपितृकर्मणोगरीयस्त्वमितिचेन्न तस्यास्तावकरूपतयाकर्मभिन्नकार्यांतरविषयत्वात् यदाहपैठीनसिः
पितृकर्मसमुल्लंघ्यमातृकृत्यंयआचरेत् ॥ समहापातकीज्ञेयोनरकेपरिपच्यतइति ॥४॥ यद्यपिमातुर्गर्भधारणपोषाभ्यांगुरुत्वमस्तितथापितद्भर्तुःकर्मविषयेगुरु
त्वमंगीकर्तव्यमितितदर्थः यदुक्तंस्मृतिचंद्रिकायां मातुःपूर्वंमृतिस्ततःपितृमृतौकुर्यात्कथंपूर्वंतःशेषेकिंप्रवदामियत्रहिपितुस्तद्वैरवंकथ्यते ॥ एकोद्दिष्टविधौवि
सृज्यापितरंकुर्वीतमातुस्तथाशेषंकर्मयथाक्रमंतहिविधिर्लुप्येतपुण्यस्मृतइति ॥ ॥ ननुमातुःकर्मशेषेपुनरारब्धव्येबंधूनांसूतकंकथमितिचेत्ब्रूमः कात्यायनः बंधूनां
सूतकंह्यतत्सर्वेषांनैवविद्यते ॥ स्वकीयानांतदस्तीतिसंनिपातेनिरूप्यतइति ॥५॥ बौधायनसूत्रमार्गेणाप्याह मातुरघमध्येपितरिप्रमीतेयदिपितुःकार्यंसमाप्य
मातृशेषकरणेस्वकीयानामाशौचंशास्त्रतोनविरुध्यतीति यदाहहारीतः कर्मशेषेसूतकस्यशेषोप्यत्रावशिष्यते ॥ स्वकीयानांतदस्तीतिनिर्देष्टव्यंनसंशयइति ॥
॥६॥ विस्तरोहेमाद्रौद्रष्टव्यः अधुनासंघातमृतिविषयेनिरूप्यते कात्यायनः बहूनांमृतिसंस्कारेकथमत्रविनिर्णयः ॥ पूर्वादिक्रमतोवापिसंबंधक्रमतोथवा ॥७॥
पित्रादीनांगरीयस्त्वात्गुरोःपूर्वंतुयुज्यते ॥ ततःक्रमेणतत्रेष्टःसंस्कारइतिनिर्णयइति ॥८॥ भरद्वाजः प्रथमंपितृसंस्कारस्ततोमातुस्तुसंस्कृतिः ॥ ततोभ्रातु
श्चसंस्कारःपत्नीपुत्रादयःपरमिति ॥९॥ व्यासोपि पितादिभ्रातृपर्यंतंसंस्कारःक्रमएवहि ॥ ततोयथावद्भवतिशास्त्रमेवंविनिश्चयइति ॥१०॥ अत्रहिपित्रा-
दीनांसंस्कारेक्रमउक्तः तदतिरिक्तानांदायादानांकथमितिविवक्षायांलौगाक्षिराह स्वकीयानांप्रथमतःक्रमात्संस्कारकोविधिः ॥ पूर्वंमृतिर्वापरतःशास्त्रमेवं
विनिश्चयइति ॥११॥ गोभिलः मृतिक्रमोनयुक्तोत्रसंघातमरणेविधौ ॥ स्वकीयेनविधानेनकुर्यात्संस्कारमादरादिति ॥१२॥ तदयमर्थः संस्कारविधौसं-
घातमृतौजातायांस्वकीयानांप्रथमतोविधानंपरकीयानामनंतरमितिविवेकः तथासतिसंस्कारविधौप्रतीतायांकियदवसानंकर्तव्यमितिविवक्षायते अत्रिः स-

द्भिवेन्नपूर्वेणविशुध्यतीति ॥१८॥ मांडव्योपि जातसूतकतःपश्चाद्भवेन्मृतसूतक ॥ नपूर्वशेषतःशुद्धिःशास्त्रमेवंविनिश्चयइति ॥१९॥ ननु...
[२१] कंततोजातसूतकंतयोरुभयोःप्रसक्तौपूर्वशेषेणशुद्धिर्भवतिनेतिसंदेहः लौगाक्षिः पूर्वशेषेणशुद्धिःस्यात्प्रथमंमृतसूतके ॥ जाताशौचेततःप्राप्तेशास्त्रमेवंविनि-
श्चयइति ॥२०॥ गोभिलोपि शावाशौचांतरालेतुजातसूतकमापतेत् ॥ पूर्वशेषेणशुद्धिःस्यान्नात्रकार्याविचारणेति ॥२१॥ ननुजाताशौचादनंतरंजाताशौ
चमेवापततितत्रपूर्वशेषात्शुद्धिर्नेतिसंदेहः पैठीनसिः जाताशौचांतरालेतुजाताशौचंसमापतेत ॥ पूर्वशेषेणशुद्धिःस्यान्नात्रकार्याविचारणेति ॥२२॥ शा-
ट्यायनिरपि जाताशौचद्वयंयत्रपूर्वशेषेणशुध्यति ॥ स्वकीयानांतदस्त्येवनात्रकार्याविचारणेति ॥२३॥ ननुमृताशौचमध्येमृताशौचंयद्यापततितत्रकथमि-
तिचिंत्यते वृद्धयाज्ञवल्क्यः मृताशौचेमृताशौचंपूर्वशेषेणशुध्यति ॥ स्वकीयानांनगच्छेतशास्त्रमेवंविनिश्चितमिति ॥२४॥ वृद्धमनुरपि मृताशौचद्वयंयत्र [२१]
शुद्धिःपूर्वसमाप्तितः ॥ स्वकीयत्वंपरित्यज्यतदन्येषांनसूतकमिति ॥२५॥ अत्रकेचिदाहुः जाताशौचमृताशौचयोः स्वकीयेष्वपिपूर्वशेषेणनिवृत्तिरिति वृद्ध
हारीतः जाताशौचेमृताशौचेकर्तृमात्रंविशिष्यते ॥ स्वकीयानामपितथानास्त्येवेतिविनिश्चयइति ॥२६॥ तदेतन्नसंभवति तस्यक्षत्रियविषयत्वात् यदुक्तं
स्मृतिरत्नाकरे जाताशौचांतरालेयदिभवतिमृतिः पूर्वशेषेणशुद्धिर्नस्यादेवंमृतावप्यखिलमपिमृतंजातकेजातसूतिः ॥ नश्येन्मृत्याद्यपीदंनहिभवतिपुनस्तत्स्व-

कीयेषुनाशःकेचित्तत्क्षत्रियेषुप्रभवतिनहितत्शास्त्रमेवंविरुद्धमिति ॥२७॥ ननुजाताशौचमध्येमृताशौचंपुनर्मृताशौचेजाताशौचमितिसंघातेसमुपस्थितेकथ-
मितिचेत्ब्रूमः वृद्धपराशरः मरणेजन्मनितथाजन्मनोमरणेपुनः ॥ संघाताशौचमेवंचेन्निर्णयःकथमिष्यते ॥२८॥ जाताशौचेसमुत्पन्नेमृतिसूतकतःशुचिः ॥
मृतिसूतकतोनान्यदधिकंतत्रचेष्यतइति ॥२९॥ विस्तरोहेमाद्रौद्रष्टव्यः यदत्रपारलौकिककर्मोद्देशेसंघाताशौचनिर्णयोभिहितःतदधुनाकाचित्संस्कारविपरि
प्लवेनपैशाच्यमुपात्तानांकथमेवगतिरितिचिंत्यते लौगाक्षिः कर्मविप्लवतांयेतुपैशाच्यंसमुपाश्रिताः ॥ कथमेषांगतिर्ब्रूहीत्युक्तेवक्ष्यामिसांप्रतं ॥३०॥ पुण्य
क्षेत्रेपुण्यनद्यांत्रिपिंडीविधिमाचरेत ॥ तत्पुत्रस्तस्यसंबंधिर्यःकोप्यस्माद्विमुच्यतीति ॥३१॥ गोभिलोपि त्रिपिंडीविधिनायस्तुसंस्कारंकुरुतेपुनः ॥ पैशाच्या
त्सविमुच्येतपुण्यक्षेत्रेनसंशयइति ॥३२॥ अत्रहिपुण्यक्षेत्रेनसंशयइत्युक्तंपिशाचोद्धारेतदुपयुक्तानिकानीत्यपेक्षायांकात्यायनआह काशीगोदावरीकांचीगोकर्ण
सत्यमंगलं ॥ मध्यार्जुनरामसेतुःपिशाचोद्धरणक्षमाइति ॥३३॥ तदनेनवचनेनापिशाचोद्धारणविधौप्रसक्तायांकीदृशोविधिरितिचिंत्य बादरायणआह त्रि
पिंडविधिनाज्ञेयःपिशाचोद्धारसंस्कृतिः ॥ प्रथमंमुंडनंकार्यंकूर्चयास्नातुमीहतइति ॥३४॥ एतदर्थेविशेषविधिमाहमनुः सहस्रंमृत्तिकास्नानंकुर्वतीविधिपूर्व
कं ॥ भयसींदक्षिणांदद्याद्ब्राह्मणानांनसंशयइति ॥३५॥ ततऊर्ध्वंकिंकर्तव्यमित्यपेक्षायांवृद्धयाज्ञवल्क्येनोक्तं सात्विकंराजसंपिंडंतामसंचयथाक्रमं ॥ प्रेतस्य

स्थोतिसंशयः ॥४३॥ तदास्थिलाभेसातिचेदास्थिसंस्कारइष्यते ॥ नचेत्शाखासंस्मृतिःस्यादितिशास्त्रस्यानिश्चयइति ॥४४॥ गोभिलोपि नरास्थिदाहसंस्कार
स्तल्लाभेसातिसंभवेत् ॥ शाखायांसंस्कृतिंकुर्यादन्यथेतिविनिश्चयइति ॥४५॥ तदेताभ्यांवचनाभ्यांज्ञानतोवाह्निनामृतौदुर्मृतिर्नेयमिष्यतइतिविवेकः ननुदु-
र्मृत्यभावेपिदुर्मृतिसाम्यात्किमस्यांतेसाविधेयामितिविवक्षायांवासिष्ठआह संस्कारद्वितयेवापिकाष्ठवद्दहनेस्थिते ॥ नारायणबलिःकार्योपिशाचोनान्यथाभवेदि
ति ॥४६॥ पैठीनसिरपि गृहदानेनदग्धस्यपैशाच्यंनात्रसंशयः ॥ ततोनिवृत्तयेचास्यनारायणबलिःस्मृतइति ॥४८॥ तथाचदुर्मृतिसाम्येनव्यवहारोयंना-
रायणबलिःशास्त्रतःप्राप्तोविज्ञेयः तेनास्यैकादशेह्नितिलायुतंकार्यमेवेतियुक्तं यदाहकात्यायनः तिलायुतंप्रकर्तव्यंगृहदग्धस्यदेहिनः पैशाच्यस्यानिवृत्यर्थंपार
लौकिकमुत्तमामिति ॥४९॥ गार्ग्योपि पारलौकिकसिध्यर्थंगृहदग्धस्यदेहिनः ॥ तिलायुतंप्रकर्तव्यंपुत्राद्यैर्नात्रसंशयइति ॥५०॥ ननुतद्दिनएवास्थिसंस्का-
राभावेकस्मिंश्चिद्दिनेकर्मारंभोयदिजातः दशाहमध्येप्रवृत्तस्यदशदिवसेषुप्रवृत्तेषुबंधूनांसूतकंनिर्णयःकथमितिचिंत्यते मांडव्यः परकीयाःपूर्वशेषेशुध्येरन्नात्र
संशयः ॥ स्वकीयास्तावदेवस्युर्यावन्नस्यादानिर्दशामिति ॥५१॥ स्मृतिचिंतामणौ नरास्थिसंस्कारविधौप्रवृत्तेगृहेप्रदग्धस्यदशाहमेव ॥ कृत्वास्वकीयाःपर-
तोयथासत्शुध्यंतितेभ्यःपरतःप्रपूर्वमिति ॥५२॥ तदनेनवचनेनपरकीयानांपूर्वशेषतःशुद्धिरितरेषांस्वकीयानांसर्वेषांपुनर्दशाहानंतरंसूतकमस्त्येवेतिनिर्णयः
यदुक्तंसंवर्तेन दशाहांतंसूतकंस्यात्स्वकीयानांनसंशयः ॥ कर्मारंभेकृतेपश्चात्परकीयेविशुद्धतीति ॥५३॥ निर्णयदीपिकायां परकीयेविहायैवस्वकीयेनास्तिशो
धनं ॥ यावत्कर्मांतरेदीक्षातावदेवनसंशयइति ॥५४॥ विस्तरोहेमाद्रौद्रष्टव्यइतिदिक अधुनाग्रहदग्धदेहिनःसंस्कारानंतरंसर्पसंस्कारविधिरुच्यते वृद्धया
ज्ञवल्क्यः जन्मांतरेजन्मनिवासर्पनाशोक्ततोयदि ॥ तत्संस्कारःप्रकर्तव्योनचेत्संतानहानिकृदिति ॥५५॥ व्यासोपि संतानहानिनाशायसर्पसंस्कारएषतु ॥
कर्तव्योनात्रसंदेहःपीडातस्यप्रशाम्यतीति ॥५६॥ अत्राहिंसर्पसंस्कारःकर्तव्यइतिविधिसंभवेनकीदृशोविधिरितिविवक्षायाऽज्ञानाज्ञानाद्वायदिस्वगृहेसर्पना-
शःतत्कालेदहनादिक्रियात्रिदिनंसूतकंभूयशास्त्रवत्संस्कारोयुज्यएवेतिस्मृतिविदांमतं यदाहलौगाक्षिः विधितद्दहनंकार्यंसर्पश्चेतिविनिश्चयः ॥ संस्कारो
ब्राह्मणस्यैवकर्तव्योनात्रसंशयइति ॥५७॥ गोभिलः जातेसर्पस्यसंस्कारेसूतकंत्रिदिनं स्मृतं ॥ दानंतथाहिरण्याद्यंकर्तव्यंनात्रसंशयइति ॥५८॥ तदेतद्द्विधा
नंसाक्षाज्जन्मनिसंभवातिजन्मांतरेसंतानप्रतिबंधेसत्यपस्माररोगोत्पत्तावप्यभिवाक्कृतसंस्कारसर्वोबाधतइतितदानींसंस्कारंकुर्यादिति यदाहशाट्यायनिः अप-

स्मारेसमुत्पन्नेपुत्रादिप्रतिबंधके ॥ नागदोषंपरिज्ञायसंस्कारकुरुतेबुधइति ॥ ५९ ॥ जन्मांतरीयसंस्काराविषयेपैठीनासिराह जन्मांतरीयसंस्कारेशास्त्रासंस्कृतिरिष्यते ॥ सर्पाणांनात्रसंदेहःशास्त्रवद्दहनंभवेदिति ॥ ६० ॥ स्कंदः त्रिदिनेसंस्कृतिंकृत्वाप्रतिष्ठांनागदेवतां ॥ शालायैवप्रकुर्वीततस्यदोषस्यशांतयइति ॥ ६१ ॥ अत्रिः नामगोत्रंसमुच्चार्यनागस्यश्राद्धमेवतु ॥ कर्यव्यंविधिदृष्टेनवर्त्मनानात्रसंशयइति ॥ ६२ ॥ गालवः गोत्रकाद्यपशोत्रस्यान्नामशेषस्यनिश्चयः ॥ अथवावासुकेबोध्यंशास्त्रमेवंविनिश्चयइति ॥ ६३ ॥ यद्यप्ययंसर्पसंस्कारःस्वकृतावषयेजन्मांतरेनपरिज्ञातःतथापिकर्मणाबोध्यइतिफलनिदर्शनंसिद्धं एतदुक्तं.ब्रह्मांडपुराणे सर्पसंस्कारविधिनातवपस्मारोविनश्यति ॥ संतानप्रतिबंधोपिविनश्यतिनसंशयइति ॥ ६४ ॥ इदंविधानंकुत्रकार्यमितिविवक्षायांस्मृतिचंद्रिकायामुक्तं कृत्वाजन्मांतरीयंभवतिचसुखिनःसर्पसंस्कारकर्मप्रोच्चार्यनामगोत्रंतदनुचविदधीतात्रदोषोविनश्येत् ॥ योपस्मारेणजातोप्यथतनयाविधौयोगेलोवाविनश्येत्तस्माद्रूतत्प्रकार्यंसकलमुनिमतंपुण्यतीर्थेविशेषइति ॥ ६५ ॥ स्मृतिरत्नमालायां पुण्यक्षेत्रेपुण्यतीर्थेसर्पसंस्कारइष्यते ॥ योपस्मारोविनश्येतसंतानप्रतिबंधकइति ॥ ६६ ॥ अत्रदहनविषयेमंत्रोगोतमेनोक्तः स्वप्नःस्वप्नेतिमंत्रेणसर्पसंस्कारमर्हति ॥ शाखायांकर्तुमेवात्रयुक्तमेतद्विधानतइति ॥ ६७ ॥ अधुनादत्तकस्यकन्यायाःमातापितृविषयेविचार्यते कात्यायनः परगोत्रेदत्तकस्यपुत्रस्यदुहितुस्तथा ॥ मातापितृमृतौतत्रकिंकार्यमितिसंशयइति ॥ ६८ ॥ दशाहंसूतकोभूयद्धाश्चैवतिलांजलिं ॥ पुत्रःक्षौरंप्रकुरुतेनात्रकार्याविचारणेति ॥ ६९ ॥ शांडिल्यः मातापितृमृतौसत्यांदत्तःकन्याततःपरं ॥ परगोत्रस्थितावेतौददतांतौतिलांजलीति ॥ ७० ॥ तदेताभ्यांवचनाभ्यांपरगोत्रेदत्तस्यपुत्रस्यकन्यायाआपिमातापितृमृतिविषयेसूतकंतिलांजलिमपिवर्ततइतिव्यवसीयते ननुयद्ययंदत्तःस्वयंज्येष्ठोभवतिनचेद्यदिकनिष्ठःतदानींमातापित्रोःपुत्रांतराभावेकथंपारलौकिकाक्रियतेतिविवक्षायांगोभिलआह ततः परस्मिन्गोत्रेतुस्वपित्रोर्मरणेसाते ॥ सतिपुत्रांतराभावेस्वयंकर्मकरोत्यसाविति ॥ ७१ ॥ लोगाक्षिरपि कुलद्वयेस्वयंकर्तामातापित्रोर्नचेत्सुतः ॥ कर्मकुर्वीतयत्नेननचेन्निरयमश्नुतइति ॥ एतेनव्यवहारेणदत्तकस्यापितुःपुत्रांतराभावेस्वस्यकर्माधिकारइतिसिद्धं कन्यायास्तुतिलांजलिरेवव्यवहारइतिविवेकः अत्रेत्रमाशंका यद्येकोदत्तविधानेनगोत्रांतरंप्राप्तःतस्यैवौरसेपुत्रोजातोयदिततःकस्तस्यज्येष्ठाइतिविवक्षायांमनुराह दत्तकेनविधानेनगोत्रांतरसुतेस्थिते ॥ स्वस्यौरसोयदिभवेज्ज्येष्ठोदत्तकएवहीति ॥ ७३ ॥ पैठीनासिरपि ज्येष्ठोदत्तोयदिभवेत्कनिष्ठस्त्वौरसोभवेत् ॥ दत्तएवतदाज्येष्ठःसर्वकर्मसचार्हतेति ॥ ७४ ॥ स्मृतिचिंतामणौ योगोत्रांतरतोभवेद्यदिसु-

॥ ७९ ॥ धनुर्लक्षणेविश्वकर्मणोक्तं तिर्यग्यवोदरा-
व्यश्चावूर्ध्ववाग्राहयस्त्रयः ॥ प्रमाणमंगुलस्योक्तंविनास्तिर्द्वादशांगुलं ॥८०॥ वितस्तिर्द्विगुणारत्निस्ततःकिष्कुस्ततोधनुरिति ॥८१॥ नन्वेतद्ग्रामसूतकंजा
तंनगरसूतकंकीदृशमितिविवक्षायांबादरायणआह शवेनगरमध्येतुवर्ततेतत्रसूतकं ॥ श्रेणिद्वयंपरित्यज्यग्राह्यमेतन्नसंशयइति ॥ ८२ ॥ तदनेनवचनेननगरे
सूतकेविज्ञातेब्राह्मणाग्रहारेकथमितिचेद्ब्रूमः कात्यायनः अग्रहाराद्बहिर्देशेशवोयदिपतिष्यति ॥ तदानींसूतकंनास्तिनचेदस्त्येवनिश्चयइति ॥ ८३ ॥ अस्तुत
र्हिमहाक्षेत्रादौकथंसूतकविज्ञप्तिरितिचेदत्रोच्यते तटाकंवानदीवात्रमध्येचेत्संप्रतीयते ॥ शवेस्थितेक्षेत्रमध्येश्रेण्यांनास्त्येवसूतकमिति ॥ ८४ ॥ ननुबहुपुण्य
वहारोमुख्यतरोभवति तदेकंवानिर्धार्यमितिविवक्षायांस्मृतिचिंतामणावुक्तं ग्रामेचेदिहसूतकंशतधनुःपारेतदेवेष्यते सीमायामथतत्पुरेभवतिचेच्छ्रेणिद्वयंसं
त्यजेत् ॥ विप्रस्याप्यथवाग्रहारविहितंतत्सूतकंनिर्दिशेत् क्षेत्रेपुण्यनदीतटाकतलहग्राह्यंहितत्सूतकमिति ॥ ८५ ॥ मांडव्यः ग्रामेवानगरेवापिपुण्यक्षेत्रेपिसू
तकं ॥ तन्मध्येतुशवेदृष्टेनदीमध्यान्नसूतकमिति ॥ ८६ ॥ तदयंनिर्गलितार्थः ग्रामादौशवदर्शनेसूतकमस्त्येवेतिनिश्चयः तथासतिनित्यकर्मानुष्ठानस्यदाश्च
कास्तीतिसिद्धं तदत्रकोनिर्वाहइतिविवक्षायांश्रेणींपरित्यज्यमध्येनदीतटाकादौदृष्टेसर्वस्याप्यधिकतरइति एतदुक्तंस्मृतिचंद्रिकायां नदीतटाकंनगरेयदास्ति २३
ग्रामेतथाक्षेत्रवरेप्रदिष्टं ॥ नसूतकंतत्रचमध्यगे वेतत्तोन्यथासूतकमेवसत्यमिति ॥ ८७ ॥ धिस्तरोहेमाद्रौवृद्धव्यः अधुनायमाशौचापवादोनिर्दिश्यते सन्न्या
सिनोमातापितृविषयेसूतकमास्तिनेतिसंदेहः लौगाक्षिः यावज्जपानुसंधानंयावच्चशिवपूजनं ॥ मातापितृमृतौसत्यांयतेर्नावशसूतकमिति ॥ ८८ ॥ तदनेनव

चनेनमातापित्रोर्दशाहाभ्यंतरेजन्यासिनोदंडोदकाधिकारसिद्धितयातदिदमुदाहृतंवेदितव्यं अग्निहोत्रिणःसूतकमास्तिनेतिसंदेहः गोभिलः नित्याग्निहोत्रियो
विप्रोमातापितृमृतिंविना ॥ होमाधिकारीभवतिमात्रकार्याविचारणेति ॥ ८९ ॥ वेदांतनिष्ठस्याश्रोतिनःमातापितृसूतकमास्तिनेतिसंदेहः कात्यायनः मातापि-
तृमृतिंहित्वायोध्येतिपरिशुध्यति ॥ भार्यायांचप्रसूतायांसूतकंतस्यविद्यतइति ॥ ९० ॥ योगिनोयोगाभ्यासशीलस्यसूतकमास्तिनेतिसंदेहः पैठीनसिः योगा-
भ्यासनशीलोयःयोगीयस्तुविशुध्यति ॥ यावद्योगाभ्यसनतदृष्टिसूतकभवादति ॥ ९१ ॥ नित्यशिवपूजानुरक्तस्यसूतकमास्तिनेतिसंदेहः संवर्तः योनि-
त्यंशिवपूजायांनियमंप्रकरोत्यसौ ॥ मातापितृमृतिंहित्वासूतकंनास्यविद्यतइति ॥ ९२ ॥ अत्रिः मातापितृमृतिप्राप्तौयोनित्यंशिवपूजकः ॥ परहस्तात्पूजयित्वा
स्वयंतीर्थंगृहीष्यतीति ॥ ९३ ॥ ननुभार्यायांप्रसूतायांकथमितिविवक्षायांवसिष्ठआह प्रसूतायांतुभार्यायांनियमात्शिवपूजकः ॥ परहस्तेननतीर्थंगृहीत्वाच-
तेतेतरामिति ॥ ९४ ॥ स्मृतिचिंतामणौ योनित्यंशिवपूजकोनियमतोमातुःपितुर्वामृतिभार्यायांवायदिचेत्तदाप्रसविताप्रजापरस्ताभवेत् ॥ तीर्थंग्राह्यमिदंतदन्य
विषयेनास्त्येवयत्सूतकंदीक्षेयंविहिताशरीरविषयेयावत्स्वदेहोस्थितिरिति ॥ ९५ ॥ स्मृतिचंद्रिकायां ...

ध्याति ॥ शावेवाजननेवापिगृहीतयदिशुध्यतीति ॥ १०३ ॥ ननुतंडुलमुद्गमाषादीनांकथंविशुद्धिरितिविवक्षायांलोगाक्षिराह माषंमुद्गंतंडुलंचशावेवाजनने थवा ॥ सप्तमेदिवसेशुद्धंपंचगव्येनजायतइति ॥ १०४ ॥ ननुतदानींसूतकसमयेशावेवाजननेवादानस्याधिकारोस्तिनेतिविवक्षायांगोभिलआह शावेवाजनने नेवापिदानस्याधिकारोभवेत् ॥ कर्तुर्नात्रैवसदेहस्तस्यपापव्यपोहतीति ॥ १०५ ॥ ननुशावाशौचजननाशौचकर्तुगृहात्शाकयोग्यानांकूष्मांडकर्कटीपटोल- कादीनांसूतकंनेतिसदेहेमांडव्यः वृंताकमथकूष्मांडपटोलंकर्कटीतिथा ॥ नग्राह्यंसूतकग्रहादशाहेनाविशुध्यतीति ॥ १०६ ॥ ननुवस्त्रादीनांतत्कालेशुद्धिरस्ति नेतिचिंत्यते वृद्धयाज्ञवल्क्यः नववस्त्रंयदिभवेत्गृह्यतेदानमार्गतः ॥ तथाप्येतद्दशाहेनशुध्यतीतिविनिर्णयइति ॥ १०७ ॥ ननुकर्तुर्दानविषयकथमधिकारइ तिचेत्ब्रूम. संवर्तः सूतकेसर्वदानानिकर्तव्यानिनसंशयः ॥ दातुश्चेदक्षयंपुण्यंगृहीतुर्बहुपातकामिति ॥ १०८ ॥ एवंविधवचनजातैःसूतकद्रव्यशुद्धिरूक्तेयति दिक आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये ॥ पूर्णःषष्ठःसमुल्लासोनित्यकांडेशुभावहः ॥ १०९ ॥ इति श्रीआनंदगिरिस्वामिकृतेस्मृतिसारसमुच्चये नित्यकांडेषष्ठउल्लासः ॥

निर्विघ्नेनसर्वोतिलब्धियंत्रत्वेवांविनिश्चय:॥ कारणंसर्वजगतांवंदेविघ्नपर्तिमुदा ॥ १ ॥ ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारोवर्णाःतेषांवृत्तिःकीदृग्विधेनधर्मेणाविवक्षायां
क्रमेणात्रनिर्णीयते यजनंयाजनंचैवदानमध्यापनंतथा ॥ प्रतिग्रहाश्चाध्ययनंषट्कर्मानिरतोद्विज इति॥ २ ॥ कात्यायनः अग्निहोत्रंतपःसत्यंदेवतातिथिपूजन॥
एषब्राह्मणधर्मोयंसर्वशास्त्रेषुनिश्चितमिति ॥ ३ ॥ लोगाक्षिः दानंतथैवाध्ययनंयजनंचयथाक्रमं॥क्षत्रियाणामयंधर्मःशास्त्रविद्भिर्विनिश्चतइति॥ ४ ॥ गो-
भिलः प्रजानांपालनंनित्यंशरणागतरक्षणं ॥ षष्ठांशग्रहणंभूमेःक्षात्रोधर्मःसनातनइति ॥ ५ ॥ संवर्तःकृषिवाणिज्यगोरक्षादीनानांपरिपालनं ॥ दानंब्राह्मणह
स्तेषुवैश्यधर्मःसनातनइति ॥ ६ ॥ वृद्धयाज्ञवल्यःक्षेत्रेहलाकर्षंचद्विजेषुपरितोषणं ॥ सेवावृत्त्याचनियतंवर्तनंशूद्रधर्मेनेति ॥ ६ ॥ तदेतैर्वचनैर्वर्णधर्मता
सिद्धौकिमेतेनप्रस्तुतमितिविवक्षायांमनुराह ब्राह्मणाद्याःस्वधर्मेणवर्तंतेयत्रनिष्ठिताः॥ तत्रैवकालेवृष्टिःस्यात्पशूनामभिसंपदइति ॥ ८ ॥ हारितोपि ब्राह्मणा-
दिषुवर्णेषुधर्मातिस्वक्रमोयदि ॥ दुर्भिक्षंराष्ट्रमुद्दिश्यत्वकालमरणंभवेदिति ॥ ९ ॥ स्मृतिचंद्रिकायां योविप्रःक्षत्रियोवाभवतितदपरोवैश्यएवंतुशूद्रोयेतुस्वे-
ष्वेवधर्मेष्वभिमताविषयास्तत्रराष्ट्राभिवृद्धिः॥नोचेद्दुर्भिक्षकालोप्यभिहितस्मृतिरप्युच्यतेशास्त्रविद्भिःस्तस्मात्सत्येनसर्वंजगदिहविदितंसूर्यचंद्रोदयश्चेति॥१०॥
वृद्धवसिष्ठः कालेसंध्योपासनंचब्राह्मणानांविधिःस्मृतः ॥ क्षत्रियाद्दंडपालायांप्रवर्तेरन्नसंशयइति॥११॥विश्वामित्रः युक्तदंडोगृहीतव्योदुष्टान्_परिरक्षणं॥
शिष्टानांपालनंधर्मःक्षत्रियाणांशुभंकरइति ॥ १२ ॥ कश्यपः वैश्योधनंचसत्येनसम्यग्राजयतेयदि ॥ दशांशंविप्रवृंदेभ्योदत्वापापैर्विमुच्यतइति ॥ १३ ॥
रहुः ब्राह्मणोयदितद्दानदशांशंव्ययमाचरेत् ॥ अन्यथापातकीभूयोनरकेपरिपच्यतइति ॥ १४ ॥ ननुशूद्रप्रतिग्रहोनयुक्ततरःतर्हितत्रकिंकार्यमितिविवक्षा-
यांपैठीनसिराह शूद्रोददातिदानंहिनकेरणगृहीष्यति ॥ भूमौस्थापितमेतच्चेत्क्षालयित्वाचगृह्णतीति ॥ १५ ॥ काशकृत्स्नः शूद्रप्रतिग्रहंकुर्वन्किल्बिषीभव
तिध्रुवं ॥ तथापिदानधर्मेणव्ययंशीघ्रंसमाचरेदिति॥विस्तरोहेमाद्रौद्रष्टव्यइतिदिक अधुनावर्णधर्मानंतरमाश्रमधर्मोनिरूप्यते लोगाक्षिः ब्रह्मचर्यंचगार्हस्थ्यं
वानप्रस्थमतःपरं ॥ सन्यासस्त्वंततःप्रोक्तंचत्वारोह्याश्रमाइति॥१६ ॥ तदेतेआश्रमाब्राह्मणादित्रयेष्वेवघटतइतिविवेकः गोभिलः ब्रह्मचर्याद्याश्रमाणांब्राह्मणा
द्याःप्रकीर्तिता ॥ त्रयोवर्णाःक्रमादेतेनशूद्रस्याधिकारितेति ॥ १७ ॥ एतेनाश्रमधर्माणांशूद्राधिकारत्वंनयुज्यतइतिव्यक्तंप्रतीयते पैठीनसि वेदशास्त्राद्यध्य
यनंब्रह्मचर्यंप्रकीर्त्यते ॥ वासोगुरुकुलेनित्यंभैक्षाचर्यमपीष्यतइति ॥ १८ ॥ कात्यायनः गृहस्थोदेवताभक्तोनित्यंत्वातिथिपूजकः ॥ शास्त्रावलोकनंकुर्वन्पुराण

पिबेति ॥ २५ ॥ ननुबाल्यएवसन्यासाश्रमस्वीकारःयदहरेवविरजेत्तदहरेवप्रव्रजेदितिश्रुतेःइतिचेन्न तदानीमिंद्रियवैक्लव्याभावेनवासनायाःपरिहर्तुमश-
क्यत्वात् यदाहगार्ग्यः सन्यासमधिकृत्यैवयोन्यांविषयमोहते॥ सपापीनारकोज्ञेयोनात्रकार्याविचारणेति॥२६॥विस्तरोन्यत्रमृग्यइतिदिक अथदायादविभागो
निरूप्यते लोगाक्षिः भार्याद्वययदेकस्यद्वयोःपुत्राश्चसतिचेत् ॥ विभागःकथमत्रास्यादितिसंशयएवहि ॥ २७ ॥ द्वौवात्रयोवापुत्रास्युर्भार्ययोरेवसास्थितिः
विभागत्वेनिदानंस्यादितिशास्त्रस्यानिश्चयइति ॥ २८ ॥ अयमर्थः एकस्यद्वेभार्येस्तःतयोरेकस्यांत्रयःपुत्राःअन्यस्यांद्वौभवतःततोकथमत्रपितृद्रव्यस्यावि-
भागइतिचेत्भार्याव्यवस्थयेतिविज्ञेयं तेनायपर्यवसितोभवतिद्वयोःसत्वेत्रयाणांसत्वेपिदंतःपातिततयाव्यवहारइति ननुकन्यायांयापितृद्रव्येकारणमस्तिने
तिसंशयःगोभिलः कन्यायाश्चेत्पितृद्रव्येकारणंनास्त्यसंशयं ॥ गोत्रांतरप्रसक्तत्वात्तिलांजल्याधिकारतेति ॥ २९ ॥ अयमर्थः तस्याःपरगोत्रंप्रतिप्रवृत्तित
यामातापित्रोःतिलांजलिपितृशेषग्रहमात्रंस्वीकारइति ननुअन्यगोत्रप्रतिगतस्यस्वगोत्रेस्थितस्यापिपितृद्रव्येधिकारोस्तिनेतिसंदेहःकात्यायनः पितृद्रव्येनाधि [२५]
कारोदत्तकस्यनसंशयः॥ सएवचपितातस्यगृहीतोयेनसर्वथेति ॥३०॥ तेनायमर्थोविवक्षितःदत्तकोयदिस्वगोत्रेपरगोत्रेवास्थितःतदानीयेनासौगृहीतःतदीय
द्रव्यस्यैवाधिकारोनतुरेतःसेक्तुःपितुरिति केचिदाहुरत्रकन्यायाअपिपितुरंशेधिकारोस्तीतियदाहशाट्यायनिः पितुरंशेधिकारोस्तिकन्याया अप्यसंशयः॥द-
त्तकस्याप्यसंदेहःविभागोयत्रयुज्यतइति ॥३१॥ अनेनवचनेनयदुपात्तंतत्पराकृतंवेदितव्यंतथाहि कन्यायाःयत्पितृद्रव्याधिकारःसपारिबर्हमात्रइतिदत्तकस्य

पितृद्रव्येयोतनाधिकारःस्वपितुःपुत्रांतराभावेसतितदितिविज्ञेयं यदाहगार्ग्यःदातव्यंपारिबर्हंहिकन्यायानात्रसंशयः ॥ दत्तकस्यस्वपुत्रश्चेनास्त्यन्यस्तस्यसंभ
वेदिति ॥ ३२ ॥ अयमभिप्रायःशाट्यायनिनायदुक्तंविवाहसमयेकन्यायाःपारिबर्होबोध्यःदत्तकस्यपितृव्योधिकारःपितुरन्यपुत्राभावइति अत्रायंसंशयःदत्त
कोयदिद्रव्याधिकारीस्वकीयाबंधवोयदिपितुःकथमस्याधिकारित्वमितिवृद्धयाज्ञवल्क्यः स्वकीयाबंधवोनस्युःपितृद्रव्याधिकारता ॥ नचेत्सदत्तकःसर्वंगृहीत्य
तिनसंशयइति ॥ ३३ ॥ स्मृतिचिंतामणौ दायादाबंधवोयेपितरिमृतितदापुत्रवर्गास्तदेषांद्रव्यादेर्नाधिकारःप्रभवतिपुरतोयेप्रतीताःक्रमेण ॥ दत्तोनार्हत्य
सौयस्तदनुचदुहितासंततिर्नान्यतदानीताभ्यामेवाधिकारःप्रणिगदितइतिप्रोच्यतेसद्भिरेतदिति ॥ ३४ ॥ विस्तरोहेमाद्रौद्रष्टव्यः यदत्रदायादविभागःपूर्वंनि
र्णीतःअधुनादत्तपुत्रविधिरुच्यते अंगिरः भ्रातुःपुत्रंप्रगृण्हीयात्स्वपुत्रोनास्तियद्यपि ॥ स्वस्त्रीयमपिगृण्हीयादितिशास्त्रस्यनिश्चयइति ॥ ३५ ॥ अत्रिः अ-
भावेभ्रातृपुत्रस्यदायादेष्वेकएवतु ॥ दत्तकत्वंगृहीतव्यःस्वकुलस्याभिवृद्धयइति ॥ ३६ ॥ त्रिकांडमंडनः भ्रातृपुत्रश्चदायादःस्वास्त्रियोपिसमर्हति ॥ दत्तक
त्वेपरिग्राह्योनात्रकार्याविचारणेति ॥ ३७ ॥ कात्यायनः स्वगोत्रेपरगोत्रेवादत्तकंसंगृहीष्यति ॥ स्वगोत्रस्याभिवर्ध्यर्थंपूर्वाभावेपरःपरइति ॥ ३८ ॥ वृद्ध

कार्याविचारणेति ॥ ४६ ॥ विस्तरोन्यत्रगवेषणीयइतिदिक प्रागत्रदत्तकविधिर्निर्णीतः दत्तकपरिग्रहाभावेकस्यचित्पुत्रहीनस्यकथंलोकांतरस्थितिरितीवि-
चार्योश्वत्थोपनयनविधिर्निरूप्यते यदाहव्यासः पुत्राभावेदत्तकस्याप्यभावेतरुपुत्रतां ॥ कुर्वीतनात्रसंदेहोनरकात्त्रायतेपितॄनिति ॥ ४७ ॥ अत्रहिनरका
त्त्रायतेपितॄनित्युक्तंकिमस्यपुत्रसाम्यमितिविवक्षायांब्रह्मांडपुराणेसमुदाहृतं मद्वनेतुपुरादग्धेसिवनेत्राग्निनायदा ॥ पिप्पलंहारिरेवासौपुत्रत्वेस्वीचकारहेति
॥ ४८ ॥ कूर्मपुराणे तरुपुत्रत्वमासाद्यलक्ष्मीसासमुदेतरां ॥ पुत्रादधिकसंप्रीत्यासाक्षाद्धरिरपिस्वयमिति॥ ४९ ॥ ननुतरुपुत्रस्वीकारेकस्यचिदामृति-
कालंब्रह्मचर्यनिष्ठस्यविधवायाअप्यधिकारोस्तिनेतिचिंत्यते लौगाक्षिः अपुत्राविधवानारीतरुपुत्रंगृहीष्यति ॥ अपुत्रोब्रह्मचारीवातरुपुत्रंगृहीष्यतीति ॥ ५० ॥
ननुचतुर्णांवर्णानामपितरुपुत्रांगीकारेअधिकारोस्तिनेतिविवक्षायांगोभिलाह ब्राह्मणाःक्षत्रियावैश्यातरुपुत्रंप्रगृण्हते ॥ शूद्रोनार्हतितद्यस्मादुपनीतिर्विधीयते
॥ ५१ ॥ नन्वस्योपनयनस्यकीदृशोविधिरितिविवक्षायांजाबालिराह सहस्रदलसंयुक्तोयदायपिप्पलोभवेत् ॥ उपनीतिस्तदाकार्यानात्रकार्याविचारणेति
॥ ५२ ॥ वृद्धयाज्ञवल्क्यः चतुर्द्वारंमंटपंस्यात्परितास्ययथाविधि ॥ गृहयागंपुराकृत्वाजातकर्मादिसंस्क्रियादिति ॥ ५३ ॥ पैठीनसिः अश्वत्थेवोनिषदनं
मंत्रेणातेनदेशिकः ॥ समिदाज्यचरूनत्रजुहुयान्नात्रसंशयइति ॥ ५४ ॥ वृद्धयाज्ञवल्क्यः यज्ञोपवीतंगायत्र्याप्याभिमंत्रितमेवतु ॥ निबध्यादस्यशाखायां
दंडादीनपिविन्यसेदिति ॥ ५५ ॥ कात्यायनः गोदानंभूरिपानंचपिप्पलस्योपनायने ॥ कुर्वीतब्राह्मणेभ्योथषड्सैर्भोजनंचरेदिति ॥ ५६ ॥ ननुपिप्पलस्यो
पनयनेनकिंफलंभवतीत्यपेक्षायांहारिताह पितॄणामृणतोमुक्तिरश्वत्थस्योपनायनात् ॥ अश्वमेधादियागानांफलंभवतिनिश्चयादिति ॥ ५७ ॥ ननुस्वपुत्र-
स्याश्वत्थोपनयनेअधिकारस्तिनेतिविवक्षायांगार्ग्यआह सपुत्रोयदिकुर्वीतह्यश्वत्थस्योपनायनं ॥ आकल्पमस्यवसतिःस्वर्गलोकेनसंशयइति ॥ ५८ ॥ ननुके-
नेदंमनुष्यलोकेचीर्णमित्यपेक्षायांशांडिल्यआह सपुत्रोप्यथमाधाताकृत्वाश्वत्थोपनायनं ॥ देवलोकेमहाराज्यंप्राप्तवान्सर्वकालिकामिति ॥ ५९ ॥ विस्तरो
न्यत्रमृग्यइतिदिक अधुनाकन्यादानक्रमोनिरूप्यते यदाहजाबालिः कन्यास्वयंपितादद्यान्मातावात्रनसंशय ॥ तावुभौदिशतोनूनंनात्रकार्याविचारणेति ॥ ६० ॥
लौगाक्षिः मातापित्रोरभावेतुभ्रातासंदिश्यतेतरां ॥ अथवायेस्वकीयास्युःकन्यादानेधिकारिणइति ॥ ७१ ॥ अत्रायंसंशयःपितरिजीवतिसतितांविहायैतक
श्चिन्माताकन्यांदिशतिअथवाभ्राताकन्यांमातरंपरित्यज्यसंदिशति अथवास्वकीयास्तांदिशंतिअथवासगोत्रिणइतिइदंशास्त्रमशास्त्रंवेतिसंशयः वृद्धयाज्ञव-

ल्क्यः मातरंपितरंत्यक्ताभ्रातावाबंधवोपिवा ॥ कन्यांदिशतिशास्त्रीयमेतन्नस्यादितिस्फुटमिति ॥ ६२ ॥ वृद्धवसिष्ठः मातरंवाथपितरंपरित्यज्यविमूढ-
धीः ॥ भ्रातासंदिशतेकन्यामसत्यंतद्भवेध्रुवमिति ॥ ६३ ॥ यदेताभ्यांवचनाभ्यामविधिनाकृतमकृतमेवेतिविज्ञेयं ननुसहधर्मश्चर्यतामितिशास्त्रवत्तयावि-
वाहेकृतेतिमतमयमविधिरितिचेन्न मातापितृभ्यांकरणविधेर्लुप्तत्वात्यदाहपैठीनसिः मातापितृभ्यांक्रियतेकन्यादानमितिस्फुटं॥ तदन्यदविधिज्ञेयोनात्रकार्यावि-
चारणेति ॥ ६४ ॥ नन्वविधिनाकृतलुप्ततयापुनर्विवाहउपपातित्यमितिसंशयः यदाहमांडव्यः पातित्यमेतन्नभवेद्विवाहःपुनरेवतु ॥ कर्तव्यःकन्यकायाश्च
मातापित्रायथाक्रममिति ॥ ६५ ॥ तदेतेनवचनेनपुनर्विवाहेप्रसक्तेसोयंविधिःकस्यकर्मइतिविवक्षायांगोभिलआह पुनर्विवाहोगादितोब्राह्मणादतिरिच्यते ॥
त्रैवर्णिकानांयुक्तंस्यादन्येषामित्यसंशयमिति ॥ ६६ ॥ गार्ग्यः येनकेनापियोगेनब्राह्मणस्यतुकन्यका ॥ विवाहितापुनर्देयापातितासानसंशयइति ॥ ६७ ॥
संवर्तः भ्रातावाबंधवोप्यन्येकन्यांदद्युरथेच्छया ॥ ब्राह्मणानांविवाहोयंनान्यथाकर्तुमक्षयइति ॥ ६८ ॥ तदेतैर्वचनैर्विप्रकन्यायांपुनर्विवाहितायांपातित्यंसंभव-
तीतिसिद्धं नन्वयंकन्यकामात्रस्यदोषउतदत्तुरपीतिविवक्षायांबादरायणआह यःतर्विवाहंयःकन्यांकृत्वाजीवतिभूसुरः ॥ सजीवन्नेवशूद्रस्यान्नात्रकार्याधि-
चारणेति ॥ ६९ ॥ स्मृतिचिंतामणौ विप्रोभूत्वापुनर्यःपरपुरुषधृतांकन्यकांतद्विवाहेकृत्वाजीवेद्विप्रःप्रभवतिपतितोनात्रकार्योविचारः ॥ त्यक्तामेवंबंध-
वोन्येबहिरपिनगरात्तद्धटस्फोटपूर्वंकृत्वाकर्मैवशुद्धाजगतिबहुमताब्राह्मणास्तेभवंतीति ॥ ७० ॥ विस्तरोहेमाद्रौद्रष्टव्यः यदत्रकन्यादानविषयेपूर्वंदातृक्रमे
विचारोव्यवहृतः तदधुनादत्तकस्यविवाहविषयेकन्यास्वीकारेविचार्यते लौगाक्षिः दत्तकस्यविवाहार्थंकुलद्वयमईत्यजेत् ॥ अन्यथायोनिसंबंधंकुरुतेनरकेप-
तेदिति ॥ ७१ ॥ गोभिलोपि कुलद्वयमिदंत्यक्त्वादत्तकोन्यस्यकन्यकां ॥ गृह्णीयादितिनसंदेहःअन्यथानरकेपतेदिति ॥ ७२ ॥ अत्रायंविचारःदत्तकस्यकुल-
द्वयमध्येकन्यकास्वीकारोनयुक्तइतिव्याख्यातंनकेवलंतन्मात्रस्यनिषेधःतत्पुत्रादीनामपितदस्तीतिवृद्धयाज्ञवल्क्यः दत्तकःसप्तपुरुषंपितृवंशेसमुत्थितां ॥
कन्यांस्वीकुरुतेनात्रततऊर्ध्वंगृहीष्यतीति ॥ ७३ ॥ वृद्धमनुः कन्यांस्वीकुरुतेयत्रदत्तश्चेत्साप्तपूरुषं ॥ पितृवंशोत्तांविहायगृह्णीयादितिनसंशयइति ॥ ७४ ॥एवं
स्थितेत्रपुनःसंशयःप्रसक्तः केवलंस्वपितृवंशमात्रस्यकन्यायाःस्वीकाराभावउततत्स्वकीयानामपीतिबादरायणः दत्तकस्तुविवाहार्थंपितुर्गोत्रंपरित्यजेत् ॥ आ-
सप्तपुरुषंतेनकृतेचेत्पतितोभवेदिति ॥ ७५ ॥ ननुकन्यादानाभावेपिहिरण्यवस्त्रादिस्वीकारेअधिकारोस्तिनवेतिचिंत्यते कात्यायनः हिरण्यंवाथवस्त्रंवादत्तको

[illegible] ॥ [illegible] ॥ [illegible]पूर्वभार्यायांसागृहीतुंनशक्यते ॥ सकृद्वानेचसाग्रा[illegible]ब्राह्मणस्यव्यवस्थितारीति ॥ [illegible]
एकस्यकन्या[illegible]तयमन्यएकोगृहीष्यति ॥ [illegible]ग्राह्यकार्योविचारणात ॥ ८२ ॥ गोभिलोपि
कात्यायनः भिन्नमातृजभावेपिद्वेकन्येब्राह्मणोनहि ॥ गृहीष्यतिसकृद्वापिपृथग्वानात्रसंशयइति ॥८३॥ नन्वेकामातृजत्वेतदेतद्युजतांनामाभिन्नमातृजत्वेकथमितिचेत्ब्रूमः
मातृके ॥ तथापितैवतेग्राह्येब्राह्मणेनविजानतेति ॥ ८५ ॥ ननूभयोर्भ्रात्रोर्द्वेकन्येस्तः तेउभयएकोगृहीष्यतिनेतिसंदेहः पैठीनसिः भ्रातृकन्याद्वयंवापिस्वकन्या
द्वितयंतथा ॥ परस्ययःप्रगृण्हीयात्समहापातकीभवेदिति ॥ ८६ ॥ एवंविधवचनजातैःपूर्वदत्तायांमृतायांपुनर्विवाहेप्रसक्तेतदानींद्वितीयकन्यागृहीतुंशक्य
तएवेतिविवेकः वृध्दयाज्ञवल्क्यः मृतायांपूर्वभार्यायाश्वशुरस्यान्यकन्यका ॥ गृह्यतेनात्रसंदेहोनदोषस्तत्रविद्यतइति ॥ ८७ ॥ वृध्दवासिष्ठः यस्यकन्या
पूर्वदत्तामृतायदितदाभवेत् ॥ अन्याकन्यागृहीतैवसंदेहोनात्रविद्यतइति ॥ ८८ ॥ नन्वेकस्मिन्गृहेमंगलकार्यद्वयंपुत्रस्यतनयायाश्चयुज्यतेनवेतिसंदेहः यदाह
संवर्तः एकस्मिन्भवनेतस्यान्मंगला[illegible] ॥ [illegible]पुत्रस्य[illegible]मृत्युमवाप्नुयादिति ॥ ८९ ॥ ननुपुत्रविवाहार्थमन्यगृहंगमिष्यतिस्वकन्यायाः २७]
स्वगृहे[illegible] यदाहमांडव्यः एकस्मिन्[illegible]नोपयुज्यते ॥ तथापियदिकुर्वीतनरकेपरिपच्यतइति
॥ ९० ॥ स्मृतिचिंतामणौ [illegible]मूढोनांदीद्वयंत्वेकगृहेतदाहि ॥ कृतंस्ययमृत्युमुपैतिनूनंवर्षार्धएवेतिविनिश्चयोयामिति ॥ ९१ ॥ नन्वेवं
विधव्यवहारेकस्यचिदावश्यकताप्रसक्तौकथमितिचेत्ब्रूमः गालवः पूर्वेनुरेवतत्कुर्यान्नांदीश्राध्दंनसंशयः ॥ यदित्वावश्यकंकार्यमन्यत्रास्मिन्दिनेभवेदिति
॥ ९२ ॥ नन्वेकगृहेद्वयोःकन्ययोर्विवाहोयुज्यतेनवेतिसंदेहः विदूरथः द्वारभेदेतदाकुर्याद्विवाहद्वितयंममः ॥ भिन्नगेहेनदोषोस्तिशास्त्रमेतद्विनिश्चितमिति
॥ ९३ ॥ विस्तरोहेमाद्रौद्रष्टव्यः एकोदरयोःकन्ययोरेकोदराभ्यांक्रमेणव्युत्क्रमेणविवाहेप्रसक्तेनैकजन्येकन्यएकजन्ययोरितिभगवत्सूत्र[illegible]निर्णीयते य-
दाहलौगाक्षिः एकोदरेतुयेकन्येविवाहःप्रक्रमेस्मृति ॥ तयोरेकोदराभ्यांतुनकर्तव्यंमनेषिभिरिति ॥ ९४ ॥ गोभिलोपि समानोदरजाताभ्यांसमानोदरकन्यके ॥
[illegible] ॥ ९५ ॥ [illegible]
[illegible]
[illegible] ॥ ९६ ॥ [illegible] ॥ परस्परंविवाहेननयुज्येतकदाचने
[illegible]पुरातनामिति ॥ ९७ ॥ तदेताभ्यांवचनाभ्यांद्वयोः
[illegible] ॥ ९८ ॥ कात्यायनः [illegible] परस्परंतुसंबंधोयोनिरूपेणयोभवेत् ॥ क्षात्रियाणामयंधर्मो[illegible]

कर्तव्यताशाखायांकियद्दिनावधीतिवृध्धयाज्ञवल्क्यः शेषाहेनविशुध्दिःस्यादस्थिसंस्कारकर्मणि ॥ शाखायांदशरात्रंस्यान्मातापित्रोर्नसंशयइति ॥१०५॥ न
नुमातापित्रोरेवयद्यपिदशाहाभ्यंतरेतदस्थिलाभोनसंभवीतर्हिकथंकार्यमितिविवक्षायांत्रिकांडमंडनआह अस्थिलाभेसतितद्दाहेनैवविशुध्यति ॥ अलाभेस
तिशाखायांदशाहादूर्ध्वतःस्थितिरिति ॥१०६॥ यदनेनवचनेनयावद्दशाहाभ्यंतरेपुत्रसमागमनंतत्रास्थिसंस्कारःतदूर्ध्वंशाखासंस्कारइतिविवेकः नन्वनेकपुत्र-
विषयत्वंनोपपन्नंतर्हिकथंयुज्यतइतिविवक्षायावृध्दमनुराह एकपुत्रोयदिभवेत्रास्त्यन्यस्यास्थिसंस्कृतिः ॥ स्वयमेवसमागत्यदशाहाभ्यंतरेचरेदिति ॥ १०७ ॥
हारीतः स्मृतिश्चेदेकपुत्रत्वेमातापित्रोर्नसंशयः ॥ दशाहाभ्यंतरेकुर्यात्सुतश्चेदस्थिसंस्कृतिरिति ॥ १०८ ॥ ननुवधूनांसूतकादिविषयःकथमितिविवक्षायांविज्ञ
रथआह दशाहाभ्यंतरेयत्रसूतकंतावदेवहि ॥ वधूनामस्थिसंस्कारेशाखायांदशरात्रकमिति ॥ १०९ ॥ अत्रशाखायांदशरात्रकमित्युक्त्यातदधिकरणत्वे
दकावच्छिन्नत्वेनदशरात्रात्परंमातापितृविषयेदेशांतरादागतेनपुत्रेणशाखासंस्कारेकर्तव्येवधूनांसूतकदशरात्रमितिविवेकः ननुपूर्वंदशरात्रसूतकाचरणेसतिपु
त्रोदिनाविलंबेनदेशांतरादागतश्चेत्तद्वधूनांकथंशुध्दिरितिविवक्षायांनिर्णयदीपेसमुदाहृतं सामान्येसूतकेनेष्टंश्राध्दादिंसंगृहीष्यति ॥ विहाहादीन्यारेस्यज्यबां
धवोवर्ततेतरामिति ॥ ११० ॥ विस्तरोहेमाद्रौद्रष्टव्यइति आनंदगिरिणाप्रोक्तस्मृतिसारसमुच्चये ॥ पूर्णःसप्तमउल्लासोनित्यकांडेशुभावहः ॥ १११ ॥
इतिश्रीआनंदगिरिस्वामिकृतेस्मृतिसारसमुच्चयेनित्यकांडेसप्तमउल्लासः ॥

गणपतिमभिवंदे विघ्नविच्छेददक्षं । परशिवमभिवंदे सर्वमंगल्यहेतुं ॥ गिरिमभिगिरिजातांभक्तियोगेनवंदे । हरिमपिकमलांतांकामितार्थप्रसिद्ध्यै ॥ १॥
सर्वैर्वर्णैः स्वस्वमातापित्रोः प्रतिसंवत्सरंश्राद्धंकुर्वंतीतिलोकवादः लोगाक्षिः प्रतिसंवत्सरश्राद्धंमातापित्रोर्मृतेहनि ॥ कर्तव्यंनात्रसंदेह अन्यथापतितोभवेदि
ति ॥ २ गोभिलः मातापित्रोर्मृताहेतुप्रतिसंवत्सरेवाधः ॥ श्राद्धंकर्तव्यमित्येतदन्यथापतितोभवेदिति ॥ ३ ॥ तत्रहिश्राद्धमुद्दिश्यब्राह्मणानिमंत्रणंपूर्वेद्युस्त
स्मिन्नेवाहनीतिविवक्षायांकात्यायनआह पूर्वेद्युर्निशिगत्वैवब्राह्मणस्यनिमंत्रणं ॥ भोजनांतेप्रकर्तव्यंस्वयंवानिहतोभवेदिति ॥ ४ ॥ त्रिकांडमंडनः श्राद्धमुद्दि
श्यविप्राणांपूर्वेद्युस्तान्निमंत्रणं ॥ कर्तव्यंभोजनादूर्ध्वंततःसन्निहितोभवेदिति ॥ ५ ॥ ननुश्राद्धभोजनार्थंकतिब्राह्मणानिमंत्रणीयाइत्यपेक्षायांवृद्धमनुराह द्वौदै
वेविश्वदेवार्थेत्रीन्पित्रर्थेसमाह्वयेत् ॥ विष्णवर्थमेकंविप्रंचषड्ब्राह्मणान्निमंत्रणमिति ॥ ६ ॥ ननुकतिविधाविश्वेदेवाःसंतीतिविवक्षायांबादरायणआह क्रतुद-
क्षःसत्यवसूपुरूरवार्द्रवौतथा ॥ कामकालौधुनिरोचाविश्वेदेवादशस्मृताइति ॥ ७ ॥ कस्मिन्कर्मणिकौविश्वेदेवावितिविवक्षायांपैठीनसिराह पुरूरवार्द्रवौवै
वौपितृश्राद्धेभविष्यतः ॥ प्रेतश्राद्धेकामकालौधुनिरोचिकावपिहि ॥ ८ ॥ नांदीश्राद्धेसत्यवसूपैत्राच्येक्रतुदक्षकाविति ॥ ९ ॥ ननुश्राद्धेकतिविधाःशाकाः
कर्तव्याइतिविवक्षायांमांडव्यआह वृंताकमथकूष्मांडंकदलींकर्कटीमपि ॥ कंदमूलंप्रशस्तंचकुर्याच्छ्राद्धंयथाविधीति ॥ १० ॥ कंदविशेषानाहविदूरथः अंद-
रीरसकलीकंदंधुवंगोधापत्नीमपि ॥ श्रृंगीमाश्रिशिखांकुर्यात्कंदान्येवविनिश्चितामिति ॥ ११ ॥ आपस्तंबः पटोलंकारवल्लीचतथाकोशातकीमपि ॥ त्रिपर्णीम-
पिकुर्वीतश्राद्धेवन्यान्विवर्जयेदिति ॥ १२ ॥ निषेधशाकउक्तोरत्नेन वृंताकंश्वेतवृंताकंपरित्यजतिनित्यशः ॥ बिंबंवृंताकमेवापिकुर्वीतैवमसंशयइति ॥ १३ ॥
स्मृतिचिंतामणौ सूपवटकभक्ष्यंचअपूपंमुद्गपिंडकं ॥ कुर्वीतैवयथाशास्त्रमन्यद्वैवहृताहृतामिति ॥ १४ ॥ पुनरेवश्राद्धेविशेषविधिर्विविच्यते वृद्धवसिष्ठः द्वौदै
वेपितृकार्येत्रीनेकैकमुभयत्रवा ॥ विष्णुमेकंततःकुर्यादथवाषड्विजायतइति ॥ १५ ॥ हारीतः दैवेपित्र्येवद्वौस्यातांविष्णूर्थेत्वेकमेवहीति ॥ अथवापञ्चवि-
प्रान्कुर्याच्छ्राद्धंकुर्यान्नविस्तरामिति ॥ १६ ॥ तदयमर्थः उभयोर्विश्वेदेवयोरेकविप्रः पितृर्थेएकइत्येकःपक्षः अथवाविष्णुनाश्राद्धत्रयइत्यन्यःपक्षः अथवावि-
श्वेदेवौद्वौपितरस्त्रयः अयमेकःपक्षः विष्णुनासार्धंषड्विजातयइत्यन्यःपक्षः एतेभ्यातिरिक्तयाश्राद्धंविस्तरतयानकुर्यादिति ननुमातुःश्राद्धेपितृस्थापनंकुर्वीत
सोयमाचारोयुक्तोनवेतिसंदेहः पैठीनसिः मातुःश्राद्धेतुसंप्राप्तेपितरंतत्रपूजयेत् ॥ श्राद्धमक्षय्यमेताद्धि नात्रकार्याविचारणेति ॥ १७ ॥ योयमाचारःकृतास्त

ज्येक्रमेणैवश्राध्धेतुपरिवेषणमिति ॥ २४ ॥स्मृतितिलकेपि अन्नंचसूपघृतपायसंचभक्ष्यंचभोज्यंचयथाक्रमेण ॥ देयादिकंतत्परिवेषणंस्यात्तदन्यथाकर्तुर्विनाश
एषामिति ॥ २५ ॥ देवलः देवानांप्रथमकुर्यात्पितृणांतदनंतरं ॥ परिवेषणमत्रेष्टंव्यत्ययेकर्तुनाशनमिति ॥ २५ ॥ यथाचैवविधवचनेनाविनिमयेसति प्राय
श्चित्तंनिर्देष्टव्यमित्यापतति स्मृतिकामधेनौ कूश्मांडंत्रपुसंपटोलकदलीर्वृताकमात्रेरितककोंटीदहनीतथैवमुदितंबिंबंतथोर्वारुकं ॥ शाकेष्वेषुयथाक्रमंसमुदितं
भक्षंचभोज्यंतथासूपापूपघृतंयथेष्टमुदितंश्राध्धेयथावत्फलमिति ॥ २७ ॥ लोगाक्षिः शाकत्रयंप्रकर्तव्यंशाकपंचकमेववा ॥ शाकसप्तकमेवापिनन्यूनंक्रियते
तरामिति ॥ २८ ॥ गोभिलः मुद्गसूपंप्रकर्तव्यमथवाप्याढकीभवेत् ॥ द्वयोरन्यतरंनैवकर्तव्यंतदतःपरमिति ॥ २९ ॥ कात्यायनः वृंताकमथकूष्मांडतथाबिं
बफलंयदि ॥ शाकत्रयंप्रकर्तव्यंनात्रकार्याविचारणेति ॥ ३० ॥ पैठीनसिः अपूपवटकंभक्ष्यंपोरिकापूरिकातथा ॥ फेणिकाचप्रकर्तव्यंपंचभक्ष्यमिदंस्मृतमिति
॥ ३१ ॥ शातातपः फेणिकापूरिकाचापिवटकातिरसीतथा ॥ अपूपानिनिषेधान्याश्यानानियथाक्रममिति ॥ ३१ ॥ त्रिकांडमंडनः नारंगमथजंबीरंरसन-
कंप्रकारयेत् ॥ उपदंशांश्चकदलीव्द्रव्यंशाकफलंनहीति ॥ ३२ ॥ वृध्दगार्ग्यः आज्यंदधिक्षीरमपिप्रधानंप्रणीतयंत्र ॥ श्राध्धेपितृणांतृप्तिस्यादितिशास्त्रस्यानि
श्चयामिति ॥ ३३ ॥ मरीचिः पात्रद्वयंभोजनस्यापकस्यचतुष्टयं ॥ चतुष्कंशाकलस्यापिकदल्यादीतिनिश्चयइति ॥ ३४ ॥ तदेवंविधवचनेजातेभोजनप्रकार

णेनिर्णीते कयातत्रपरिवेष्टव्यमितिविवक्षायांसंवर्तआह भगिनीवास्नुषावापियजमानस्यगेहिनी ॥ अथवाबंधुवर्गस्यभार्यास्युःपरिवेषणइति ॥ ३५ ॥ विस्त
रोदिनकरप्रंथेत्एव्यइतिदिक् श्राध्देदीपादिप्रस्तुतमुपक्रम्यप्रायश्चित्तंनिर्दिश्यते लोगाक्षिः दीपनाशेसमुत्पन्नेश्राध्धकर्तुर्मृतिर्भवेत् ॥ तद्दोषपरिहारार्थंप्राय
श्चित्तंविनिर्दिशोदिति ॥ ३३ ॥ अत्रहिदीपनाशेसतिप्रायश्चित्तंविनिर्दिशेदित्युक्तंकिंतत्प्रायश्चित्तमितिविवक्षायांगोभिलआह मंत्रेणानेनजुहुयादुद्वयंतमसस्प
रि ॥ सामिदाज्यचरूनेवश्राध्धेदीपोविनश्यतीति ॥ ३७ ॥ अत्रहिगोदानंविशेषाविधिमाह त्रिकांडमंडनः गोदानंतत्रकर्तव्यंश्राध्धेदीपोविनश्यति ॥ अन्य
थाकर्तुरेवात्रमृत्युर्निर्दिशतेतरामिति ॥ ३८ ॥ तदनेनदीपनाशप्रायश्चित्तोनिर्दिष्टेहविर्भांडभेदनेकिंतत्प्रायश्चित्तमितिविवक्षायांकात्यायनआह हविर्भांडेतुवि
छिन्नेश्राध्धकर्तुर्मृतिर्भवेत् ॥ कृणुष्वपाजमंत्रेणसामिदाज्यचरून्हुनोदिति ॥ ३९ ॥ अत्रापिगोदानंविवक्षितमेयदाहमांडव्यः हविर्भांडविनाशेपिश्राध्धेगोदान
माचरेत् ॥ अन्यथातस्यदोषस्यहानिर्नास्त्येवनिश्चयइति ॥ ४० ॥ अत्रहिश्राध्धेकर्तुर्ब्राह्मणानांयज्ञोपवीतनाशःकिंतत्प्रायश्चित्तंनिर्दिश्यतइतिविवक्षाय
वृध्दमनुराह श्राध्धभोजनकालेतुविप्राणांकर्तुरेवचा ॥ यज्ञोपवीतनाशश्चेद्गायत्र्याष्टशताहुतिरिति ॥ ४१ ॥ वृध्दयाज्ञवल्क्यः श्राध्धेयज्ञोपवीतस्यविनाशे
सतितत्रहि ॥ गायत्रीमंत्रकोनूनंशतमष्टोत्तरंहुनोदिति ॥ ४२ ॥ क्वचित्श्राध्धेपिंडभेदनेसतिकिंतत्प्रायश्चित्तमितिविवक्षायांजातूकर्णिराह पिंडस्यभेदनेजाते

ध्येनात्रसंशयइति ॥५०॥ त्रिकांडमंडनः उपवासस्तद्दिनेस्याद्विण्मुत्रोत्सर्जनंयदि ॥ कर्तृभोक्त्रोर्नसंदेहःपरद्युःश्राध्धमाचरेदिति ॥ ५१ ॥ अत्राहिपरेद्युः
श्राध्धमाचरेदित्युक्त्यापरदिनेप्रायश्चित्तहोमंविधायगोदानंदत्वाश्राध्धंकार्यमित्यापततीति यदाहवृध्धवसिष्ठः मानस्तोकेतिमंत्रेणपरेद्युःश्राध्धकर्मणि ॥ शतम-
ष्टोत्तरंहुत्वागोदानंतुसमाचरेदिति ॥ ५२ ॥ एतत्कालविषयंविशेषाभिधिः कोयमितिविवक्षायांयेनाविण्मूत्रोत्सर्जनंकृतंतेनपुण्यक्षेत्रंगत्वासागरस्नानेनगायत्रीज-
पपुरश्चरणेनमृत्युर्जेतव्यः अन्यथातिलायुतंकुर्यादितिस्मृतिविदांमतं यदाहवृध्धगार्ग्यः पुण्यक्षेत्रंसमागत्याविण्मूत्रोत्स नेसति॥श्राध्धेतिलायुतंकुर्यान्मृत्युर्येन
प्रशाम्यतीति ॥ ५३ ॥ मांडव्यः अथवात्रिशत्साहस्रंगायत्रीजपतत्परः ॥ मृत्युर्जैष्यत्यसंदेहोविण्मूत्रोत्सर्गकृन्नरइति ॥ ५४ ॥ ननुविण्मूत्रोत्सर्जनप्रायश्चित्तं
जातेवमनमपितादृगेवेति किंप्रायश्चित्तमितिविचिकित्सायांशांडिल्यआह वमनंयदिकुर्वीतश्राध्धेदैवनियोगतः ॥ कर्तावाप्यथभोक्तावातद्दिनेतूपवासकृदि-
ति ॥५५॥ पैठीनसिः श्राध्धेवमनकृद्विप्रस्तद्दिनेतूपवासकृत् ॥ श्राध्धंभुक्त्वाकिंचान्यस्मिन्दिनेतत्रैवसुस्थितइति ॥ ५६ ॥ स्मृतिरत्नाकरे वमनंकुरुतेयदिद्वि-
जः पितृकर्मण्यभितापचोदितः ॥ पुनरेवततःपरेदिनेप्रभुनक्त्वैवसहैवतैर्द्विजैरिति ॥ ५६ ॥ रत्नः कर्तापरस्मिन्दिवसेदत्वागोदानमादरादिति ॥ हुत्वार-
क्षोहणमंत्रंपठित्वापरिमुच्यतइति ॥ ५७ ॥ कण्वः भोक्तामृत्युंजयशांतिंकृत्वागेहेस्वयंद्विजः ॥ विमुच्यतेमृत्युनाशाद्अन्यथानाशमाप्नुयादिति ॥ ५८ ॥ वि-
स्तरोदिलकरश्रेथेद्रष्टव्यइतिदिक् अथश्राध्धेमार्जारादिप्रवेशप्रायश्चित्तंनिर्णीयते यदाहगौतमः मध्यमेषुचदैवानांदेवानांकर्तृमध्यमे ॥ पित्रादित्रयमध्येतुमध्ये
श्राध्धकृदंतरे ॥ ५९ ॥ गच्छंतियदिमार्जारमंडूकाखुरगानराः ॥ वत्सराभ्यंतरेकर्तुर्महारोगमयंभवेदिति ॥ ६० ॥ शातातपः मार्जारादिप्रवेशेतुसमिदाज्यचरू-
न्हुनेत् ॥ शंनइंद्रेतिमंत्रेणकूष्मांडंसतिलादिशेदिति ॥ ६१ ॥ तदेतेनवचनेनमार्जारादिप्रवेशप्रायश्चित्तेसिध्धेक्षालनपात्रस्पर्शेनेकिंप्रायश्चित्तमितिविवक्षायां
मांडव्यआह हस्तप्रक्षालनंपात्रंश्राध्धेसस्पृशतेयदि ॥ उच्छिष्टमेवतत्सर्वंपरेह्नश्राध्धमाचरे-
त् ॥ प्रायश्चित्तंतदाकुर्याद्व्याहृत्यातुशतत्रयमिति ॥ ६३ ॥ गार्ग्यः शतत्रयाहुतिःप्रोक्तास्पृष्ट्वाक्षालनपात्रकं ॥ नचेत्स्पृष्टवानिर्देश्योमृत्युरेवेतिनिश्चयइति
॥ ६४ ॥ ननुप्रागत्राविण्मूत्रोत्सर्जनेप्रायश्चित्तमुक्तमधोवायुनिर्गमनेप्रायश्चित्तंकिमितिविवक्षायांबादरायणआह भोक्ताश्राध्धेतुयोविप्रस्त्वधोवायुंनिनादयेत् ॥
कर्तुर्मृतिर्नसंदेहप्रायश्चित्ततश्चरेदिति ॥ ६५ ॥ हारितः अधोवायोर्निनदनंक्रियतेयेनकेनचित् ॥ श्राध्दे कर्तुर्मृतिप्राप्तौप्रायश्चित्तंसमीरितमिति ॥ ६६ ॥

कितत्प्रायश्चित्तमितिविचक्षायांपैठीनासिराह मूर्धानमितिमंत्रेणसमिदाज्यचरून्हुनेत् ॥ अष्टोत्तरशतंनूनमधोवायुःप्रशाम्यतीति ॥ ६७ ॥ वृद्धयाज्ञवल्क्यः
अधोवायुप्रशांत्यर्थंशांतिहोमंतदाचरेत् ॥ गोदानंतत्रदातव्यंकर्तुर्मृत्यु[illegible]र्विनश्यतीति ॥ ६८ ॥ तत्रयद्यपिश्राध्येभुंजानोमूर्छितोभवतितदाकिंकर्तव्यमितिविव
क्षायांलोगाक्षिराह त्र्यंबकेनमंत्रेणमूर्छितेसतिहोमयेत् ॥ कर्तुर्मृत्युर्विनश्येतनात्रकार्याविचारणेति ॥ ६९ ॥ यद्यपिकयाचिद्विधयाभुंजानोविप्रोमृतःतदाकिं
कार्यमितिविवक्षायांकात्यायनआह श्राध्येभोजनकाद्विप्रःकयापिविधयामृतः ॥ श्राध्यंसर्वंविलुप्तंस्यात्परेह्निश्राद्धमाचरेदिति ॥ ७० ॥ ननुपरेह्निश्रा
द्धमाचरेदित्युक्तंतद्दहनक्रियायाउत्तरंविशेषोस्तिनेतिचिंत्यते गोभिलः श्राद्धेमृतोयदाविप्रःतंविप्रःशास्त्रवद्दहेत् ॥ कर्तव्यामंत्रसंस्कारःआपोहिष्ठेतिमंत्रतइति
॥ ७१ ॥ ननुतत्गृहेविप्रमृतेर्यजमानस्यश्राद्धमनुचितंगृहसूतकसत्वादितिचेन्न एकरात्रेणैवसूतकनिवृत्यापंचगव्येनशुद्धेःयदाहशाट्यायनिः पंचगव्येनसंशु
द्धिःपरेद्युःश्राद्धमाचरेत् ॥ मृतेविप्रेनसंदेहस्तत्स्थानेन्यंनियोजयेदिति ॥ ७२ ॥ नन्वेतस्यमहदरिष्टतयायजमानेनकिंकर्तव्यमितिविवक्षायांस्मृतिचिंतामणा
वुक्तं होमंपरेन्ह्यत्रविधायमंत्रेणाष्टाक्षरेणैवसमिद्धिपूर्वं ॥ गोदानमप्याशुविधायकुर्यात्श्राद्धंयथावत्परविप्रयुक्तइति ॥ ७३ ॥ स्मृतिरत्नाकरे श्राद्धेदीपोविन
श्येद्यदिसुरपितृमध्येतुमार्जारयोगेभुंजानेमूर्छितेवानिधनमुपगतेश्राद्धकालेद्विजेतु ॥ कर्तापोष्याह्नितस्मिन्नथपरदिवसेनिष्कृतिंतस्यकृत्वाश्राद्धंकुर्याद्विजोक्त्या
विधिवदथपुनर्वाचयेदाशिषश्चेति ॥ ७४ ॥ विस्तरस्तुदिनकरग्रंथेद्रष्टव्यइत्यादिक अधुनाश्राद्धपरिभाषानिर्णीयते अक्षताश्चतिलादर्भाःपात्रंपुष्पाण्यतःपरं ॥
समिधश्चतथाज्यानिश्राद्धसामग्र्यईर्यतइति ॥ ७५ ॥ ब्राह्मणादिस्वरूपकथनंप्रागेवनिर्णीतं तथापिकिंचिदुच्यते गोभिलः श्रोत्रशीलादिसंपन्ना
मध्येवयसिसुस्थितः ॥ विवाहितोद्विजोयस्तुश्राद्धयोग्यःसईर्यतइति ॥ ७६ ॥ ननुयजमानगेहिनीयदिऋतुस्नातासापंचमेह्निश्राद्धयोग्यानवेति
संदेहः कात्यायनः ऋतुस्नातातुयानारीपंचमेह्नियदाभवेत् ॥ साश्राद्धपाकयोग्यास्यान्नात्रकार्याविचारणेति ॥ ७७ ॥ ननुश्राद्धेपि
तृनुद्दिश्यवर्गत्रयेएकापिंडाविधानमुतापिंडत्रयाविधानमितिसंदेहः त्रिकांडमंडनः एकपिंडाविधानंवापिंडत्रयविधानता ॥ पारंपर्येणनिर्दिष्टंनात्रकार्याविचारणेति
॥७८ ॥ननुपिंडविधानकेनद्रव्येणेतिविवक्षायांपैठीनासिराह गोधूमपायसोपेनमध्वांपिंडेनयोजयेत् ॥ घृताक्तंचरुदंकुर्यान्मंत्रतस्तांनिवापयेत्॥ ७९॥ ननुश्राद्धेकेनद्र
व्येणपायसंकार्यंउपगोधूमेनेतिसंदेहःसंवर्तः शालीतंडुलगोधूमेश्चणकैरपिकारयेत् ॥ परमान्नंततःश्राद्धेपितृणामक्षय्यंभवेदिति ॥ ८० ॥ ननुश्राद्धेकानिपुष्पा-

ष्यत ब्राह्मणानामर्चनायांश्राद्धप्रोक्षणेसंशयइति ॥ ८६ ॥ त्रिकांडमंडनोपि स्मृतिक्रमेणकर्तव्य [illegible]
॥ ८७ ॥ ननुमातापित्रोरनुगमनेसतिकथंकार्यमितिसंदेहः वृद्धयाज्ञवल्क्यः सहसंगमनंयत्रमातापित्रोर्मृतेहनि ॥ ऐक्यंश्राद्धप्रकर्तव्यंपितृपूर्वंतदिष्यतइति
॥ ८८ ॥ वृद्धवसिष्ठः ऐक्यंतुश्राद्धमुद्दिष्टंपित्रोःसंगमनेयदि ॥ पितृपूर्वंप्रकर्तव्यंश्राद्धमेतद्विनिश्चयइति ॥ ८९ ॥ नन्वेककर्तृकश्राद्धेपाकभेदोस्तिनेतिसंदेहः
विदूरथः पाकभेदोनकर्तव्योहविरेवपृथक्पृथक ॥ पिंडस्यस्थापनेचैवमंडलंत्वेकमिष्यतइति ॥ ९० ॥ पैठीनसिः पाकश्चमंडलंचापिनपृथक्क्रियतेतरां ॥ ह-
विरेकंपृथक्कार्यंश्राद्धेस्यादेककर्तृकइति ॥ ९१ ॥ ननुपुत्रहीनायांविधवायांमातापित्रोःभर्तुश्चश्राध्धेप्रसक्तेरजस्वलायांसत्यांकथंकार्यमितिसंदेहः मांडव्यः पं
चमेह्निप्रकर्तव्यंविधवाचेद्रजस्वला ॥ मातापित्रोर्भर्तुरपिश्राध्धमेतन्नसंशयइति ॥ ९२ ॥ संवर्तः पुत्रहीनातुविधवामातापित्रोर्मृतेहनि ॥ भर्तुर्वापंचमेचाह्नि
प्रकरिष्येत्यसंशयइति ॥ ९३ ॥ ननुविभक्तानांश्राध्धमेकत्रभवतिवानवेतिसंदेहः जाबालिः विभक्तानांपितृश्राध्धंपृथगेवविधीयते ॥ क्वचिद्देशेनसर्वत्रश्राध्ध
मेतद्विनिश्चितमिति ॥ ९४ ॥ वृध्धमनुः विभक्तानांयदिभवेत्पितृश्राध्धंसमागतं ॥ एकत्वेतुविशेषोहिकृताकृतमिहेष्यतइति ॥ ९५ ॥ ननुदत्तकस्यमातापितृ [३१]
श्राध्धंकर्तव्यंनवेतिसंदेहः गौतमः दत्तकस्यपितृश्राध्धेपितृशेषस्यभोजनं ॥ लभ्यतेयदिनश्राध्धमन्यथाक्रियतेतरामिति ॥ ९६ ॥ अत्रिरपि पितृश्राध्धेतुसं
प्राप्तेदत्तकःप्रभुनक्त्यसौ ॥ पितृशेषंनचेत्कुर्याछ्राध्धंचस्वयमेवात्विति ॥९७॥ विस्तरोनिर्णयतरांगण्यांद्रष्टव्यइतिदिक् अधुनाश्राध्धानयमोविविच्यते पादप्रक्षा-
लनादूर्ध्वंय मानस्यप्रथमंश्राध्धगेहप्रवेशउतविप्राणामितिसंदेहः लोगाक्षिः श्राध्धगेहाभिगमनंविप्राणांप्रथमंस्मृत ॥ भोजनांतेसमुद्दिष्टंकर्तुःपश्चात्समीर्यत

इति ॥ ९८ ॥ गोभिलोपि यजमानःश्राध्धगेहमारंभेव्रजतेतरां ॥ भोजनांतेबहिर्विप्राव्रजेयुर्नात्रसंशयइति ॥ ९९ ॥ ननुप्रायश्चित्तंपिंडस्थापनात्पुरोतिसूत्रकृ-
तोक्तंयेनकेनाचिदुक्तंतत्रसंशयउदेतीति कथंनिर्णयइतिचेत्ब्रूमः कात्यायनः श्राध्धेसंकल्पमारभ्ययावदुद्वासनंभवेत् ॥ प्रायश्चित्तंतुतन्मध्येविधिलोपोभवि-
ष्यतीति ॥ १०० ॥ त्रिकांडमंडनोपि यावदुद्वासनंप्रोक्तंप्रायश्चित्तंतुमध्यमे ॥ संकल्पादिंपराकृत्वाशास्त्रमेवंविनिश्चितमिति ॥ १०१ ॥ ननुविधवायाःश्राद्ध
विषयेब्राह्मणार्चनानंतरंरजस्वलाविषयेश्राद्धनिर्णयःकथमितिचिंत्यते पैठीनसिः बहिर्गतास्वयंभूत्वाविधवाचेद्रजस्वला ॥ श्राद्धशेषंप्रगृण्हीयात्श्राध्धमध्यय-
दाभवेदिति ॥ १०२ ॥ शाट्यायनिः योवाकोवाथवाकाचित्तदीयाश्राध्धशेषकं ॥ रजस्वलायांकुलेश्राध्धशेषंभुनक्त्यसावति ॥ १०३ ॥ ननुश्राध्धेचित्रगुप्तं
नस्थापनीयमितिकेचिदाहुस्तदेतद्युज्यतेनवेतिसंदेहः वृध्धयाज्ञवल्क्यः चित्रगुप्तस्यकरणंब्राह्मणस्यविधीयते ॥ तदभावेकर्मलोपोब्राह्मणस्याविनिश्चयइति ॥
॥ १०४ ॥ वृध्धवसिष्ठः नैमित्तिकयादिभवेच्चित्रगुप्तंनकारयेत् ॥ नित्यत्वेसतिबाधोयंब्राह्मणत्वस्यहानिकृदिति ॥ १०५ ॥ वृध्धगार्ग्यः चित्रगुप्तस्यतुबालिगो-
[illegible] ॥ यदित्यजतिसद्यात्मारौरवंनरकंव्र

पैनिसिः पकैरामैर्हिरण्यैश्चब्राह्मणक्षत्रियोविशः ॥ काम्यश्राध्वंप्रकुर्वीतिविधिलोपोनविद्यतइति ॥ ११७ ॥ ननुविधवानांकाम्यश्राध्यमस्तिनवेतिसंदेहः वि-
ज्ञस्थः भर्तृमात्राधिकारोस्तिश्राध्येतुविधवायदि ॥ काम्यश्राध्येनाधिकारोह्यारलोपाद्विहन्यतइति ॥ ११८ ॥ गार्ग्यः ह्यारलोपोयदिभवेदाधिकारःकथंभवेत् ॥
विधवायानाधिकारःकाम्यश्राध्येनसंशयइति ॥ ११९ ॥ स्मृतिर्चिंतामणौ पित्रादित्रितयंतृतोनिगदितंमातृत्रयंतत्परं । तूर्ध्वंतत्रनिवेश्यतेविधितयामातामहा
दित्रय ॥ तस्मादेवापितुःसहोदरतयास्वस्यापिसंकीर्त्यते । तस्मादूर्ध्वमिमाभागिन्यउदितासंकल्पएवंक्रमादिति ॥ १२० ॥ रत्नः पित्रादित्रितयंपूर्वमात्रादित्रि
तयंपरं ॥ मातामहादित्रितयंसपत्नीकंसमीर्यतइति ॥ १२१ ॥ गालव वर्गत्रयंसमुद्दिश्यत्वेकैकंविप्रमर्चयेत् ॥ अन्येषांचेद्बहूनांस्यादेकोनश्राध्यविस्तरमिति
विस्तरोदिनकरग्रंथेद्रष्टव्यः आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये ॥ पूर्णोऽप्यष्टमउल्लासोनित्यकांडेशुभावहः ॥ १२२ ॥ इ. आ. स्मृ. नि. अ. उ. ॥

सख्खायंविघ्नराजस्यकुमारंनौमिसादरं ॥ गिरिजांगिरिजाकांतंसदारंहृदयेभजे ॥ १ ॥ नित्यविधिमुद्दिश्यब्राह्मणेनदेवतार्चनकर्तव्योतिवस्तुगतिः लोगाक्षिः
नित्यमेवतुकुर्वीतब्राह्मणोदेवतार्चनं ॥ सूतकमृतकंहित्वाकुर्वीतैवनसंशयइति ॥ २ ॥ यदत्रलोगाक्षिस्मृतौसूतकंमृतकंहित्वेत्युदाहृतंतदेतदभिप्रायमनूद्यपू-
र्वमेवानित्येबाधकाभावइत्युक्तंतेनेदमत्रनिर्धार्यते येसूतार्किनोनभवंतितैर्नित्यकरणाभावेनैमित्तिकविषयेसूतकांनिधार्यमेवेति सातातपः सूतकंसंपरित्यज्यब्रा
ह्मणोयेन्यतांलभेत् ॥ तेनपूजाप्रकर्तव्यागार्हस्थ्येसमनुष्ठितइति ॥ ३ ॥ इदानीमत्रव्यवहारब्रूमः पराशरः क्रियतेपंचमूर्तीनांपूजासंपुज्यसंधिता ॥ शि
लायामेवलभ्येततस्यांचित्पुण्यगौरवादिति ॥ ४ ॥ गार्ग्योपि शिवंविष्णुगणपतिंदुर्गांरविमतःपरं ॥ पंचैतान्पूजयेन्नित्यंनात्रकार्याविचारणेति ॥ ५ ॥ अत्रैते
षांपंचमूर्तीनांदेवानांसंपुटपूजायांव्यवहारःप्रसक्तःएतदाहवृद्धमनुः शालग्रामंतुगंडक्यांनर्मदायांशिवंतथा ॥ गणेशंशोणभद्रायांगृण्हीयाद्विजपुंगवइति ॥ ६ ॥
संवर्तः भानुमत्यांरविंविप्रःकुमुद्वत्यामजःपरं ॥ दुर्गांगृण्हीतयत्नेनपूजयेत्यंचदेवताइति ॥ ७ ॥ मांडव्यः रविर्वाषण्मुखोवापिमूर्तयःपंचदेवता ॥ पूजनी-
याःप्रयत्नेनसंपुटेनात्रसंशयइति ॥ ८ ॥ अत्रायंरविर्वाषण्मुखोवेतिवाथाविकल्पउक्तः षण्णांदेवतानांसंपुटपूजायांकिंबाधकमितिचेन्नसर्वत्रतुतथैवांगीकारात
एतदाहकश्यपः संपुटेपंचमूर्तीनांपूजानित्यशुभावह ॥ व्यतिरेकंप्रकुरुतेदौर्भाग्यंलभतेनरइति ॥ ८ ॥ एतेनसंपुटपूजायांपंचैवदेवताःपूज्याइतिविवेकोव्यवति
ष्ठते पंचमूर्तौपूजाविधानमुद्दिश्यसंपुटविषयतयापुष्पविधिनिर्णीयते व्यासः नाक्षतैःपूजयेद्विष्णुंनतुलस्यागणाधिपं ॥ नदूर्वयार्चयेत्दुर्गांनकेतक्यासदाशिव
मिति ॥ ९ ॥ ननुपुष्पाणांदेवतांतरविरोधितयाकथमेकत्रसंगच्छतइतिचेत्ब्रूमः वसिष्ठः तत्तत्पत्रैश्चदेवानांपुष्पैश्चपरिपूजयेत् ॥ संपुटेसर्वपत्रैश्चपुष्पैश्चपरि
पूजयेदिति ॥ १० ॥ अत्रायंव्यवहारःपृथक्देवानांभेदव्यवस्थितेर्युक्ततरतेषांपरस्परमेलनेसाधारणतयासमावायेपुष्पाभ्युच्चयइतिनिषेधानुपपत्तिः एतदाह
मरीचिः संपुटेसर्वदेवानांसमवायेयथाभवेत् ॥ पुष्पभेदोनतत्रास्तिसंपदस्युःपरस्परमिति ॥ ११ ॥ ननुपंचमूर्तिपूजाविधौकस्यप्रथमतःपूजेतिविवक्षाक्रिय-
तेएतदाहमांडव्य सर्वदेवाविरोधेनगजास्यप्रथमंयजेत् ॥ ततःशिवंततोविष्णुंरविंदुर्गांततोयजेदिति ॥ १२ ॥ स्थापनेक्रमोयंवेदितव्यः एतदर्थंगार्ग्यवचनांम-
ध्येगणपतिस्थाप्यःशिवोविष्णुस्ततःपरः ॥ रविश्चदुर्गाचत्वारोदेवास्तपरितःक्रमादिति ॥ १३ ॥ केप्याहुः यस्ययोयमभीप्सितोदेवःसमध्येस्थाप्यइति तदेत
दनुपपन्नंव्यतिक्रमाद्दोषापत्तेः एतदाहजाबालिः व्यतिक्रमंप्रकुरुतेगजास्यंकुपितोयदि ॥ विघ्नराशिंप्रपद्यैवसनश्यतिनसंशयइति ॥ १४ ॥ एतेनमहागणप तेः

मिति ॥ १९ ॥ ततःउषःकालेसमुत्पन्नेशौचाचारंकुर्यादितिशाट्यायनिः ग्रामाद्धनुःशतंगत्वावस्त्रप्रावृत्तमस्तकः ॥ शौचाचारंप्रकुर्वीतदिशोनैवावलोकय
न्निति ॥ २० ॥ गार्ग्यः स्नायातीर्थेपुण्यनद्यांततःसूर्योदयेसति ॥ विवस्वतेर्घ्यंप्रदिशेछास्त्रमेतद्व्यवस्थितामिति ॥ २१ ॥ भरद्वाजः रुद्राक्षधारणंकंठेभालेभ-
स्मात्रिपुंड्रकं ॥ जपकालेव्यवस्थानंब्राह्मणस्यैवनिश्चयइति ॥ २२ ॥ लोगाक्षिः मध्यान्हकालेकुर्वीतशिवपूजांयथाविधि ॥ सायाह्नेस्तोत्रपाठश्चब्राह्मणस्यव्यव
स्थितिरिति ॥२३ ॥ गोभिलः प्रातर्मध्याह्नयोःस्नानंगृहस्थस्यविधीयते ॥ सायान्हेनैवनित्यंस्यात्कृताकृतमिदंस्मृतामिति ॥ २४ ॥ वस्तुतस्तुब्राह्मणस्यात्रिष
वणस्नानंयुक्तंयद्यशक्यंमध्यान्हेस्नानंकुर्यादितिविवेकः अन्यथागृहकृत्यादेःपूजासामग्रीसंग्रहस्यापिविलुप्ततापत्तेः एतदाहमरीचिः नित्यंत्रिषवणस्नानंगृहस्थ
स्यविधीयते ॥ अलाभेसतिमध्यान्हेस्नानमत्रप्रशस्यतइति ॥ २५ ॥ यद्युपरागादिपुण्यकालःप्रसक्तस्तदातत्कालेस्नानंकर्तव्यमेवयदाहदक्षः उपरागनिमित्तंतु
स्नानंयदिसामिष्यते ॥ तत्कालएवकर्तव्यंनैमित्तिकमिदंस्मृतामिति ॥ २६ किंबहुनेत्युपरम्यतेअत्रगृहस्थाचारप्रवृत्यागृहस्थेनवैश्वदेवःकार्यइतितद्विधिर्निर्णी
यते व्यासः मध्यान्हेवैश्वदेवाख्यंकर्मकृत्वासमेधते ॥ गृहस्थोयेनतत्कालेकर्तव्यमितिनिश्चयइति ॥ २७ ॥ अत्रहितत्कालेकर्तव्यमित्युक्तपूर्वपरामर्शेनमध्या

न्हकालेवसीयतेकालनिर्णयप्राग्व्यवहृतः ननुतत्कालेविनिमयेकःप्रत्यवायइत्याशंकायांलोगाक्षिराह मध्यान्हकालमुल्लंघ्यवैश्वदेवंकरोतियः ॥ राक्षसास्तस्य
विहृत्वामोदंतइतिनिश्चयइति ॥ २८ ॥ गोभिलोपि मध्यान्हकालेकर्तव्यवैश्वदेवाख्यकर्मत् ॥ अपराण्हेयःकरोतिसपतेन्नात्रसंशयइति ॥ २९ ॥ नन्वप
राण्हकालोनिषिध्यतान्नामसंगवकालःकुतोनगृह्यतइतिचेन्न वसिष्ठः ननिमित्तंविनात्याज्यंमध्याह्नेवैश्वदेवकं ॥ निमित्तान्तरतोयत्रकृतंनैवप्रकुप्यतीति ॥ ३० ॥
अत्रनिमित्तांतरतोनदुष्यतीत्युक्त्याद्वादशीपारणविषयेग्रहणविषयेश्राद्धविषयेपिकालातिक्रमोनदोषइतियुक्तिघटितोयव्यवहारः एतदाहगालवः द्वादश्यांग्रह
णेप्राप्तेपैतृकेयद्यतिक्रमः ॥ वैश्वदेवेनदोषोस्तितत्कालोलंघनंभवेदिति ॥३१ ॥ नुनुवैश्वदेवकर्मणःकेतेदेवाःसप्रतीताइतिविचक्षायांशाट्यायनिराह सूर्यःप्रजा
पतिःसोमोवनस्पतिरतःपरः ॥ अग्निषोमावथेंद्राग्नीद्यावाभूमिततःपरं ॥ ३२ ॥ धन्वंतरिरथेंद्रश्चाथविश्वेदेवास्ततःपरं ब्रह्मावदेवाःकथिताश्चतुर्थ्यंतैर्नमोंतकैः॥
स्वाहांतैर्मंत्रवर्गैश्चहोतव्यास्युःप्रयत्नतइति ॥ ३३ ॥ यद्यपिसूर्यप्रजापत्यग्नीनांक्रमाद्वचनांतरंप्रतीतिरस्ततथापिसोमस्यैवप्राशस्त्यंएतदाहहारीतः सूर्यःप्रजाप
तिःसोमस्त्रयएतेभवंत्यमी ॥ नवान्हिरत्रसंग्राह्योवैश्वदेवाख्यकर्मणीति ॥ ३४ ॥ विस्तरोगृह्यप्रकाशिकायांद्रष्टव्यइतिदिक् अधुनाकस्यचिद्देहिनोभार्यायांय-
मलजननेजातेतच्छांतिविधिरुच्यतेगोभिलः युग्मप्रसवसंबंधेमातापित्रोररिष्टता ॥ तदस्यपरिहारार्थंशांतिंकुर्वीतयत्नतइति ॥ ३५ ॥ लोगाक्षिः शांतिंकुर्वी
तयत्नेनयुग्मस्यजननेसति ॥ गोमुखप्रसवंकृत्वाततःशांतिर्विधीयतइति ॥ ३६ ॥ ननुगोमुखप्रसवंकृत्वाशांतिर्विधीयतइत्युक्तंकीदृशोगोमुखप्रसवइतिविव

प्रसूतिसपदितदनुक्त्वाशांतिहोमंयथाविद्शांतिचशुभदांगाद्दक्षिणांब्राह्मणेभ्यइति रत्नः यमलारिष्टनाशायब्राह्मणान्भोजयेन्मुदा ॥ भक्षभोज्यादिभिःस्वेष्टैःस
र्वोरिष्टंविनश्यतीति ॥ ४३ ॥ एतदनुरोधनविवरणाविभवानुरोधेनवेदितव्यं एतदाहजाबालिः वित्तसत्वेशांतिहोमेवंचनंकुरुतेनरः ॥ सदीर्घरोगमाप्नोति
नात्रकार्याविचारणेति ॥ ४४ ॥ विस्तरोदिनकरग्रंथेद्रष्टव्यइतिदिक् ग्रामाधिष्ठानदेवतामुद्दिश्यविशेषविधौप्रायश्चित्तंनिर्दिश्यते व्यासः देवालयस्यमध्ये
तुभषकःप्रविशेद्यदि ॥ तद्दोषपरिहारःकःप्रायश्चित्तेनसंयुतः ॥ ४५ ॥ अघोरास्त्रेणजुहुयात्पायसंसर्पिषासमं ॥ तद्दोषपरिहारस्यादितिशास्त्रस्यनिश्चय
इति ॥ ४६ ॥ पैठीनसिः देवतोत्सवकालेतुकरदीपःप्रणश्यति ॥ पतेद्वायदिभूमौतुकिंप्रायश्चित्तमीर्यते ॥ ४७ ॥ गोमयेनविशुध्यैवभूमितत्रचहोमयेत् ॥-
आग्नेयास्त्रेणमंत्रेणसमिदाज्यचरून्हुनेदिति ॥ ४८ ॥ देवलः वाद्यमानेतुप्रणवेदंडस्तुप्रपतेद्यदि ॥ वायव्यास्त्रेणमंत्रेणसमिदाज्यचरून्हुनेदिति ॥ ४९ ॥ शा
तातपः ध्वजःप्रतिहितोयत्रप्रपतेदुत्सवांतरे ॥ तदापाशुपतास्त्रेणसमिदाज्यचरून्हुनेदिति ॥ ५० ॥ जाबालिः रथोत्सवस्यसमयेकलशःप्रपतेद्यपि ॥ महा
शांतिप्रकुर्वीततद्दोषविनिवृत्तयइति ॥५१॥ ननुमहाशांतिप्रकुर्वीतेत्युक्तंसकीदृशइतिविवक्षायांविष्णुर्बृध्धांगिरसआह द्रविणोदाइतिद्वाभ्यांनमोमहद्भ्यइत्यपि ॥
शंनोदेवीतिमंत्रेणसमिदाज्यचरून्हुनेदिति ॥ ५२ ॥ कात्यायनोविशेषमाह लक्षेणविल्वपत्रेणमूलपंचाक्षरेणतु ॥ होमयेद्दशसाहस्रमथवानिष्कृतिर्भवेदिति
॥ ५३ ॥ ननुबहुधासुशांतिषुसमानरूपतायांप्रसक्तायांकिमस्याकाधिक्यमितिचेत्ब्रूमः सुप्रदागते रथोत्सवस्यसमयेकलशंप्रपतेद्यदि ॥ राजाराष्ट्रंविनश्येत
नात्रकार्याविचारणेति ॥ ५४ ॥ ननुदेवालयकलशपतनेकिंप्रायश्चित्तमितिविवक्षायांमनुराह नवोनवोइतिद्वाभ्यांयुंजानःप्रथमंमतः ॥ समिदाज्यचरून्हुत्वा
तद्दोषःपरिशाम्यतीति ॥ ५५ ॥ अत्रविशेषमाहगार्ग्यः देवालयस्यकलशंपतितंयदिनश्यति ॥ राजाराष्ट्रादिकंसर्वंतस्माच्छांतिंप्रकारयेदिति ॥ ५६ ॥ वृध्ध
वसिष्ठः नालीकेरंचकदलींबिल्वपत्रंसहैवतु ॥ त्रैयंबकेनमनुनालक्षहोमंसमाचरेदिति ॥ ५७ ॥ अत्रगोदानादिविधानंस्मृतिचिंतामणावुक्तं कलशमभिपतेच्चे
द्राजराष्ट्रस्यहानिःशिखरनिहितमेतच्छांतिमत्रप्रकुर्यात् ॥ सघृततिलसमेतंलक्षबिल्वंतुहुत्वादिशांतिचहवनांतेगोप्रदानंद्विजायेति ॥५८॥ इनोधिकाविवक्षायां
भट्टभास्करीयेस्थितिताराविसंतोष्टव्यमायुष्मता कृत्तिकादित्रिपान्नक्षत्रस्मृतौगोहिनोगृहारिष्टमिततच्छांविधिरुच्यते गार्ग्यः पुनर्वसूतथेंद्राणीमूलभंपरथोत्तरा ॥
पूर्वाभद्राइमास्ताराःत्रिपात्ताराःप्रकीर्तिताइति ॥ ५९ ॥ नारदः आदित्याक्रांतभंयत्रअंतरागणयेच्चतुः ॥ बहिस्त्रीन्गणयेद्यत्रमृत्युरत्रप्रतिष्ठितइति ॥६०॥ वासिष्ठः

त्रिपान्नक्षत्रमत्रस्याद्गणनायांयदंतरा ॥ तद्गेहेरिष्टमुदितंमृतेसतिनसंशयइति ॥ ६१ ॥ अत्राहिमृतेसतिसंशयइत्युक्त्यामरणनिमित्तमेवशांतिरिति प
गुरुः मंगलंतत्गृहावासंपरित्यज्यतुकारयेत् ॥ शांतिमुक्तिविधानेनतदरिष्टंप्रशाम्यतीति ॥ ६२ ॥ ननुएतदरिष्टंप्रशाम्यतीत्युक्तंकिमिदमरिष्टमित्याशं
कश्यपआह त्रिपान्नक्षत्रमरणेशांतियोनकरोतिच ॥ न गेहेवासंत्यजतिसकुटुंबंविनश्यतीति ॥ ६३ ॥ अतएवावश्यंशांतिःकर्तव्येतिवस्तुगतिः शांति
ग्रंथेतिविवक्षायांबादरायणआह स्थंडिलोल्लेखनंकृत्वावह्निंसंस्थाप्ययत्नतः ॥ मृत्युशांतिविधानेनशांतिंकुर्यात्प्रयत्नतइति ॥ ६४ ॥ मंत्रःपराशरे
परंमृत्योभवेन्मंत्रःसमिदाज्यचरून्हुनेत् ॥ मृत्युशांतिरियंप्रोक्तागेहारिष्टंविनश्यतीति ॥ ६५ ॥ भरद्वाजः तिलांजुहोतिमंत्रेणत्र्यंबकेणयथाविधि ॥
चजुहोत्येवशंतःपर्जन्यइत्यतइति ॥ ६६ ॥ गालवः कृसरंनजुहोत्यंतेगोदानंचप्रयच्छति ॥ मृत्युर्नश्यतितद्गेहेमृत्युशांतिर्यतोभवेदिति ॥ ६७ ॥ विस्त
तकरग्रंथेद्रष्टव्यइतिदिक् मृत्युशांतिनिर्णयानंतरमद्भुतशांतिनिर्णयोव्याख्यायते गार्ग्यः वाल्मीकयादिचोत्पन्नासिलींध्रमथवाभवेत् ॥ मधुपाक्षिसमुत्पाि
गृहेद्भुतदर्शनमिति ॥ ६८ ॥ नारदः माहिषःप्रविशेद्यत्रवानरःप्रविशेद्यदि ॥ वायसःप्रविशेद्वापितत्गृहेद्भुतदर्शनमिति ॥ ६८ ॥ शौनकः सौरभेयप्र
मंडूकेवान्हिपातनं ॥ वनप्राणीप्रवेशोपितत्गृहेन्दुतदर्शनमिति ॥ ७० ॥ एतत्फलमाहकात्यायनः अद्भुतंजायतेयत्रतत्गृहेमृत्युवासता ॥ पक्षत्रयप
ततःशांतिंसमाचरेदिति ॥ ७१ ॥ वृद्धवसिष्ठः पक्षत्रयंगृहंत्यक्त्वाशांतिरद्भुतदर्शने ॥ अन्यथातत्गृहेमृत्युर्ध्वंसत्येवास्थितान्जनमिति ॥ ७२ ॥ वृद्धयाज्ञव
यजमानोथतत्पत्नीतत्पुत्रोभ्रातरोपिच ॥ तेषामन्यतमस्यैवनाशःस्यादद्भुतेसतीति ॥ ७३ ॥ तदेवंव्यवहारेणमृत्यौसूचितेसतितत्परिहारायाद्भुतदर्शनेपक्ष
शेनगृहपरित्यज्यततःशांतिहोमःकार्यइतिनिष्कलुषार्थः तदाहदेवलः शांतिंकुर्वीतयत्नेनगृहेत्यद्भुतदर्शने ॥ स्वस्यवित्तानुसारेणनचेन्नश्यत्यसंशयइति ॥
गोभिलोपि अद्भुतंयत्गृहेजातंतत्गृहेमृत्युसंस्थितिः ॥ स्वस्यवित्तानुसारेणशांतिंकुर्वीतयत्नतइति ॥ ७५ ॥ शांतिप्रकारोवृद्धमनुनोक्तः गायत्र्याचैव
नांतिलंत्र्यंबकेणतु ॥ समिदाज्यचरूनत्ररुद्रगायत्र्याहुनेदिति ॥ ७६ ॥ वृद्धपराशरः पालाशःसमिधोह्यन्नपायसंकृतरान्नकं ॥ रुद्रानुवाकतोहुत्वा
षःप्रशाम्यतीति ॥ ७७ ॥ आश्वलायनः सतिलमाज्यंत्र्यंबकेणरुद्रगायत्र्यागोधूमंरुद्रानुवाकेनपायसंसमिदाज्यचरून्संवातिरेभिर्हुत्वामृत्युमुक्तोभवत
ध्यायनोति समिदाज्यचरून्हुत्वानमस्तेरुद्रमन्यव ॥ तिलंत्रियंकाधुत्वामृत्युदोषात्प्रमुच्यतइति ॥ ७८ ॥ स्मृतिचिंतामणौ यत्रैवप्रभवेत्गृहेद्भुतावधिस्त्य

क्षिपेद्यशास्त्रंगतार्थनिश्चयइति ॥ ८८ ॥ स्मृतिचिंतामणौ तत्कालवन्हिमेधप्रमाथतमापन्नेद्यसंबाधनानामीपिकृत्वातदीयशवमापपार्गतोभस्मनैवांविकीर्य ॥ तद्वान्हितत्रनीत्वायदापापतृचनंतेनदग्ध्वायथावत्सर्वेदेबंधवःस्युर्जगातिसुक्तातनोप्याहितोग्नेविधानमिति ॥ ८९ ॥ यदत्रविशेषोनिर्णयदीपिकायामवसीयतइत्यवसीयते अधुनापरिव्राड्विधिरुच्यतेलौगाक्षिः परिव्राड्यदिमुक्तोसौनाद्विधिःपरिकथ्यते ॥ मंत्रेणाविरजाहोमंकृत्वातुनिखनेद्बुधीति ॥ गोभिलः परिव्राड्यदिकालेनमुक्तोभवतितत्कथं ॥ तदंत्यकालेतुविधिःकर्तव्यइतिचशृणु ॥ ९०॥ कृत्वैवविरजाहोमंतदंगेभस्मलेपनं ॥ कृत्वाद्वादशभिर्मंत्रैर्विष्णुसूक्तमुखोद्गतैः॥ तदैवनिखनेद्भूमौशास्त्रमेवंविधीयतइति ॥ ९१ ॥ वृद्धमनुः कर्मदिनोमृतौसत्यांतुलसीमालिकांदृढां ॥ तत्कंठेचैवसंबध्यनिखनेद्भूतलेततइति ॥ ९२ ॥ ध्यानमालंबिकायोगरूपेणऊर्वोःपादौविनिक्षिपेत ॥ करयोरंजलौबंधंकारयेत्समयेसतीति ॥ ९३ ॥ हारितः सहस्रनालिकेरैश्चशिरोभेदनमाचरेत्॥अथवाशनैर्मिथंतद्घर्मोप्रकारयेदिति ॥ ९४ ॥ भरद्वाजापस्तंबः परिव्राण्मृतौविष्णुसूक्तेनाभिपच्यविरजाहोमभस्मालिसंतुलसी।मालिकाबद्धंपुरुषप्रमाणगर्तेनिवेशयेदिति शाट्यायनिः ग्रामस्थैःसकलैरत्रसप्रेतैःकरतालकैः ॥ विष्णुनामोच्चारणेननिवेद्यंनात्रसंशयइति ॥ ९५ ॥ एवंविधव्यवहारेणतद्दिनतद्विधौकृतेषुनरस्य विधानांतरमास्तिनेतिसंदेहःवृद्धगार्ग्यः प्रत्यहंतुद्वादशभिर्नामभिःसहपूजयेत् ॥ विप्रान्द्वादशसंख्याकान्भोजयेदपितत्परमिति ॥ ९६ ॥ वृद्धयाज्ञवल्क्यः द्वादशोन्हितुसंप्राप्तेनत्समाधिस्थलंव्रजेत ॥ पुत्रैस्तस्यैवनियतमर्चयेन्मंत्रपूर्वकमिति ॥ ९७ ॥ स्मृतिरत्नाकरे कृत्वैवसंस्कारविधिंपरस्ताद्द्विजैश्चतुर्विंशतिभिःक्रमेण ॥ संभोजितैरवचर्मैवपूर्णगृणतातितत्रांशिषमेवांशिष्यइति ॥ ९७ ॥ नित्यकांडोयसमुल्लंघितोयथावद्यावद्दर्शितेतरां आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये ॥ पूर्णोनवमउल्लासोनित्यकांडेशुभावहः ॥ ९७ ॥ इतिश्रीआनंदगिरिस्वामिकृतेस्मृतिसारसमुच्चयेनित्यकांडेनवमउल्लासः नित्यकांडश्चसमाप्तः ॥ ॥ ॥

इति स्मृतिसार–समुच्चये नित्यकांडः समाप्तः

नैमित्तिककांडः प्रारंभः

नैमित्तिककांडस्य विषयानुक्रमः

स्मृति सार समुच्चयः प्रारंभः

श्रीगणेशायनमः ॥ श्रीगुरुभ्योनमः ॥ श्रीकुलदेवतायैनमः ॥ मातापितृभ्योनमः ॥ नमो वेदार्थ वेद्याय जगदाधार मूर्तये ॥ प्रवर्तकाय ज़गतां महेशाय नमोनमः ॥ १ ॥ गजाननं महेशानं वाणीमपि जगाद्धितां ॥ नमस्कृत्य प्रवक्ष्यामि स्मृति सार समुच्चयं ॥ २ ॥ स्मृतयोहि श्रुत्यर्थ मादरी कुर्वाणः । मुनिमुखात्प्रवृत्ताः । लोकमुत्तारयंतीति वस्तुगतिः । तेमन्वाद्याः प्रतीताः कर्मकांड ानां कालविशेष प्रतिपादकतया प्रभवाद्याः षष्ठिसंवत्सराः प्रकीर्तिताः । एकैकस्य वत्सरस्य द्वादश मासा भवंति द्वे अयने द्वयोर्द्वयोर्मासयोराधिकृत्य षड्ऋतवः प्रवृत्ताः संक्रांतयोपि सूर्य मानेन संवत्सरान्निज्ञापयंति । तेन द्वादशमासाः संवत्सर इति प्रतीतिः एकैकस्य मासस्य शुक्ल कृष्णौ द्वौ पक्षौ भवतः पक्षयोरुभयोरपि पञ्चदशदिवसाः प्रथक्प्रतीताः नक्षत्राणि चांद्रमानेन तिथिष्वावर्तयंति अत्र हि ब्राह्मण क्षत्रियविट्ंशूद्राणां तत्तत्कर्मकाल प्रवृत्तेय तत्तदाचाराणां देशाविभेनांव्यवहारायस्मृतिसारसमुच्चयोयं व्यवह्रीयते मुनयो हि कश्यपाद्याःसप्तलोकप्रवर्तकाः स्मृतिप्रवर्तकाश्च अन्ये तद्वंशाः व्यास कण्व पराशर हारितादयः तेपि स्मृतिवर्तकाः अन्येपि निबंधन कर्तारः स्मृतिसंग्राहितारश्च स्मृति सारसमुच्चये प्रतीयंते अत्रह्याचारः लौकिकाः ग्रामधर्माः जनपद धर्माः योग्यानुसारेण कर्मकांड प्रतिष्ठतया बोध्याःव्रतातिमंगलोत्सवाः प्रायश्चित्तान्यपिबोध्याः तत्रादौसर्वेषां कालप्रधानतया-तिथिनिर्णयमुखेन प्रथमं व्यवह्रीयते व्यासःतिथयःप्रार्तपन्मुख्यास्त तत्कालव्यवास्थिताः ॥ सूर्योदयमनुप्राप्य कर्मकालं विवृण्वत इति ॥ ३ ॥ सूर्योदयमनूद्य कर्मकाल व्यवास्थितारिति वस्तुगतिः यदाह व्यासः यांतिथिंसमनुप्राप्य उदयंयाति भास्करः सा तिथिः सकला प्रोक्ता दानाध्ययनकर्मास्विति ॥४॥ अत्राहि कर्मशब्दः संध्यावंदनादि विषये संकल्प पर इति त्रिकांडमंडनः सूर्योदयेतु संकल्प कलामात्रं यदातिथिः ॥ तत्रैवकुरुते नित्यं संध्यावंदन कर्मतदिते ॥ ५ ॥ ननु केषुचित्तिथिषु व्रतादि नि बंधनेषु पुण्यकालेष्वपि सूर्योदयव्याप्तिमनुयोजयंति तत्कथंसध्यावंदनपरमात्रमि[illegible]न्न तेषां तत्ताद्विधया विशेषनिरूपणेन सांगत्य संभवात् ननु संध्यावंदनविधेरपि तिथेःपूर्णतायाऽभावेन कथं कलामात्रस्य ग्रहणमितिचेन्न तत्कालव्यापिन्यः प्राशस्त्यात् नचैवंश्राद्धारंभेकथमेतत्परित्यज्यत इतिवाच्यंतस्यापराण्हसान्हादेः व्यवस्थाविधानात् ननुकेषुचिद्व्रतेषु नक्तैकभुक्तायाचितेषु प्रारंभावसानयोः खंडातिथिः युज्यतेनवेतिसंदेहः एवंस्थितयाद्विधौ यदेवप्राशस्त्यमिति न्यायेन व्रतप्रारंभे यदैवपूर्णातिथिः साग्राह्याउद्यापनाविधौतुविशेषः प्रारब्धस्यांतगमनं खंडतिथ्यांनदुष्यति ॥ तस्मादुद्यापनंकुर्यात् खंडतिथ्यां नसंशयः इति ॥ ६ ॥ गार्ग्य वचनात् तथाच वेधदोषप्रसक्तौ तिथिनिर्णयःकथंसंभवतीति विचारप्रसक्ते तत्तन्मासवधीकृत्यतत्तद्व्रतविषयेतान्येववचनानि प्रमाणानीति समवधेयं नित्यनै-

कार्यमितिमुत्पश्यमः ननुपवित्रारोपणे दमनारोपणे पितयोः प्रसक्तौकथंकार्यमितिसंदेहे तत्पूर्वोत्तरमासयोरेवकार्यतावेक्षया दमनारोपणवापि पवित्रारोपणंत-
था॥ अस्तदोषेनकुर्वीत यदैवगुरुशुक्रयोः॥ १३॥ पूर्वोत्तरमासिविधिरसातिप्रातिबंधके॥ तयोरेकत्रकुर्वीत प्रायश्चित्तंविधायात्विति॥ १४॥ अत्राहि प्रायश्चित्तं मरीचि
नैवोक्तं अग्निर्मूर्धेतिमंत्रेण प्रायश्चित्तंविधायतु॥ दमनारोपणंवापि पवित्रारोपणंचरेदिति॥ १५॥ एवंहि विषयव्यवस्थायां तत्तत्साधकतया अधिमासेप्रसक्ते किंत
त्रनिषिध्यतइतिचिंत्यते कश्यपः अधिमासेतु संप्राप्ते पवित्रारोपणंतथा॥ उपाकर्मपरित्याज्यदमनारोपणंपुनारिति॥ १६॥ अधिमासविषयेकथ्यंते कार्याकार्यविषय-
ताप्रयोजव मिाते संदेहे व्याख्यातंनिर्णयामृते आधिमासस्यसंप्रतिर्यास्मिंकाले भविष्यति॥ तदातुनशुभंकर्म कुर्याद्विद्वान्विरादरादिति॥ १७॥ शाट्यायनिः अत्राहि शुभं
कर्मअधिमासे नकुर्यादित्युक्तं कर्णवेधनादेरपि शुभकर्मतयाद्वादशेहनिप्राप्तत्वात्कथमितिसंदेहः यद्येवंकर्णवेधनस्य नदोषः तर्हि चौलादिनामपि किमर्थंनिषेधोति
तत्रूमः चौलादीनांदीर्घकालव्यापित्वेन कर्णवेधनस्यद्वादशाहाधिकरणतया तदवत्छेदकावात्छिन्नस्यविवरणदर्शनादिति तदुक्तंनिर्णयतरंगिण्यां कर्णवेधं प्रकुर्वीत [१]
द्वादशेहि नसंशयः॥ अधिमासेपि संप्राप्तेचौलादीन्वर्जयेत्पुनारिति॥ १८॥ ननुअधिमासे कानिशुभानिनिषिद्धानीतिविवक्षायां वृद्धमनुराह चौलंचैवोपनयनं वि-
वाहंव्रतबंधनं॥ अधिमासे नकुर्वीत पवित्रारोपणंतथेति॥ १९॥ ननुकात्यायनेनोक्तंपवित्रारोपणं तदहेवप्रायश्चित्तंकृत्वाकुर्यादिति प्रायश्चित्तंविधायैव पवित्रारो-

पणंचरेत्॥ पूर्वोत्तरेषुमासेषु प्रत्यूहेसमुपस्थितःइति॥ २०॥ अत्रत्यप्रत्यूहशद्वः गुरुशुक्रास्तोपलक्षकः संक्रांतिगृहणंवापिमौढ्यंवागुरुशुक्रयोः॥ पूर्वापरेषु मासेषु प्र-
सक्तंश्रावणेचरेदिति॥ २१॥ वृध्ध गार्ग्यवचनात् तेनश्रावणेमासि आधिकसत्वसंक्रांत्यादिप्रत्यूहेसाति कथंकार्यमिति अत्राहाविद्वरथः श्रावणस्य-प्रधानत्वादन्ययो
रुपसर्जनात्॥ अधिमासेपिकुर्वीत पवित्रंश्रावणेबुधःइति॥ २२॥ ननुगृहस्थानामुपाकर्मणि कथमितिचेत अनयैवव्यवस्थयाबोध्यं उपाकर्मगृहस्थान पवित्रारोपणं-
तथा॥ अधिमासेतुसंप्राप्ते प्रत्यूहेतत्रकारयेदिति॥ २३॥ वृद्धवसिष्ठवचनात् तत्रश्रावणेमासोत्यर्थः प्रत्यूहेपूर्वोत्तरमासयोर्विघ्नेसमुपस्थितइत्यर्थः वृद्ध हारितोपि
उपाकर्म प्रकुर्वीरन्मौढ्येपिगुरुशुक्रयोः॥ अधिमासेपिपूर्वत्र परत्रप्रातिबंधकइति॥ २४॥ एतेनगृहस्थानामुपाकर्मणि पवित्रारोपणे पूर्वोत्तरमासयोः सावकाशयो
स्तस्यैवनिरवकाशतयादूषणं समुपस्थितामिति व्यवस्थाबोध्या अधुना श्रवणाविधेमनूद्यतदुपाकर्म प्रसक्तौवेधविषये विचार्यते कात्यायनः उत्तराषाढवेधेतुश्रवणे
समुपस्थिते धनिष्ठावेधसंयुक्तं कथंकुर्वीतयज्ञिकाः॥ २५॥ तिथिरेवप्रधानत्वाछ्रवणंतूपसर्जनं योगेसातिविशेषोहिद्रष्टव्योनात्रसंशयः इति॥ २६॥ ननुचतुर्दश्यांब्रह्व
चामुपाकर्मविधिः याजुषिकाणां पौर्णिमास्यां ग्राह्यायणानां प्रतिपदितिव्यवस्थायांस्थितायां बव्हृचः श्रवणेकुर्युरिति यदुराहतं तस्य कागतिरिति चेन्न पूर्वोक्तविधिना

मासप्रसज्यते॥ नित्यत्वेन विधानेपि सौरमानेविधियतेति ॥ ३२॥ अत्रहि सौरमानशद्बेन संक्रांत्याधिकृतनां लोपाभावता प्रतीयते लौगाक्षिः अधिमासेसमुत्पन्ने श्राद्धंसांवत्सरंयदि ॥ सावनेतु द्विवारंस्याच्छुद्धमासेपियोग्यतेइति ॥ ३३॥ एतेन सावनमानमाश्रितानामधिमास प्रसक्तौ प्रतिसंवत्सरश्राद्धंद्विवारंकार्यमितिसिद्ध-कात्यायनः प्रतिसंवत्सरश्राद्धं द्विवारंकुरुतेनरः॥ आधिमासेतुसंप्राप्तेशुद्धमासेविधीयत ॥३४॥ यद्यपिप्रतिसंवत्सरश्राद्धस्यसावनाधिकारिणांशुद्धमासेसिध्यति तथापि तद्दिनानुलंघनदोषप्रसक्त्या द्विवारंकार्यमिति हरदत्तः अधिमासेविधायैव शुद्धमासेपिकारयेत ॥ प्रतिसंवत्सरश्राद्धं नकुर्यात्किल्बिषीभवेत् ॥ ३५॥ तथाहि प्रतिसंवत्सरश्राद्धं यदिनित्यं तेनतदकरणे प्रत्यवायः प्रसक्तः अधिमासस्यतदप्रयोजकतया शुद्धमासेकृते कुतोदोषप्रसक्तिरिति प्रत्यवायनिघंटनस्यात् ते-कर्मलोपसंभवे मासाधिकारेनिरस्तइति सौरसावनयोर्भेदावगमाभावेनसांकर्यप्रसंगः याज्ञवल्क्यः सौरमानेनिरस्तंस्यात्श्राद्धंसंवत्सरंयन ॥ सावनंतदुपग्राह्यमन्यथाकिल्बिषीभवेदिति ॥ ३६॥ द्विसंक्रांतोधिमासस्यादिति नियामकंयुक्तंसंक्रांतिद्वयमेववेत्यत्रसंक्रम : स्नानंकदाकार्यमितिचिंत्यते गार्ग्यः संक्रांति द्वयरु-केचदधिमासेप्रयोजकं स्नानदानादिकंद्वाभ्यां नानिषिध्यतएवहीति ॥ ३७॥ संक्रमस्याहानिपुण्यकालतया विहिते रात्रौयदिसंक्रमस्तर्हि स्नानदानादिकंकथंकार्य-मितिसंशयोविचार्यतेहेमाद्रौ निर्णयामृते हारितः संक्रमेयदिरात्रौस्यात्स्नानदानादिकंभवेत्॥ कथंकार्यंतुसंदेहे दिवैवपरिकीर्त्यतइति ॥ ३८॥ अत्रत्यदिवाशद्बःदिवसपरः तत्राहिपूर्वेन्हि परस्मिन्वान्हीतिविचारदशायां व्यवस्थामाहात्रिः अयनेविंशतिःपूर्वेमकरेविंशतिःपरे पुण्यकालेनसंदेहः स्नानदानादिकंचरेदिति ॥ ३९॥ तेनअयनशद्बस्यमुख्यवृत्तितया दक्षिणायनंग्राह्यं मकरशद्बस्य मुख्यवृत्तितया उत्तरायणंग्राह्यमितिविवेकः विश्वावसुः उत्तरायणषट्केस्यात्षण्मासाद्दक्षिणा-यनं॥ कर्कटोमकरश्चोभौ संक्रांतिस्तद्व्यवस्थयोरिति ॥४०॥ एतेनमकरादिषट्कमुत्तरायणंकर्कादिषट्कदक्षिणायनमित्यापन्नं यदुक्तंरत्नेन कार्मुकंतुपरित्यज्य झषसंक्रमतेर.वि.॥प्रदोषेस्यार्धरात्रौवातदापुण्यंपरेहनीति ॥४१॥ तदेतत्स्नानविषयं अन्यथारात्रौतदनुपपत्तेःतेनेदंनियतस्नानविषयतयाबोध्यं वस्तुतस्तुरात्रिंद्विधाविभज्यपूर्वार्धपूर्वदिने अपरार्धमपरदिनेइति स्नानादेरधिकारोबोध्यः तेनचस्नानस्य पूर्वाण्हगामितया प्राशस्त्यंबोध्यं वृद्धमनुः पूर्वाण्हेस्नानदानादि यदनंतफलंस्मृतं॥ अपराण्हेतुसायान्हे निष्फलंतुतदिष्यतइति ॥४२॥ तथाहि विद्यमानपूर्वदशायांसंक्रमणस्यपुण्यकालप्रसक्तौ तदतिरेकतया येतुपुण्यकालमाचक्षते तेषामासुरोपरोगितया नकिंचिन्मानंपश्यामःवृद्धवसिष्ठः पूर्वाण्हेसर्वकर्माणिसफलानीहजानतां॥ अपराण्हंचसायान्हमासुरंस्याद्धरर्थकामात ॥४३॥ संक्रांतिमवस्थायामुप-

येगेसिद्धे ग्रहणमनू स्नानदानाद्यादा वधिकारित्वंचिंत्यते विदूरथः स्नानंदानंप्रशस्तंस्यात्ग्रहणे संक्रमेपिवा ॥ भोजनंतुनिषिद्धंस्यात्तत्काले पुण्यवर्धनं इति ॥४४॥
चंद्रसूर्योपरागेयतोभोजनंनिषिद्धंकुतोहि तत्रापिंडादिप्रक्षेपेपितृणांपुण्यविधये आचमनाद्यधिकारःइति विवक्षायांविचार्यते विश्वावसुः सोमसूर्योपरागेस्य ात्पिंड
दानादिकक्रिया ॥ तदंगाचमनंप्रोक्तंननिषिद्धतएवाहि इति ॥ ४५ ॥ ननुयदिभोजनंनिषिद्धं आचमनस्यापिभक्षणार्थकतया कुतोह्यधिकारः संभवतीतिचेन्न जलप्रा-
शनस्यभक्षणरूपत्वेपिविधिकर्तव्यतायाबाधकाभावात् अतएवोक्तं निर्णयाभरणेयद्युपरागोभविताभोजनमेतन्निषिद्धंस्यात् कर्मांगाचमनंचेन्निषिद्धतएवाविज्ञात
मिति एतेनाचमनविधे साध्यताव्यपदेशेन शिवपूजादेरपिविस्पष्टतयाकार्यत्वंसिद्धं यदाह अत्रिः शिवपूजामंत्रजपःग्रहणेचंद्रसूर्ययोः। यदन्यत्सर्वकर्माणिप्रासिध्यंति
द्विजैःकृतैरिति ॥ ४६ ॥ ननुभोजनं तावत्कालमात्रं निषिद्धमुतपूर्वापरकालीनंवेतिसंदेहे बादरायणआह चंद्रसूर्योपरागेतुग्रस्तास्तेसमुपस्थिते ॥ दिवानक्तं नचाश्नी
यात्कालभेदोहिकेवलइति ॥४७॥ अत्रहिकालभेदशब्दोविलक्षणपरः अतआह शाट्यायनिः ग्रस्तोदयेविधोः पूर्वंनाहर्भोजनमाचरेत्॥ ग्रस्तोदये तथार्कस्य रात्रौ पूर्वं
निषिध्यत इति ॥४८॥ तथास्त्वायमभिसंधिः विधोः यस्मिन्दिनेग्रस्तास्तोभवति तद्दिनेचंद्रोदयसीतभोक्तव्यं तथासूर्यस्ययद्दिने ग्रस्तास्तो भवति तदपरदिने सूर्यंदृ
ष्ट्वाभोक्तव्यमिति नन्वेवंसतिदर्शपूर्णमासयोरिष्टिप्राप्तौ कथंव्यवहारमितिचेत्ब्रूमराहुदर्शनान्निर्मुक्तौतदुत्तरंपूर्ववा तदेतन्निषिध्यतइतिआहशरभंगः इष्टिकालमनु
प्राप्यशास्त्रासिद्धिंविलोक्यतु ॥ विमुक्त्याकुरुतेनूनं द्विजःप्रत्यक्षशास्त्रविदिति ॥५०॥जैमिनिरप्याह शास्त्रविमुक्तिदृष्ट्वैपौर्णमासिंप्रयोजयेत् ॥ नदोषःस्त्रर्त्राविहितः शा
स्त्रमेतत्प्रतीयतइति ॥५१॥ तेनव्यवहारेण श्राद्धकालस्यानित्यतयातत्करणप्रसक्तौवृद्धमनुराह यावत्कालसमुल्लंघ्य श्राद्धंकुर्यान्नदोषभाक ॥ भोक्तातुकिल्बिषंभुक्ते
ततःकुर्यात्परेहनीति ॥५२॥ ग्रहणभोजननिषेधप्रसंगेग्रस्तोदयेव्यवहारउक्तः साक्षात्ग्रहणनिर्मोकेभोजननिषेधः कथमित्याशंकायां वृद्धमनुराह सूर्योपरागे नाश्नी
यात्पूर्वंयामचतुष्टयं ॥ चंद्रोपरागे नाश्नीयात्पूर्वंयामत्रयंबुधःइति ॥ ५३ ॥ ननुग्रहणस्यपुण्यकालतायांकुतोदोषोयमुपपन्न इतिचेत्ब्रूमः सूर्याचंद्रमसोः राहुग्रस्तयो
रविमोचनप्राप्ततया बलीयस्त्वेनदोषसंभवात् ननुसूर्याचंद्रमसोः कुतएतत्ग्रहणंसभवतीतिविवक्षायां कूर्मपुराणे विजयकेतुराह उत्पन्नममृतंदेवान्धन्वंतरिरपाय
यत् ॥ तदाचक्रेणसंछिन्नंराहोःशीर्षंधृतामृतं ॥५४॥ राहोःसंजीवतितदा सूर्याचंद्रमसोर्वचः ॥ संस्मृत्यराहवेदत्तं हरिणावरमुत्तमं ॥ ५५ ॥ पौर्णमास्याममावास्यायां
दायोगोभविष्यति ॥ सूर्यचंद्रमसोर्ग्रासं त्वंकृत्वासुसुखीभवेति ॥ ५६ ॥ एतदेवग्रहणमितिव्यवहरंतिसूरयः यदाहजातुकर्णिः राहुणाधृतकोपेन सूर्याचंद्रमसौयदा ॥

पुण्यभूमीहिशात्वाकृतयुगनरः॥ व्रतकुर्यात्संदेहः संशयमेव... ॥ पुण्यराशिवर्धनंइतिदेवाभिप्रेत्यव्यासोप्याह काश्यांकृतंहिसुकृतं शेषेणापिनगण्यते ॥
योरन्यत्रानिषेधाबाध्यः तेन त्रगुरुशुक्रास्तयोर्निरासिष्यमाणतया काशीक्षेत्रेपुण्यराशिवर्धनंइतिदेवाभिप्रेत्यव्यासोप्याह ॥ रामसेतुश्चसर्वत्रपुण्यराशिविवर्धनइति ॥ ६४॥ तदनेन
तस्मात्कालप्रतीक्षाणि नकर्तव्याकथंचनेति ॥ ६३ ॥ शिवधर्मोत्तरे शिवक्षेत्रेषुपुण्येषु गोकर्णकाशिकातथा ॥ ...
वचनेनभूम्यांक्षेत्रत्रयातिरिक्तस्थले निषेधोद्रष्टव्यः तदुक्तंगोकर्णखंडे परित्यज्यतुगोकर्णरामसेतुंचकाशिकां गुरुशुक्रास्तयोर्दोषः अधिमासेपिदुष्यतीति।६५।
वचनेनभूम्यांक्षेत्रत्रयातिरिक्तस्थले निषेधोद्रष्टव्यः तदुक्तंगोकर्णखंडे ... गोकर्णरामसेतुश्च काशीतित्रिस्थलीस्मृता ॥ त्रिस्थलीषुकृतंकर्मशेषेणापिनगण्यते ॥ ६६ ॥ सदाकृतयुगश्चात्र सदाचैवोत्त
एतदानुकूल्येन तत्रैववचनांतरंबोध्यं गोकर्णरामसेतुश्च ... ॥ तथाहियद्यपिवचनबलादस्तदोषंप्रबलमाहुः तस्ययुगांतरसंभवेपि क्षेत्रत्रयातिरिक्तविषयो बोध्यः
रायणं॥ महाबलालयेपुण्ये पुण्यंपुण्यसमृद्धिकृदिति ॥ ६७॥ तथाहियद्यपिवचनबलादस्तदोषंप्रबलमाहुः इतिश्री आनंदगिरिस्वामिकृते,स्मृतिसारसमुच्चये नैमित्तिककांडे प्र. उ.
आनंदगिरिणाप्रोक्ते स्मृतिसारसमुच्चये॥ समाप्तः प्रथमोल्लासः कांडेनैमित्तिकेशुभः

[२]

स्मृ. सा. स. नै. कां प्र. उ. स

स्मृति-सार-समुच्चये

द्वितिय उल्लासः

प्रत्यूह तिमिरापोह भास्करं लोकशंकरं॥ गजास्य नौमि मनसा वांछितार्थ प्रसिद्धये ॥ १ ॥ तिथयोहीप्रतिपदाद्याः॥ व्यस्तं समस्त भावेन सामानाधिकरण्यमु
पलभमानामाविशेषविधिमपेक्षंते। तत्र प्रथमायामप्रतिपदः स्वरूप विषये विचार्यते प्रचेताः ॥ यदा कृतयुगोत्पत्तिः चैत्रेमासिप्रजायते॥ तस्यांरविः समुत्पन्नःप्र
तिपत्सा प्रशस्यतइति ॥२॥ ननु शुद्ध विद्धसत्वेनातिथेर्वैरूप्यं संभवे कथं ग्राह्यमिति संशये गौतमआह॥ सिद्धत्वेप्यथसामान्ये चतुर्नाड्याःपरंभवेत्॥ परस्मिन्दि
वसेसा हि वत्सरारंभईर्यतइ ते॥ ३॥ तथाच वत्सरारंभस्यसूर्योदयव्यापितया तद्दिने मंगल स्नानंकृत्वा वत्सर फलं श्रोतव्यमिति स्थिते परदिने कियन्नाडिग्रा
ह्येति संशये पूर्वापरदिवसयोर्व्याप्तिदृष्ट्वा नाडिचतुष्टयं समतीत्यपरदिने कलामात्रं यदिदृश्यतेसा प्रतिपत्परिग्राह्येति तदाह वृद्ध शातातपः युगादिप्रतिपद्बोध्या
चैत्रेमासि परेहनि॥ चतुर्नाडिष्वतीतासु कला मात्रापिशस्यत इति ॥ ४॥ ननु आपस्तंबेनोक्तं पूर्वापरदिन प्राप्तौ पूर्वमेवाहिशस्यते॥ प्रतिपत्स्थानसंदेहः सर्वकर्मसुसि
... शर्करा उपद्ध्या तैल्यत्र घृत तैल पय सामान्यतमेनांजनप्राप्तौ तेजोवै घृतमिति वाक्यशेषेण सामा

नोचेत्प्रतिपत्साप्रशस्यते ॥ अमायुक्तैवदुर्गायाः पूजायामितिनिश्चयः इति ॥ ११ ॥ गोभिलोपि दुर्गासंपूज्यतेनूनं परस्मिन्प्रातपित्तिथिः ॥ कलापिनप्रतीताचेदमाव
स्यांनदोषभागिति ॥ १२ ॥ तदनेनवचनेन शंकायां परिहृतायां रात्रिपूजाव्यवहारेणनवरात्रप्रतीताकथामितिचिंत्यते यांतिथिंसमनुप्राप्येतिवाक्यमनुद्यव्यपदेशो-
ति ॥ १३ ॥ तथाचसति तदेकास्मिन्दिने तिथ्यपकर्षमुखेन पूजाद्वयंशस्यत इतिबोध्यं सुमतुःआश्वयुक्शुक्लपक्षेहि प्रतिपत्पूर्वसंमुखे पूजाद्वयंप्रकर्तव्य रात्रौसंक-
ल्पपूर्वकामिति ॥ १३ ॥ तेनतदमावास्यायांप्रतीतिःपूर्वदिनेरात्रिसत्वेगृह्यते परदिनेकलामात्रायां तिथौ रात्रिप्रधानतया पूजाद्वयं संकल्प पूर्वप्रयोक्तव्यमितिसिद्धं-
भरद्व... मुहूर्तमेकंनाडीवापरास्मिन्नप्रतीयते ॥ तदापूर्वदिनंग्राह्यं समायांप्रातिपत्तिथिरिति ॥ १४ ॥ हारितः दुर्गापूजाप्रकर्तव्यामुहूर्तैकापिदुर्लभा ॥ परस्मिन्दिवसे
साहि नाडिमात्रापिशस्य तइति ॥ १५ ॥ यमः पूजाद्वयंप्रकर्तव्यंकलामात्रायदातिथिः रात्रौसंकल्पपूर्वंहि नवरात्रंतदिष्यतइति ॥ १६ ॥ तथाहिनवानांरात्रीणां समा
हारइति समाहाराद्विचैकवद्भावे कृते नवरात्रशब्दस्य निरूढलक्षणेन पूजाद्वयविधानात्कर्मलोपइतिसिद्धं ॥ यदाहुरौर्जेमासिशुक्लप्रतिपदि गोक्रीडनामिति तदत्रस
माधनंचिंत्यते ब्रह्मांडपुराणे और्जेमासिप्रतिपदि शुक्लपक्षेविधीयते गोक्रीडनंतदेताद्धि चंद्रदर्शनविप्लवइति ॥ १७ ॥ ननुतदेतत्पुराणवचनमेतस्याः स्मृतिमध्येक
थमन्वयइतिचेत्ब्रूमः गालववचनेन निरस्तत्वादिति आगमेचपुराणेचस्मृतौयद्यत्प्रतीयते ॥ उपबृंहणमेतद्धि श्रुतेरेवेतिनिश्चयइति ॥ १८ ॥ तेनात्रपुराणागमयोरपि
प्रामाण्यसंभवेन पुराणवचनस्ययुक्तत्वंबोध्यं एवंपुराणवचनस्य स्मृतिमध्यवस्थानसंभवे अहानिचंद्रदर्शनप्रतितोकथंग्राह्यमितिशंकायां देवराजआह चंद्रदर्श
नसत्वेपिसायान्हंतुविशिष्यते ॥ गोक्रीडनंततोज्ञेयंयतः पूर्वदिनंभवेदिति ॥ १९ ॥ अत्रहिराज्ञांफलदर्शनं प्रजानांवृद्धिः ग्रामाधिष्ठातॄणांतदधिष्ठानदेवतायां फल:
दर्शनमितिव्यवस्थितिः भरद्वाजः और्जशुक्लप्रतिपदि कर्तव्यंफलदर्शनं राज्ञांप्रजाश्चेतत्कुर्वंति देवतासुतथाप्रजाइति ॥ २० ॥ अत्रहिकालविशेषे कियन्मुहूर्तावधि
परिगृह्यतइतिविचिकित्सायां नियमोयंव्यवतिष्ठते वृद्धमनुः मुहूर्तद्वितयादूर्ध्वंघटित्वेकापिदृश्यते और्जेशुक्लप्रतिपदि कर्तव्यंफलदर्शनामिति ॥ २१ ॥ ननुफलद
र्शनमित्यत्र षष्ठिसमासविधाने व्रीहिलवनंप्रतीयते किमितद्युज्यतइतिचेन्न कपिंजलाधिकरणन्यायेनाद्वित्वाविवक्षायां त्रित्वामिवपंचम्यः सान्निधापनात् तेनचफल
दर्शनमितिसमर्थोबोध्यः नचैवराजपुरुषइत्यत्र कथंसमासइतिशंकनीयं राजाचासौपुरुषश्चेतिव्यधिकरणसंभवे संबंधसामान्येषष्ठिस्वीकारात् एतेनतद्दिनेदेवता
दर्शने राजदर्शनेच प्रजाभिः फलहस्तेदर्शनं कार्यमितिसिद्धं यदुक्तंगोक्रीडनकंवृश्चिकप्राप्तौ कार्तिकप्रतिपदन्यथामार्गशीर्षे कृष्णप्रतिपदीतिव्यवहारोविज्ञापते

शिवरहस्ये वृश्चिकेमासिसंप्राप्ते कृष्णपक्षेमहेश्वरः॥ धर्मस्यतुवरंदत्वा वृषभत्वंप्रदत्तवान्॥२२॥ वाहनंमेभवेत्युक्त्वातमारुह्यचदांशितः॥ गजासुरंनिहत्याजौ कै
लासंप्रतिजाग्मवानिति॥ २३ ॥ अत्रहिगजासुरस्यनिधने धर्मस्यवृषभकरणत्वंहेतुःतेनतद्दिनेगोक्रीडनंकार्यामितिहेमाद्रिः गोक्रीडनंप्रकर्तव्यंवृश्चिकेसमुपस्थिते
कृष्णपक्षेयथायोगं सर्वदेशेष्वसंशयामिति ॥ २४ ॥ नन्वनेनगोक्रीडविधानेन किंफलमित्यपेक्षायां क्रतुराह गोक्रीडनेकृतेनूनं गवांराशिःप्रवर्धते ॥ तद्देशेसर्वसंप
त्तिः पृथ्वीबहुफलाभवेदिति॥ २५॥ कात्यायनोपि यद्दिनेवृषभारोहंचक्रेसाक्षान्महेश्वरः॥ गोक्रीनंतदाव्हिस्यात्सर्वसंपत्समृध्धयइति॥ २६॥ नान्वियंतिथिः किय
न्मुहूर्ताग्राह्येतिविधिसंशये व्यवस्थामाह संवर्तः मुहूर्तद्वितयंग्राह्यं प्रतिपद्याप्रशस्यते॥ गोक्रीडनेकार्तिकेस्यान्मार्गशीर्षेपि साभवेदिति॥ २७॥ आश्वलायनः सा
र्धमेकंमुहूर्तंहिगोक्रीडनमिदंस्मृतं ॥ प्रतिवर्षंप्रकुरुते वाश्चिकेसमुपस्थितइति॥ २८ ॥ ननुसंवर्तवचनेनमुहूर्तद्वयेप्रसक्तेसार्धमुहूर्तमित्याश्वलायनवचनंनिरर्थक
मितिचेन्न ह्रासेवृद्धोस्तत्प्रतीतेः यदाहबादरायणः सार्धमुहूर्तेह्रासेस्याद्विमुहूर्तंप्रशस्यते॥ वृद्धौसतिप्रतिपादगोक्रीडनकर्कमणीति॥२९ तथाचह्रासवृध्योःशद्वयो
र्विनिमयोग्राह्याः अन्यथाविधिवैयर्थ्यापत्तेः तथाहि सोमेनयजेतेत्यत्रसोमशद्वेनमुख्यताप्रतीतौ पूतिकायाः व्यवहारसंभवात् तदुक्तनागरखंडे वध्दौह्रासेयथा
योगंमुहूर्तद्वितयंयदा॥ सार्धमुहूर्तमेवापिप्रसन्मुख्यैवकारयेदिति॥ ३०॥ अनेनह्रासेसतिमुहूर्तद्वितयं वृध्दौसत्यांसार्धमितिविवेको द्रष्टव्याः फाल्गुनशुक्लप्रति
पादशैवरथ्योत्सवमाहु केनायमुन्नियत इत्यपेक्षायां ब्रह्मांडपुराणे आदिभागेप्रतीयते अंधकासुरबाधायां देवास्तेशरणंययुः महेश्वरभयोद्विग्नाः अभयंवोददौहर
॥ ३१ ॥ अष्टकठोरवोपेतरथमारुह्यदंसितः ॥ मंदाराद्रिसमेत्यासौहतवानंधकासुरमिति॥ ३२॥ अत्रहिअंधकासुरनिधनेप्रतीततद्दिनंकिमित्यपेक्षायां शिवधर्मो
त्तर प्रमाणबोध्धं फाल्गुनशुक्लपक्षेहिरथारूढोमहेश्वरः ॥ तस्यामेवप्रतिपादि मदाराद्रिमुदाययाविति ॥ ३३ ॥ ननुमदाराद्रिगमनस्य दैत्यनिधनंरूपतयागमने सति
कुतोयरथोत्सवो लोकेप्रतीयतइतिचेन्न दैत्यनिधनप्रवृत्ते लोकक्षेमकरतया समुत्सवस्यपूर्वैरंगीकृतत्वात् तथाहवृध्धहारीतः रथोत्सवदिनयांत्ध महोत्सवकर
वेत्॥ तद्दिनेदेवतानांहिरथारोहणमीर्यतइति॥ ३४॥ जाबालिः रथोत्सवप्रकुर्वीतदेवानांविजयावहे॥ रथारोहदिनेयस्माद्राष्ट्रसंपद्विवृध्धयइति॥ ३४॥ ननुसाति
थिः कियन्मुहूर्ता परिग्राह्येति विधिसंशये देवलआह मुहूर्तत्रयमुल्लंघ्यसंगवेकालआगते॥ फाल्गुनप्रतिपत्साहि रथोत्सवदिनंभवेदिति॥ ३५॥ तेनेयंव्यवस्थादो
ध्या संगत्रकालस्यमुहूर्तत्रयाति क्रमतया विहितत्वेनातिथिह्रासे तिथिवृद्धावापपरादने कलामात्रसत्वेपरिग्राह्येति एतदुक्तं निर्णयामृते प्रातःकालंसमुल्लंघ्य संगवे

[५] पतृकस्य तत्काल विधितया तद्वति सिद्धं तेनैव विधिना विवाहोपनयनादिषु संकल्पो मुख्यतमः अत्र गौतमः विवाह व्रत चर्यासु सामान्या
तिथिरिष्यते ॥ पैतृकेतु विशेषेण तत्काले संगता तिथिरिति ॥ ॥ अत्रहि विवाहव्रतचर्यास्विति तिथिखंडे सातिसाग्राह्या यदुक्तंहेमाद्रौ दिवाखंडा
निशाखंडा सातिथिर्द्विविधामता ॥ तत्कालेसंप्रयुक्तेयं विवाहादौप्रशस्यतइति ॥ ३९ ॥ तेनसामान्यप्राप्तौविशेषोयंबोध्यः अत्रहिप्रतिपदः रविवासरसंक्रमयोर्योगे
योगविशेषपुण्यतमइति कात्यायनआह रविवारसंक्रमश्चेत्सातिथिःप्रतिपद्यदि ॥ योगोयंभवितानूनं स्नानंदानंप्रशस्यतइति ॥ ४० ॥ सा रावल्यां प्रतिपदिहाविधेया
पूर्वविद्धाप्रशस्ता । भवतिहिसितपक्षेकृष्णपक्षेपरास्यात् ॥ व्रतविधिमनुसृत्यप्राप्ययोगंयदेयं । भवतिसकलदानंतत्रयोग्यंविधेयामिति ॥ ४१ ॥ तथाचास्यवचनस्य
सामान्यविधित्वयासंकल्पविधौतत्तद्व्रतचर्यानुरोधेन यत्रविशेषस्तत्रसएवग्राह्यः अन्यथाव्रीहीन्प्रोक्षतीत्यत्रप्रोक्षणसंस्कारस्यवैयर्थ्यापत्तेःव्रतविधिमनुसृत्येत्यत्र
प्रागुक्तरीत्यासौरसंक्रांतिरविवासरयोगः पुण्यकालइतिस्नानंदानंकार्यमितिविवेकः तत्राहिपूर्वोत्तरयोःप्रतिपदोः संशयेसातियत्रविशेषस्तत्रपूर्वावापरांवास्यात्अ
न्यथातदुपपत्तिस्तत्समवायेनेतिन्यायेनसमवायिसंबंधस्याववाक्षेततयायोगातिशेषवैयर्थापत्तेः एतेनयत्रयोगोविशेषोनप्रतीतः तत्रशुक्लकृष्णयोः पूर्वोत्तरविधिर [५]
नुयोज्यः यदुक्तंव्यासेन योगोयत्रनसंयुक्तः सातिथिःप्रतिपद्भवेत् ॥ शुक्लेपूर्वाचसंकल्पे कृष्णेचैवतदुत्तरेति ॥ ४२ ॥ एतन्माधवमतानुरोधेनव्यवस्थापितंबोध्यं एवं
प्रतिपदिसामान्यतोव्यवस्थितौ शुक्लकृष्णयोः पूर्वोत्तरयोरुदयव्याप्तेराधिक्यं ग्राह्यमितिविवेकः तेनपर्वणियोगः प्रतिपदीष्टिरिति यदाग्निहोत्रव्यवस्थापकंवचनंतद्वि
षयेविचार्यते निर्णदीपिकायां कात्यायनः पर्वणोप्रतिपत्संधौ यागकालप्रतीयते ॥ इष्टिप्रतिपदादौस्यादितिशास्त्रस्यानिश्चयइति ॥ ४३ ॥ ननुदर्शपूर्णमासाभ्यांस्वर्ग

कामोयजेतेतियागमनूद्यश्रूयते कथंतर्हि रात्रौतदुपपत्त्याव्यक्तिभावलक्षणेनार्धरजनीन्यायमनुसृत्यतत्प्रस्तावनेतिचेन्न पूर्वस्मिन्दिवसेयोगंविधायतदिष्टिकाल
स्यपरादिनसंकल्पस्ययुक्ततमत्वात् एतयादुक्तंनिर्णयाभरणे इष्टिकालोभवेत्प्रातः पूर्वसंकल्पपूर्वकः ॥ नरात्रौप्रतिपन्नाशः परेद्युरवशिष्यतइति ॥ ४४ ॥ अत्रहिपरादि
नेप्रतिपत्संध्यभावेतदुक्तयुक्त्याप्रतिपदौ व्याप्तिमंगीकृत्यव्यवहर्तव्यं तदाहात्रिः प्रतिपत्संध्यभावेहि प्रातःप्रतिपदंप्रति ॥ सूर्योदव्याप्तिमेव गृहीत्वेष्टिंसमाचरेदिति
॥ ४५ ॥ एतेनामावास्यायांपौर्णमास्यांवायतोभवतीतिभवतीतिविधिसमर्थ्यंव्यवहर्तव्यंवेदितव्यं मरीचिः योगकालश्चपूर्वेद्युरिष्टिकालः परेहनिसंकल्पेनकृतोयंस्या
निर्वाहः संधिवर्जितइति तेनतयोः संधिसत्वेयुक्तंतर्हिनेवसर्वेनपूर्वेद्युरितिबोध्यं देवलः संधिसत्वेपरेद्युःस्यादुभयंप्रातरेवहि ॥ सूर्योदयमनुप्राप्य कर्मकालोयथो-
चितमिति ॥ ४६ ॥ तथाचपरदिने कर्मकालव्याप्त्या तदुभयसंधिसत्वे यागपूर्वस्मिन्निष्टिविधानमितिसिद्धं अन्यथानिशीथकालव्याप्तौयागस्यतदननुपपत्त्यावचनवैय
र्थ्यापत्तेः तेनेदमुच्यते पूर्वेद्युः परेद्युरेववातदुभयाद्रेन कर्मकालव्याप्तौ परेद्युरेव व्यवहर्तव्यामिति यदाहगौतमः यागश्चेत्प्रथमःकल्पः विकल्पेपर्यवस्थिते ॥ परेद्युरि

वेनवेदस्याभ्यर्हिततया कृत्स्नवेदस्यसंवत्सरप्राप्तोर्वीविक्षितत्वात् अन्यथासंपृक्तान्नभोजनस्याविषमा त्रपरित्यागेग्राह्यतापत्तेः प्रतिपदोऽनध्यायसिद्धौ पंचनाडिप
रित्याज्येति कात्यायनः शरनाडीपातेत्याज्या प्रतिपत्सर्वदाबुधैः सार्धद्विनाड्यांमध्याह्नः सायाह्नस्तावताभवादेति ॥ ५२ ॥ अत्रिरपि शरनाडीप्रयुक्तेयमनध्यायेवि
शिष्यते प्रतिपद्वेदशास्त्राणांतावद्दिस्मृतिकारणामिति ॥ ५३ ॥ एतेनवेदाध्ययनस्यतदंगत्वेन प्रदत्तानांशास्त्राणांप्रतिपद्यनध्यायः स्वीकार्यइतिसर्वमतासिद्धांत
तत्राहि पंचनाडिषुमध्याह्नसायाह्नयोर्व्यवस्थितिंकृत्वा तावत्कालमपरदिनेयद्यवशिष्यते तेनव्यवहर्तव्यमितिदिक एवमनध्यायस्यनाडिपंचकातिरिक्तत्वेन्नकेमुति
कन्यायेन व्यवस्थिते तदधुना संध्यावंदनादे प्रवृत्तिंकथमितिचिंत्यते औडुलोमि अनध्याये प्रवृत्ततु वेदाध्ययनकर्मणि संध्यावंदनलोपःस्यात्कथमेषविनिर्णयः
॥ ५३ ॥ नैमित्तिकेत्वनध्यायः नित्येनैवप्रदुष्यति नित्यकर्माणिकुर्वीततत्कालेनैमित्तिकंबुधइति ॥ ५४ नित्यशब्देन संध्यावंदनोपलक्षणतया तदतिरिक्तानां ब्रह्म
यज्ञादीनां वैश्वदेवादीनां सिवार्चनादीनां कर्तव्यताबोध्या एतदुक्तंदिनकरग्रंथे व्यासः संध्यावंदनमेताद्धि ब्रह्मयज्ञमपीतरात् ॥ रुद्राध्यायंवैश्वदेवं नानध्याये प्रलो
पयेदिति ॥ ५५ ॥ तदनेनवचनेन नित्यकर्मतयाप्रतितानां वेदवाग्व्यवहाराणां व्यवस्थितौ व्यवस्थितौशास्त्रं तदंगत्वेनाविहितमिति यदुक्तंतदसंगतं उभयोः परस्पर
प्रामाण्यापत्तेः तदन्यनथादेवदत्तायज्ञदत्तं विश्वसतीतिन्यायस्यानिरर्थकतास्यात् तेनचोभयोः स्वतंत्रतयाव्यवस्थाकल्पनीया शब्दार्थनिर्णयमुखेन शास्त्रंवेदोपका-
रिवेदशाङमुखेव शास्त्रस्यप्रवृत्तीरिति एतदुक्तंनिर्णयतरंगिण्यां वेदशास्त्रोपकारीस्याच्छास्त्रंवेदोपकारकं उभयोरंतरंजातस्त्ररकेपरिपच्यतइति ॥ ५६ ॥ तथाच
वेदस्यानध्यायप्रवृत्या शास्त्रमपिअनध्यायमासजत इतिव्यवस्थितिः देवलः यथावेदस्यानित्यत्वादनध्यायाविधीयत तथाशास्त्रस्यानित्यत्वादनध्यायंप्रचक्षत
इति ॥ ५७ ॥ नत्वेतेनप्रकृते किमापन्नमित्याशंकाय. वेदशास्त्रयोस्तुल्यसामर्थ्ये वचनेनगुरुमुखेपाठोवर्जनीयइतिनिर्णयोबोध्यः तथाचरल्लः पठित्वावेदशास्त्राणि
तान्यनध्यायतस्त्यजेत् ॥ ब्रह्मयज्ञादिकंसर्वं नित्यत्वान्नैवदुष्यतीति ॥ ५८ ॥ एतेनप्रतिपदोनध्यायस्य व्यवस्थायांप्रतीतायां सौराष्ट्रमहाराष्ट्राद्विजातयः युगादिघस्रे
सूर्यमुद्दिश्यतत्दिनेपूजाविधायद्यु; पारणांविधायतदुत्सवंकुर्वंतीतिप्रतीतिः एतत्तु उक्तंनिर्णयामृते युगादिघस्रप्रतिपत्तदिनेसूर्यपूजनं उपवासः परेह्निः स्यादुत्स-
वः पारणापरामिति ॥ ५९ ॥ एतदेवव्रतंसूर्यभक्ताः सूर्यलोकप्राप्तयेकृत्वातिधुद्यापनंकुर्वंतीतिद्वादशवत्सरंव्यवस्थितिः उद्यापनेसतितव्रस्यसांगत्वंबोध्यं तत्रहोमस्य
मंत्रानिरूपणं कथमित्याशंकायांभरद्वाजेनोक्तं उद्यन्नद्येतिमंत्रेणसमिदाज्यचरून्हुनेत सौरव्रतसमाप्तिः द्वादशेवत्सरेचतादिति तत्रकलशपूजावायनदानंगोदानंच

यद्यत्सर्वैनिर्णयरत्नाकरेव्यवस्थितामित्युपरम्यते एवमहोरात्र्योर्व्यवस्थायां विवाहादिलग्नसिद्धौतिथिनिर्णयेतिथिखंडस्य युक्तत्वमुदाहृत्यतत्रप्रातिपदिविवक्षावि षये सूर्योदयादारभ्यसंगवकालोनिर्णीतः तेनचसूर्योदयस्स्प्रातःकाले षण्नाड्यः प्रतीतः तत्पूर्वमुषःकालः अरुणोदयश्चेतिप्रतीतौस्थितायां तद्विषयेनाडिभेदोवि चार्यते अंगिराः सप्तपंचाप्युषः कालोप्यष्टपंचारुणोदयः नाडिद्वयंपरस्तात्स्यात्सूर्योदयइतिक्रमइति ॥ ६० ॥ ननुअरुणोदय कालादूर्ध्वप्रभवतीतिव्यवस्थापितं तथा चक्रोयमरुणः कस्तस्योदयइतिविवक्षायां यासेप्रतीयते पादायर्धंसमुत्पन्नं शरीरेविनतासती अंडबिभेदसहसाति तोनूरुरजजायत ॥ ६१ ॥ उत्पन्नश्चततोनूरुर्वर्णा दरुणतांगतः मातुःशापंप्रदायासौसूर्यस्यरथमारुहादिति ॥ ६२ ॥ अत्राहिसूर्यस्यरथमारुहादितिवचनेन सूर्यसारथित्वमरुणस्यप्रकाशितं तस्येववरप्रदानं कूर्मपु राणेसूचितं अरुणंवरमादाइतिरेषविभावसुः ममोदयात्पूर्वमेवतवोदयंमिहास्तुवै ॥ इतिदत्वावरंतस्मै सारथित्वंचतस्यवै ॥ प्रदायलोकोपकृता वुदयायदिवाकर इति ॥ ६३ ॥ एतेनारुणस्यसूर्यसारथित्वानिरूपणेनतत् उदयस्यतत्पूर्वप्रसक्त्या व्यवस्थायांसिद्धायां अष्टपंचारुणोदयइतिनिर्णीते एकनाडितदुदयेप्रतीयते तत्पर स्तात्सूर्योदयइतिसिद्धं वृद्धमनुः अरुणोदयकालोहि सैकानाडिविशिष्यते ॥ अष्टपंचाशदित्युक्त्या सूर्योदयपरिश्रयादिति ॥ ६४ ॥ तथाह सूर्योदयपरिश्रयादित्य तेन सूर्यवरप्रदानसूचनं व्यक्तीकृत्यअष्टपंचाशन्नाड्यामरुणोदयेप्रतीतेसर्वतिथिनिर्णयस्यापि साधारणतया प्रतिपन्निर्णये निरूपितोयं कालविशेषः अन्यथातत्र तत्रपृथग्व्यवस्थापनाविषये गौरवस्यादिती यदाहदेवलः सामान्यात्संप्रतीतौहि विशेषेनिर्णयोभवेत ॥ एकत्रस्यावस्थानं संज्ञामात्राहकेवलामिति ॥ ६५ ॥यद्यपि संज्ञामात्रोहिकेवलामित्युक्त्याअरुणोदयशब्दस्य कालविशेषेसंज्ञाप्रतीयते तथापि तदूत्पा सिदशायां स्वरूपनिरूपणंविनालोकाविश्वासाभावेन कथाप्रपंचिता तदने नव्यवहारेण तिथिषु सामान्येनारुणोदय ॥ व्याप्तिगृहीतव्येति यत्रविशेषस्तत्रप्रभातादिबोध्य इतिनिश्चितोयंकालनिर्णये सूर्योदयात्प्रारुणोदयइति ॥ विस्तरस्तु हेमाद्रौ निश्चितइति सावधानं तत्रैवबोध्यमितादिक आनंदगिरिणाप्रोक्ते स्मृतिसारसमुच्चये ॥ चूर्णोद्वितीय उल्लासः कांडेनैमित्तिकेशुभः ॥ ६६ ॥ इतिश्री आनंदगि रिस्वामिकृतेस्मृतिसारसमुच्चये नैमित्तिककांडे द्वितीय उल्लासः

नकुद्दनमवलम्ब्य सामान्यतिथिनिर्णयसंभवेपिविशेषावाधिमनुस्मृत्य ग्राह्यताप्रयोजकतया प्रतीयतइतिसिद्धं तेनच वैशाखशुक्लप्रतिपदः विशेषतिथित्वे चंद्रो-
त्पत्तिदिनमिति चांद्रव्रतं बोध्यं यदाहरल्लः चांद्रव्रतंप्रकुर्वीत वैशाखमासिभूसुराः ॥ द्वितीयायांशुक्लपक्षे पंचवत्सरमीरितामिति ॥ ६ ॥ तदेतद्विवक्षायांव्रतप्रारंभा-
वसानयोः काण्वमाध्यंदिनविषयतया हेमाद्रौप्रतीयततया तत्रैवव्यवहर्तव्यमित्युपरम्यते पूर्वंचंद्रोद्वितीयायाः वैशाखमासप्रयुक्ताद्वितीयानिर्णयसंभवेतामेव के-
षु चिद्देशेषुयागाद्वितीयेत्याहुः एतच्चिद्दानींकिमित्याशंकायांशिवरहस्ये स्वर्णबीजंसुराःपूर्वं दैत्यानांभयपीडिताः ॥ वन्हिहस्तेतुदत्वैवयुयुधुस्ते सुरैसह ॥ ७ ॥ दैत्या-
नांनिधनेपश्चाद्वान्हिर्नैवप्रदत्तवान् ॥ उपास्यतुमहेशानं स्वर्णबीजंतुलेभिरइति ॥ ८ ॥ अत्रहि वान्हिनापहृतस्यस्वर्णबीजस्य पुनरलाभेसतियद्दिनेशिवप्रार्थनयात प्र- [७]
यक्षमकुर्वन् तद्दिनंयागाद्वितीयेतिसिद्धं अतएवतद्दिनेस्नानं विप्रार्चनं वन्हौयथाशक्ति होमोपिकृतो वान्हिप्रीतयेभवतीति वन्ह्युपासकानांव्यवस्थितिः साकियन्ना-
डिउपरिग्राह्येति शंकायां लोगाक्षिः नवनाडिप्रयुक्तेयं वैशाखेमासिकथ्यते ॥ यातुयागाद्वितीयास्यात्पराकार्याप्रयत्नतइति ॥९॥ एतेनसंगवकालव्यापित्वे वन्हेर्मध्य
हकालापेक्षासत्वेपितद्दिनेतस्यवैमुख्यकालत्वंप्रतीयते यदाहवृद्धवासिष्ठः यागाद्वितीयाप्रोक्ता वैशाखेमासिपूजिता ॥ मुख्यसंगवकालोयं पूजाहोमादिषुस्थितइ

ति ॥ १० ॥ अस्मिन्दिने अग्निहोत्रारंभस्यापिमुख्यतमत्वंबोध्यं यदुक्तं निर्णयामृते शुक्लयागाद्वितीयायां वैशाखेमासिभूसुराः ॥ अग्निहोत्रारंभकालं ज्ञात्वाकुर्वीतया-
ज्ञिकाइति ॥ ११ ॥याज्ञिकायज्ञसंप्रदायविदत्यर्थः ननुकर्तुश्चंद्रताराबलयुक्तेशुभेह्यग्निहोत्रमारंभणीयमिति व्यवस्थितौ किमेतेद्दिद्दिनं श्लाघ्यतांदत्तइति चेन्न तिथ्यं
तरेषुतदुपयोगात् तथाहव्यासः यागाद्वितीयांसंत्यज्य यदन्यादिवसेबुधः ॥ अग्निहोत्रंप्रारभतेचंद्रताराबलंभवेदिति ॥ १२ एतेनचंद्रताराबलस्य तद्दिनेनिरस्तत्वंबो
ध्यं अन्यथाविद्यादशमीदिनेविद्याक्षरारंभस्यतथात्वापत्तेः यदाहरल्लः यागाद्वितीयासंप्राप्या योमूढोदूषतेतिथिं ॥ सघोरपापीविज्ञेया तस्यलोकोनविद्यत ॥ १३ ॥
तदनेनवसंतेग्निहोत्रमादधीतेत्येत्याधान कालस्यश्रुत्यर्थ विवक्षिततया विवेकपर्वोति सुगमोयं लोकव्यवहारः अथज्येष्ठेमासि प्रतीतायां द्वितीयायांज्येष्ठागौरीव्रत
माहुः कात्यायनः द्वितीयापूजितानूनंज्येष्ठेमासिप्रतीयते ॥ पूजांकुर्वीतयत्नेन तस्यांगौरी नसंशयइति ॥ १४ ॥ साकियन्नाडि प्राप्नोति चिधिसंशये आपस्तंबआह ज्ये
ष्ठागौरीसमभ्यर्च्य ज्येष्ठेमासि नरोत्तमः ॥ वांछितांलभतेसिद्धिं साचतुर्नाडिकावधिरिति ॥ १५ ॥ ननुसेयंसुवासिनीभिरुपास्यातव्याप्यातिथित्वात् तदाहगार्ग्यः
सैभाग्यदायिनीज्येष्ठा ज्येष्ठेमासिप्रशस्यते ॥ गौरीपूजाप्रयत्नेन वनिताभिर्विशेषसइति ॥ १६ ॥ एतेननरोत्तमइत्युक्त्वा तदुत्तरवचनेनतद्व्रते साधितेवनिताभिरि
तितत्र प्रतीततयापरस्परं विरोधस्यादितिचेन्न तद्व्रतस्यदौर्भाग्यनिदानहेतुतया स्त्रीपुंसाभ्यांकर्तुमुचितत्वात् अन्यथाशुंभासुरनिधनाय गौर्यामुत्पन्नया दुर्गया
कृत शापवृत्तया जन्मांतरदारिद्र्यलाभात एतद् [illegible]कालहेमाद्रौ कालिकापुराणे ज्येष्ठमासिद्वितीयायां [illegible]

ज्येष्ठमासि भवेद्यदाव्रततातिथिः सौभाग्यदायिन्यसौ। याशुक्लाप्रार्थितानि शासुतादिह प्राशात्तकुक्तंयतः॥ सापोर्ज्यैवमुदाव्रतस्यविषये यात्तुद्वितीयाशुभा। जग्ध्वाव फलमूलमत्रवनिताः कुर्वीतिपुण्यव्रतामिति॥ २३॥ अत्रगौरीपूजादिकंसर्वंव्रतकल्पास्थितामिति साधूपरम्यते यदेतज्ज्येष्ठागौरीव्रतमुदीर्णतद्यादिमध्ये सुवासिनीनां रजस्वलादोषप्रसक्तौ नित्यंतद्व्रतं कथंसंघटतइतिचिंत्यते मरीचिः ज्येष्ठागौरीव्रतंह्येतत्प्रतिसंवत्सरंभवेत्॥ नित्यंयस्यनलोपोस्ति दोषेसतिकथंभवेत्॥ २४॥रजस्वलादोषयुता व्रतनिष्ठासुवासिनी॥तद्दिनेसमुपोष्यैव व्रतंकुर्यान्नसंशयइति॥ २५॥ अत्रहि व्रतंकुर्यादित्यनेन तद्दिने दोषसत्वेस्ततः तदकरणाभावे पूजादिकमाचार्यमुखाद्विधायव्रतसमाप्तिः कार्येतिनिर्णयःएतदुक्तंहेमाद्रौ रजस्वलाव्रतंकुर्याद्वाचार्यस्यमुखेनाहि॥ प्रसादःसंगृहीतव्यस्तद्दिनोपोषणं भवेदिति॥ २६॥ नन्वेवंसति वायनदानसुवासिनी ब्राह्मणभोजनातिरिक्ततया कथंव्रतपरिपूर्तिरितिचेन्न लक्षणांगीकारेण तन्निर्णयात् तथाहि तद्दिने वायनादिकमपकृष्यशुद्धस्नानादिने सर्वकार्यमितिव्यवस्थितिः एतदुक्तंरत्नेन शुद्धस्नानंविधायैव पंचमेन्हिरजस्वला॥ वायनादिप्रदत्वैव व्रतसंपूर्तिमाचरेदिति॥ २७॥ यद्यपितद्दिनेपूजादिकमाचार्यमुखाज्ज्ञातंतल्लक्षणयापकृष्णपंचमेन्हिसर्वकार्यमितिनिर्णयः अन्यथातत्प्रत्यवायतयाव्रतसंपूर्तिरसिद्धेः एतदुक्तंब्राह्मे पंचमेन्हिप्रकर्तव्यं व्रतसंपूर्तिकाम्यया॥ पूजादिकंनचेत्तस्याः महान्भवेदिति तदेतद्व्यवहारेण कृत्स्नफललाभद्वैतियिकदोषोनिरस्यतइतिसिद्धं वृद्धगार्ग्यः पिष्टपेषणदोषोहिव्रतकार्येनविद्यते॥ ज्ञात्वाव्रतंप्रकुर्वीत व्रतिनीस्त्रीरजस्वलेति॥ २८॥ एवमेतद्व्यतिरेकेण यान्यथाकरोति तत्रानित्यलोपविधानतयास्वरूपनाशः तेनैवक्लृप्तकल्प्ययोर्मध्ये क्लृप्तस्यैवगरीयस्त्वादितिन्यायेनयुक्तमुत्पश्यामः केचिदाहुः पूजादिकमपि पंचमेन्हिकार्यमितितन्न व्यासअदोषप्रसक्ते तदुक्तंब्रह्मांडपुराणे क्लृप्तयोगविधानंहिव्रतमध्येप्रतिष्ठितं॥ तद्दिनेन्यमुखेकृत्वा व्रतमेतत्प्रसाधयेदिति॥ २९॥ एतदुत्तरंकिमितिप्रसंगेनेत्युपरम्यते यदेतद्द्वितीयाभेदे आश्वीशुक्लपक्षद्वितीयामश्वपूजाद्वितीयामाहुः यदाहदेवलः अश्वपूजाद्वितीयेयमाश्विनेमासिकथ्यते॥ राजानोश्वंपूजयित्वापरांसिद्धिमवाप्नुयुरिति॥ ३०॥ एतेनादिग्विजयायनिर्गमनेमहानवमी मध्यगततयासापूज्यतमबोध्यातेनचतस्यांतिथौपुजयित्वाततो नवमोदिवसेविशेषपूजांविधाय दशम्यांनिर्गच्छंतीति प्रतीतिः तत्राहिनीराजनशांतिर्विहिता यदाहव्यासः अश्वपूजाद्वितीयायां शांतिंनीराजिनाभिधां॥ कृत्वात्रजंतिराजानः विजयायजयातिथाविति॥ ३१॥ एवंस्थितायाअश्वपूजाद्वितीयायांकियन्मुहूर्तंपरदिनेग्राह्यमितिविवक्षायां हारीत आह द्वितीयात्वश्वपूजायांत्रिमुहूर्तंप्रशस्यते॥ परस्मिन्दिवसेयस्मात्परेषांविजयोभवेदिति॥ ३२॥ यदिद्विहासवृध्योः विकल्पविधिः तथापि सामान्यविषयोबो

ध्यः शातातपः द्वितीयासर्वसामान्या षण्नाडीसाप्रशस्यते द्विमुहूर्तात्परंग्राह्य परास्मिन्दिवसेयदीति ॥ ३३॥ तथाचयुक्तव्यवहारेण सामान्याव्यवस्थितौ नियतोऽयं
षण्नाडीविषयः एतदुक्तंकालहेमाद्रौ सामान्यावादिषण्नाडीद्वितीयाद्विमुहूर्ततः अश्वपूजाद्वितीयायांमुहूर्तत्रितयंभवेदिति ॥ ३४ ॥ तथाचगौरवामियापरास्तोयं
द्विमुहूर्तोत्तराविधिःसिद्धंतु नीराजनकर्मणोप्राशस्तेनाभयदाराज्ञामितिविवेकोबोध्यः यदाहरल्लः राज्ञांनीराजनाविधौ मुहूर्तत्रितयंभवेत् परस्मिन्दिवसेतद्धि विजयं
संप्रयच्छतीति ॥ ३५॥ उक्तरीत्याव्यवहितान्वयाभावे दिवसद्वयातिक्रमे पूर्वतिथ्यांयोगे सत्यपिपरेद्युरन्वेष्टव्यमितिदिक् यद्यवस्थाया माघशुक्लद्वितीयायां गोपद्मव्रत
मुच्यते तद्विषयेनिर्णयःप्रपंच्यते विश्वावसुः माघशुक्लद्वितीयेयंमहितेतिप्रभण्यते तस्यांतिथौप्रकर्तव्यंगोपद्मव्रतमुत्तममिति ॥ ३६ ॥ अत्रहिवैलक्षण्येन गोपद्मव्रत
शब्देन किमाधेयं विवक्षितामितिशंकायां बादरायणआह पद्मसंख्यांसमाश्रित्य गवांवृंदंप्रदीयते तत्पुण्यंलभतेनूनं गोपद्मव्रतमीर्यतइति ॥३७॥ एतत्पभिर्नाडीभि-
रितिविवक्षायां नारीभिरितिव्यवस्थाविधीयते एतदाहकात्यायनः नारीभिः क्रियतेनूनं गोपद्मव्रतमुत्तमं ॥ गोष्ठगोकुलसंपत्तिः सौभाग्यंचाविवर्धतइति ॥३८॥ सा-
कियन्नाडीग्राह्येतिसंशये लौगाक्षिराह गोपद्मव्रतमुद्दिश्य द्वितीयातुत्रिनाडिका पराकार्याप्रयत्नेन महीतेतिप्रकीर्त्यतइति ॥ ३९ ॥ तदेतत्त्रिनाडिव्यवहारेणपुनः
संदेहप्रवृत्तिःपूर्वातिथ्यांतत्कालव्याप्तेःएतत्संशयमनूद्यादेअनकरग्रंथेउक्त। तिथिद्वयेमुख्यतमा द्वितीयास्याऽष्टनाडिका द्वितीयाचतृतीयाच सानाडीसफलप्रदेति
॥ ४० ॥यदेतद्वचनमनूद्यगार्ग्योप्याह दिनद्वयेप्रतीतायांद्विनाड्यांतुप्रशस्यते परेद्युरेवानिश्चित्यह्रासवृद्धिनकारणमिति ॥ ४१ ॥तथाचपूर्वापरपर्यालोचनायांछागा-
धिकरणन्यायेन यद्यपिविशेषविधिः पर्यवसितःतथापि सामान्याधिकरणन्यायेन युक्तायुक्तनांविचार्यपरेद्युर्दृढीकारोबोध्यःतेनचसंदेहानिर्णयेजातकेनविधिनाका
र्यम् तद्व्रतनित्यपेक्षायां यदाहांगिराः स्नात्वाप्रत्यूषसमये गोष्ठमुद्दिश्ययत्नतः ॥ पद्मादीन्विरच्येयात्र गृहेहोमंसमाचरेदिति ॥ ४२॥ तथाहिगृहेहोमंसमाचरेदित्युक्त्या
व्याधिकरणधर्मेण साध्यसाधनयोरनुलोमविलोमाभ्यांप्रकृतकार्यताप्रसक्तौ प्रकृतोपयोगेगृहे इयंविधिरितिनिश्चयोविविच्यते यदाहोशनः यन्निमित्तंपुरस्कृत्य
गृहेहोमोविधीयते ॥ तदेवतुफलंबोध्यं प्रत्यवायोनाविद्यतइति॥ ४३ ॥ भरद्वाजोपि गोपद्मव्रतमेतद्धि सौभाग्यादिविवर्धनं गोष्ठप्रातर्दिनेकार्यं फलंचाविकलंभवेदिति॥
विस्तरस्तुव्रतकांडेसम्यगेवानिरूपितइति ॥ ४४ ॥ साधारणातिथिषुप्रतीतया द्वितीयाविशेषविधौनिर्णीते तस्याबुधवासरयुक्तत्व वेदशास्त्राणांव्यवहार शुक्रस्य
दैत्योपदेशतया तद्दिनस्यमंदवृत्तिहेतोरनध्यायोविज्ञेयः ॥ एतदुक्तंमात्स्ये शुक्रोबुधद्वितीयायांदैत्यानामुपदिष्टवान् ॥ वेदशास्त्राणितेनैतामनध्यायंप्रचक्षत

सरस्वतीपूजायुक्तात स्थितेः स्वरूपसिद्धिः अन्यथाप्रत्ययाधिकरणन्यायेन स्वरूपभंगापत्तेः निश्चितत्वेनरूढलक्षणयातिप्रसवापत्तेश्च यदाहकात्यायनः सिद्धस्य
यादिबाधास्यात्तत्कालस्त्यजते सुखे ॥ ततोप्याधिकलाभस्यात्साहसंसंपारेत्यजेदिति ॥५१॥ यद्यपितद्दिनेसरस्वतीपूजायां निवृत्तायां शक्यंतथाप्यसुरग्रस्ततया
मंदबुद्धि साधनत्वेन संपरित्याज्यमेतीतिदिक अनध्यायविषयामहानवमीव्रतमध्ये बुधद्वितीयायादिप्रसक्ता तत्रकथंपारायणस्येष्टतयावेदशास्त्राणामितिचिंत्यते
सोनध्यायः महा नवम्यामपिनवादिव्रतचर्याविधाया ॥ तावन्मात्राधिकारोस्वाध्यायोस्त्वेति अत्रोक्तंसारावल्यां नवरात्रव्रतदिनमनध्यायंप्रचक्षते ॥ वेदपारायणंका
र्यं शास्त्रपारायणंतथेति ॥५२॥ एतेनगुरुशिष्ययो परस्पराध्ययनेतदनर्हताप्रतीयते बुधद्वितीयायदितन्मध्यपतितत्वेपि नित्यमेवानध्यायः एतदाहकात्यायनः बुध
द्वितीयासंप्राप्ता नवरात्रिव्रतास्थितौ ॥ गुरुशिष्यातिरेकेणयामिनांनैवदुष्यतीति ॥ ५३ ॥ एतदप्युक्तंनवरात्रिव्रतमध्ये नवानांदिनानामनध्यायइति एतदसंगतं तत्र
दिनत्रयग्राह्यत्वात् सप्तम्यष्टमीनवमीतिथिषु सरस्वतीपूजाविधानात् एतदुक्तं स्मृतिचिंतामणौ सरस्वतीयत्रमहानवम्यां संपूज्यतेसात्रिदिनंयथोक्तं ॥ यासप्तमी [९]
मध्यगतानवम्यां ।विसृज्यतेसादशमेन्हिनूनामिति ॥ ५४ ॥ तथाहनवानांदिनानामनध्यायविधानं व्रतचर्याभिप्रायपरं तथाचव्यवहारे सप्तमीमारभ्यनवमीपर्यं
तंदिनत्रयपूजातिक्रमे दशम्यांतद्विसर्जनस्वाध्यायोयुक्ततरः एतदाहशाट्यायनिः त्रिदिनंपूजयित्वैव भारतींलोकमातरं दशम्यांप्रातरुत्थाय वेदशास्त्रंपठेन्नरइति
॥५५॥पैठीनसिरपि यावत्कालमनध्यायस्त्रिदिनंसंप्रकथ्यते ॥ दशमीदिवसेप्रातर्वेदशास्त्रंपठेन्नरइति॥५६॥ नचैतद्वचनद्वयं सामान्यपरमितिशंकनीयं महानवमीमु

द्दिश्यैवसरस्वतीस्थापनताप्रतीतेः अन्यथाप्रकृतहानाप्रकृताभ्यागमप्रसंगः एतदाहवृद्धमनुः महानवम्यांप्राप्तायां त्रिदिनंसंप्रपूजयेत् सरस्वतीप्रसंतुष्टा तांद्वितीदि
शतेनरक्षति ॥५७॥ गार्ग्योपि सप्तम्यादित्रिदिवसं भारतींपूजयेन्नरः ॥ अनध्यायंप्रकुर्वीत सर्वथाविधिनंशुभइति ॥५८॥ यद्यपितावदेवदिनंभवेत्त्रिस्पृक्त्वात्दिनत्रयमात्र
प्रतीयतेतोनध्यायस्याभिलक्षितत्वं तथापि[illegible]नध्यायविधिरिति नवरात्रव्रतमुद्दिश्ययोयोविधिःनियतयाप्रतीतइति ॥ तत्रसूतकप्राप्तौ
[illegible] ततःतथाकार्यंनसंदेहः सूतकांतेभविष्यतीति ॥५९॥ सूतकांतेभविष्यतीतियद्वचनमुदाहृतमसंगतमियप्रतिभाति व्रत
स्यपूजाभिधानतयातात्पर्यनतभोजनस्यापिलुप्तत्वादितिचेन्नतत्कालेब्राह्मणमुखेनपूजायाविधिविहिततयासूतकांते सर्वेषांपूजाविधीनां नवानामेकास्मिन्दिनेविधा
पवायनादिप्रदानस्ययुक्तत्वात् एतदाहवृद्धमनुः सूतकंनवरात्रस्य मध्येत्वापततिध्रुवं ॥ सूतकांतेवायनाद्यं पूजांकृत्वानिवृत्तयेति ॥ ६० ॥ त्रिकांडमंडनोपि नवरात्रौ
लुप्तपूजांसूतकांतेनिवर्त्यच ॥ वायनादिप्रदत्वैव ब्राह्मणान्भोजयेत्तइति ॥ ६१ ॥ तदत्रपूजायाःव्यवहारलक्षणेनब्राह्मणमुखेनसमाप्तिर्दृश्यते तथापिसूतकांतेतामेव
पूजामपकृष्यकुर्यादितिविवेकः ननुत्रिचतुरदिनादूर्ध्वंसूतकमापन्नंतत्रसर्वासामपकर्षणमुतावशिष्टमात्रस्येतिसंशये वृद्धहारितआह पूजावद्यवशेषेण कर्तुंयुक्तस
राभवेत ॥ व्यवधानस्यदोषेण कुर्यात्सर्वांपरान्नराणि ॥ ६२ ॥ [illegible]

एतेनप्रायश्चित्तविधानात् व्रतलोपपरिहारे पुनर्नक्तोपवासयोर्व्यवस्थितिर्विज्ञेया अतएवाहकात्यायनः व्रतलोपेनिवृत्तेतु व्रतंकुर्यात्प्रयत्नतः ॥ अन्यथारौरवंयाति प्रायश्चित्तविधानतइति ॥ ६७ ॥ ननुपूजादौसूतकविषये द्विजमुखेप्रत्यवस्थापितं नक्तोपवासयोः किंविनिगमकमितिचेन्न तयोर्देहाधिकारत्या तदपेक्षयाव्यतिरेकात् अन्यथाराजामात्ययोः सामान्यतापत्तेः यदाहदेवलः सामान्यमन्यतः कार्यं विशेषः स्वेनचेष्यते ॥ व्रतस्यपूर्तिर्भवति नचेत्कष्टभाविष्यतीति ईदृशेविषये सामनाधिकरण्यं नक्तोपवासपूजावायनादौ नसंभवतीतिसिद्धं चय=वोक्तं वृद्धहारितेन नक्तोपवासौपूजाच वायनंचयथातथं ॥ परहस्तेनकुर्वीतपुनःशुद्धेह्निकारयेदिति ॥ ६८ ॥ एतत्क्षत्रियादिविषयं अतएवाहमनुः क्षत्रियाःपरहस्तेनसूतकेपर्यवस्थिते दानहोमादिकंकुर्युर्ब्राह्मणास्युःस्वयंयतइति ॥ ६९ ॥ तथाच ब्राह्मणास्युस्वयंयतइत्युक्त्याब्राह्मणानां स्वतोधिकारः प्रसक्तः तेननक्तोपवासादेः सूतकेस्वतःकरणेप्रत्यवायाभावेन पूजावायनादौ शुद्धान्हिकार्यताप्रसक्तिरितिव्यवस्थितिः एतदुक्तं स्मृतिकल्पतरौ उपवासश्चनक्तंच सूतकेनैवदुष्यति ॥ पूजावायनदानादेरधिकारोनविद्यतेति ॥ ७० ॥ एवमेतावताव्यवहारे स्मार्तस्यप्रायश्चित्तोव्रतलोपसिद्धिरितिसम्यगेवेवव्यवस्थापितंबोध्यं आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये ॥ पूर्णस्तृतयउल्लासः कांडेनैमित्तिकेशुभः ॥ ७१ ॥ इति श्रीआनंदगिरिस्वामिकृते नैमित्तिककांडेतृतीयउल्लासः

कैलासानलयशंभुं कारुण्यंकरुणालयं ॥ प्रणमामिसतां प्रीत्यै वर्तमानजगत्गुरुं ॥ १ ॥ पंचदशसुतिथिषुद्वयोतिथ्योः सूर्याचंद्रमसोरुत्पत्तिहेतुतया विनिर्णये
जातेतत्सांगत्येन द्वयाऽर्थोविशेषोभिहितः झटितिप्रवृत्तिर्लोकव्यवहारइति न्यायेन शिष्टानां तिथीनांसकृदेवसमाप्तिर्नीयते तत्रयावतां विशेषध्य स्तावतामेवोतिध्देयं
तद्परासामान्याविशेषपरतयाभिहिता अन्यप्रकारास्युस्तदु परिबोध्याः राधेमासितृतीयात्वक्षय्याख्या साशुक्लपक्षेव्यवस्थितेति तदुत्पत्तिनिर्णयः कथ्यते स्मृति
कामधेनौ वैशाखमासप्रकृतौ तृतीयायाप्रतीयते ॥ सात्वक्षय्याभिधानूनं शुक्लपक्षेप्रवर्ततइति ॥ २ ॥ शिवधर्मोत्तरे दक्षस्यदुहितासाध्वी यदाहिमगिरौपुनः ॥ जनिं
लेभेत्वक्षयाख्या सातृतीयाभिधीयतेति ॥ ३ ॥ अत्राहि वैशाखशुक्लपक्षतृतीयायाः पार्वतीजन्मदिनोक्त्याश्लाघताप्रतीयते तदेवंव्यवहारेणतृतीयाकियन्नाडीपरिग्र
ह्यापूर्वापरावेतिविचिकित्सायासामान्यतः सूत्रकृता तृतीयायः सर्वेषामित्युदाहृतं विशेषोहिहेमाद्रौविविच्यते गौतमः सर्वातृतीयापरतः गृह्यतेनतदन्यथा ॥ तथा-
प्यत्रिमुहूर्तेन परतश्चेत्प्रशस्यतइति ॥ ४ ॥ वृद्धगार्ग्योपि त्रिमुहूर्तातदूर्ध्वंचेदर्धनाडीयदिस्थिता ॥ तृतीयासापराकार्या दध्वौह्रासेयथाविधीति ॥५ ॥ स्मृतिचिंतामणौ
यदितृतीयापरतःप्रतीता । सेयंमुहूर्तात्रितयापरंचेत् ॥ याप्यर्धनाडीत्वथवैकनाडी । सात्वक्षयायांचतिथौप्रशस्तेति ॥ ६ ॥ ननुअक्षय्यातृतीयायाः पार्वतीजन्मदिन-
त्वेनप्रतीतायाः परदिनेसामान्यतःवचन.तरे मुहूर्तत्रयंतदतिरिक्ततया नाड्यर्धतदूर्ध्वमर्धमपिप्रतीयते कुतोयंविकल्पइतिचेन्न दर्भाणांस्थानेशरैःप्रस्तरितस्यमिति
वत्सार्धत्रिमुहूर्तेनाड्यनवकाशेतावताव्यवस्थितिर्बोध्या यदाहगालवः तृतीयात्वक्षयाह्येषा स्वाधिकाचेत्प्रशस्यते ॥ मुहूर्तत्रितयंग्राह्यं स्नानेदानेचशस्यतइति ॥ ७ ॥
तदापार्वतीजन्मदिनत्वे काश्मीरदेशेसुवासिन्यःप्रातःस्नात्वामृन्मयींगौरीं.मूर्तिविधायपूजयित्वातांजलेसमुत्सृजेतीति प्रतीतिः यदाहापस्तंबः देशभेदव्यवस्थायां
काश्मीरदेशमंडले ॥ अक्षयायांतृतीयायांगौरीपूजाविशिष्यतेति ॥ ८ ॥ विस्तरस्तुस्मृतिमरीचिग्रंथेसमाधेयः विशेषविधयागिरिजाजन्मदिनत्वेनाक्षयतृतीयानि-
र्णीता ततोमहाचतुर्थ्यांमहागणपतिजन्मदिनत्वेन सानिर्णीयतेमनुः चतुर्थकुजवारेण मंदवारेणवायुता । चित्रानक्षत्रयुक्तेयंमहागणपतेर्दिनामिति ॥ ९ ॥ नन्वस्मिन्व-
चने सामान्यचतुर्थ्येवाविज्ञायते महाचतुर्थकुतोजातेतिचेन्न योगविशेषविधानेनतन्निर्णयात् यदाहसंवर्तः भाद्रेमासिचतुर्थीयाचित्रनक्षत्रसंयुता ॥ कुजवारेणवा
युक्तासाचतुर्थीमहीयसीति ॥ १० ॥ ननुभाद्रपदमासस्यक्लृप्तिमात्रतयानायंविशेषविधिः कुतोविशेषइतिचेत्ब्रूमः शिवरहस्ये भाद्रेमासिसमुत्पन्नो गिरिजोदर -
तोविभुः ॥ महागणपतिर्नूनं गजास्योयंचतुर्भुजः ॥ ११ ॥ शनिपीडामहेशस्य निवृत्ताबहुकालतः ॥ देवानामभयंचाभूत्तद्दिनेसर्वमंगलइति ॥ १२ ॥ नचैवमेवंविधपु

मितिचेत्ब्रूमः पूजाकालस्यमुख्यत्वात् तथाहि सार्धपंचदशनाड्याः परंन्यूनषोडशनाडीमुख्य पूजाकालः यदुक्तंरल्लेन सार्धपंचदशींनाडींसमुल्लंघ्यततः परं॥ न्यूनषोडशनाडीयं पूजाकालः प्रशस्यतइति ॥ १९ ॥ ननुतावत्कालग्राह्यतायाः प्रयोजनंकिमुत्पन्नमितिचेन्न प्रत्यवायश्रवणात् यदाहशाट्यायनिः पूजाकाल समुल्लंघ्यत्वपचारंकरोतियाः॥ व्रतंतान्निष्फलंप्रोक्तमुपवासोनिरर्थकइति॥ २० ॥ मांडव्योपि मुख्यकालमतिक्रम्य व्रतंचरतिमानवः॥ गणेशस्यापचारेणविघ्नैरे-वाभिभूयतइति ॥ २१ ॥ उभयदिने तत्कालव्याप्तिसत्वे कथमितिचेत्ब्रूमः परदिनस्यैवश्लाघ्यत्वात ॥ केचिदाहुरदिकव्याप्तिर्ग्राह्येति तत्रकालव्यातिक्रमबाधात यदाहपैठीनसिः पूजाकालः परदिने यदिप्राप्ताचतुर्थिका ॥ तामेवकुरुतेनूनं गणेशस्येतिनिश्चयइति ॥ २२ ॥ विशेषस्तुकालमरीचे स्थितइतिसाध्वेतस्मादुपर म्यतेयोगविशेषस्य प्राबल्यमुक्तामता चतुर्थीनिर्णीता ततएवतत्परस्तात्कश्यपादीनां लोकाभ्युदयसृष्टिदिनतय मुनिपंचमीनिर्णीयते वराहपुराणे सिसृक्षुविश्व-सृक्पूर्वं कश्यपादीन्महात्मनः यद्दिनेसृष्टवान्प्रीत्य तद्दिनंमुनिपंचमीति ॥२३॥ तत्पूजादिरुक्ता ब्राह्मेषष्ठांशे रजोदोषनिवृत्यर्थंसप्तर्षीन्पूजयेन्नृप सुवासिनिप्रयत्नेन यातिधर्मुनिपंचमीति ॥ २४ ॥ अत्राहमुनिपंचम्याः प्रयोजनसंभवं साकियन्मुहूर्ताग्राह्येतिसंशयप्रस्तावनायां कश्यपआह यदाभाद्रपदेमासे पंचमीमुनि संज्ञिता ॥ सामुहूर्तत्रयेपेता शुक्लपक्षेप्रकीर्तितेति ॥ २५ ॥ विभावसुः मुहूर्तत्रयसंयुक्ता विज्ञेयामुनिपंचमी ॥ परस्मिन्दिवसेनूनं मुनिपूजांसमाचरेदिति ॥ २६ ॥ [११]

अत्रदिवोदासेनोक्तं द्विमुहूर्तग्राह्यमिति पंचमीशुक्लपक्षस्य मुहूर्तद्वितयेसाति ॥ तदामुनिव्रतंकार्यमितिशास्त्रस्यमतइति ॥२७॥ श्वेतकेतुनाप्युक्तं मुहूर्तद्वययोगेपि शुक्ले मुनिपंचमी ॥ मुनिपूजापवासेषु परस्मिन्दिवसेभवेदिति ॥ २८ ॥ एवंविधिविकल्पे द्विमुहूर्तत्रिमुहूर्तविषयतयाप्रसक्ते मुनिवचनस्य व्यर्थतानवगमेन कथंव्यवस्थेतिचेन्न द्विमुहूर्तस्यसावकाशतया द्विमुहूर्तप्रसक्तेरेव ग्राह्यतासंभवात् तथाहिविष्णुवृद्धः तिथिह्रासेतिथेर्वृद्धौ व्यवस्थेयमुदीर्यते ॥ वृद्धौमुहूर्त त्रितयं ह्रासेस्याद्विमुहूर्तकमिति ॥ २९ ॥ अतएवभगवतासूत्रकारेण मुहूर्तद्वयसत्वेपरेकेषामित्युदाहृतं विधिविकल्पस्तुनिर्णीतएवेति ननुव्यासेनोक्तं पंचमी पंचनाडीस्यादुपवासव्रतादिषु ॥ सामान्यतः प्रयुक्तोयंपरस्मिन्नुपयुज्यतइति ॥ ३० ॥ तदनेनवचनेन पंचनाड्याः प्रस्तावनायांकथमत्रनिर्णयइतिचेन्न सर्वपं-चमीतिथिसाधारणतया मुनिपंचम्यतिरिक्तत्वस्य तद्वचनसिद्धेः तथाहि ब्रह्मकैवर्ते सर्वास्यात्पंचमीनूनं पंचनाडिसमन्विता ॥ उपवासेचनक्तेचाप्येकभुक्तविधौ तथेति ॥ ३२ ॥ एवंमुनिपंचम्यां व्यवस्थायांनिर्णीतायां तद्दिनेनध्यायः सर्वदेशेषुविहितः अंगिरः प्रोष्ठपद्यापंचमीयंकीर्त्यतेमुनिपंचमी ॥ अनध्यायोयमुद्दिष्टः सर्व शास्त्रेषुनिश्चयइति ॥ ३१ ॥ विस्तरस्तुनिर्णयामृतेबोध्यः रजोदोषनिवृत्तिप्रयोजनमुद्दिश्य मुनिपंचमीव्याख्याता तदुत्तरदिनविशेषवत्तया किम्गृग्यमित्यपेक्षायां स्कंदषष्ठीसमापतति वद्धयाज्ञवल्क्यः मार्गशीर्षसिताषष्ठी स्कंदषष्ठीतिगद्यते ॥

तारकासुरनिधनरूपतया तत्तिथौरथोत्सवः कार्यइति लघुयाज्ञवल्क्यआह रथोत्सवदिनंताद्धि स्कंदस्यपरमात्मनः ॥ तारकंजितवान्यत्र स्कंदषष्ठीनिगद्यत
इति ॥ ३९ ॥ तत्रत्युपवासनक्तैकभुक्तानां भेदोस्तिनेतिसंशये एवंव्यवस्थाभिहितासैवबोध्या ननुषष्ठीत्रिंशन्नाडीयुता ग्राह्येतित्रिकांडमंडनोक्तं त्रिंशन्नाडी
युताग्राह्या षष्ठीसर्वापरेदिने ॥ नचेत्पूर्वदिनंग्राह्यं सर्वत्रविदितात्मभिरिति ॥ ४० ॥ एतत्स्कंदषष्ठीव्यतिरिक्तसामान्यतिथिविषयं एतदुक्तंस्मृतिरत्नाकरे
सामान्येयापिषष्ठीस्यात्त्रिंशन्नाडीपरेहनि ॥ उपवासेचनक्तेचाप्येकभुक्तविधौतथेति ॥ ४१ ॥ विस्तरस्तु स्मृतितरंगिण्यां सिद्धइत्युपरम्यते स्कंदषष्ठ्यामेव
स्कंदस्यरथोत्सवविधानेनरथपूजादिनस्यमुख्यताविचारेप्रसक्ते तपःशुक्लरथाख्येतिसूत्रकृतोक्तं तेनमाघशुक्लसप्तमीरथसप्तमी यदुक्तमादित्यपुराणेयेप्रत्य-
हंबाधमानामंदेहानामराक्षसाः ॥ भास्करंनिहतोयत्रतद्दिनेरथसप्तमीति ॥ ४२ ॥ विष्णुधर्मोत्तरे मंदेहासुरनाशाय यद्दिनेरथमारुहत् ॥ सूर्यस्तद्दिनमेतद्धिगीयते
रथसप्तमीति ॥ ४३ ॥ तद्दिनेरथपूजाकार्येतिस्नानदानादेर्मुख्यकालतया प्राशस्त्यप्रतीयते यदाहगालवः प्रतिवत्सरमेतद्धिगीयतेरथसप्तमी ॥ तद्दिनेस्नानदानादि
शतक्रतुफलंदिशेदिति ॥ ४४ ॥ सूर्यस्यरथस्वरूपं ब्रह्मांडपुराणेभिहितं त्रिनाभिचक्रमेकांहि सप्ताश्वंसारुणंरथं ॥ आदौवेदमयंदिव्यं रथंसूर्यसमारुहदिति ॥ ४५ ॥
अत्रैवात्रिपुराविजये महेश्वरेणापिविश्वकर्मणादत्तोथरथोंगीकृतइति बहुस्मृतिपुराणेषुगीयते व्यासः त्रिपुराणांवधार्थंहि निर्मितोविश्वकर्मणा ॥ रथस्तुतद्दिने
प्रोक्त सेयंतुरथसप्तमीति ॥ ४६ ॥ साकियन्नाडीपरिग्राह्येति विधिसंशये व्यासएवाह रथसप्तमीतिविख्याता माघशुक्लस्यसप्तमी ॥ स्नानदानव्रतंकार्यं चतुर्ना-
डीपरायदीति ॥ ४७ ॥ निर्णयामृतेप्युक्तं रथस्याराधनंकार्यं सूर्यस्योदयनंप्रति ॥ चतुर्नाडीपरिग्राह्या नचेत्पूर्वैवकेवलमिति ॥ ४८ ॥ एवंचतुर्नाडीविषयायां
व्यवस्थायां प्रतीतायां वचनांतरेसार्धसप्तनाडीतिप्रतीयते तथाहि शाट्यायनः सार्धसप्तसुनाडीषु सूर्यपूजाप्रशस्यते ॥ रथपूजाप्रकर्तव्यासेयंतुरथसप्तमीति
॥ ४९ ॥ वसिष्ठोपि प्रभातकालमुल्लंघ्य संगवेसायदातिथिः ॥ स्नानदानव्रतंकार्यं विज्ञेयारथसप्तमीति ॥ ५० ॥ वृद्धमनुरपि यदातुसंगवःकालः परस्मिन्दिवसे
यादि ॥ तत्रस्यात्सप्तमीपूर्वा स्नानदानव्रतंचरेदिति ॥ ५१ ॥ नन्वेवंविधव्यवस्थायां संस्थितायां वचनानांपरस्परंविरोधइतिचेन्न अर्थवादाधिकरणन्यायेनपूर्व
विधेः परास्तत्वात् ननुमुनिवाक्यानांवैयर्थ्यापत्तिरनुलंघ्येतिचेन्न सावकाशप्रवृत्तौ निरवकाशस्यदुर्बलतया तत्कालव्यापित्वेविरोधाभावात् नचैवमरुणोदय
व्यापिनी स्नानमुख्यकालत्वोक्ते विष्णुवाक्यादितिसूत्रविरोधस्यादितिशंकनीयं तस्यापिकालप्राशस्त्यविधानात् अतएवोत्तरसूत्रंप्रवर्तते परत्रलुप्तापूर्वेहि घटी

द्वयषष्ठी सत्येपीति नन्वेतावताशास्त्रेपाकोत्रनिर्णयश्चेतब्रूमः सार्धसप्तनाड्याविवेकसंभवादिति अतएवाहपैठीनसिः विधिसंशयतः प्राप्ता सेयंतुरथस
सार्धसप्तैवनाडीस्यात्पूजाकालस्यचोदनादिति ॥ ५२ ॥ विस्तरस्तुनिर्णयतरंगिण्यां लक्ष्यतेकिंबहुना पूर्वत्रविशेषविधायारथसप्तम्यां निर्णीतायाम
विषये किमधिकेतिविवक्षायां कृष्णाष्टमीसमापतइति यदुक्तंविष्णुपुराणे श्रावणेकृष्णपक्षस्य भगवान्हरिरीश्वरः॥ निशीथेवतथारात्रौमहाष्टम्यांमहाति
॥ ५३ ॥ हरिवंशे श्रावणेबहुलाष्टम्यां रोहिणीसंयुतेसति ॥ जातोसौदेवकीदेव्यां पुण्यकालोयमीरितइति ॥ ५४ ॥ ननुनिशीथिनीशब्दः केनविज्ञेयइत्या
मांडव्यआह ऊनपंचदशीनाडी त्वर्धसप्तदशीयुत ॥ शुद्धषोडशिनीनाडी रात्रौसातुनिशीथिनीति ॥ ५४ ॥ तदयमर्थः ऊनपंचदशीनाड्याऊर्ध्वंसप्तदश
मध्येशुद्धाषोडशिनीनाडीनिशीथकालइति अतएवोक्तं प्रभासखंडे नाडीत्रितयमध्यस्था निशीथिन्यांप्रकीर्तिता ॥ कृष्णजन्माष्टमीसेयमुपवासव्रतं
॥ ५५ ॥ पुनर्विष्णुपुराणेप्येतदेवानुरुध्योक्तं निशीथिनीपरिग्राह्या नाडीत्रितयमध्यगा ॥ कृष्णाष्टमीमहीपाल पुण्ययोगव्यवस्थयेति ॥ ५६ ॥ ननूभयदिने
थकालव्याप्तौ कथंकार्यमित्यत्रस्तत्रकृदाह उभयव्याप्तौपूर्वेति अतएवाहव्यासः निशीथव्यापिनीग्राह्या कृष्णजन्माष्टमीतिथिः ॥ रात्रावर्धार्धयामेन
द्वययुतंभवेदिति ॥ ५७ ॥ अत्रेयंव्यवस्थापंचदशनाडी षोडशनाडीद्वेनाड्योः कृष्णपूजामुख्यकालः एतदुक्तं वृद्धगार्ग्येण पूजाकालंसमुल्लंघ्य व्रतंचरा
वः ॥ कृष्णस्यैवापचारेण व्रतंतंनिष्फलंभवेदिति ॥ ५८ ॥ ननुकाचिद्वत्सरेषु रोहिण्यभावेकथमस्यग्राह्यतेतिचेन्न नक्षत्राविदेर्विशेषपर्यवसायित्वात् अ
स्मृतिदीपिकाकारः प्राप्तापत्यर्क्षसंयुक्ता बुधवारेणसंयुता॥ यदियोगादिकंलब्धा तदापुण्यमनंतकामिति एतेनयोगसत्वेयोगाभावेति निशीथका
यदुक्तंपूर्वपूर्वदिनंग्राह्यमिति तत्रवृद्धिह्रासविषयेविवेकोज्ञायते यदितिथिवृद्धिस्तदापराह्रासेपूर्वैवेति एतदाहकात्यायनः वृद्धौह्रासेनिशीथेस्मिन्व्यवस
मीर्यते ॥ वृद्धौसातिपराकार्याह्रासेपूर्वैवकेवलामिति ॥ ५९ ॥ उपवासोयंतद्दिने सार्वजनिनोयुक्तः यदाहकश्यपः कृष्णाष्टम्यांद्विजोभुंक्ते योभवतेपात
उपवासेपुण्यराशिर्भोजनेपापराशयइति ॥ ६० ॥ यदत्रपूजादिविधानं व्रतकांडेस्थिमितिसावधानंबोध्यं येत्वाहुर्नवम्यांरामनवमीमहातिथिरिति तत्रै
साहरोकुर्वाणेनाधुनाविविच्यते नवमीपूर्वासकलेतिसूत्रकारःतदेतद्विषयेव्यवस्थायांतिथिस्वरूपंबोध्यं तदुक्तंवासिष्ठरामायणे चैत्रशुक्लस्यनवमीतिथौ स
रिःस्वयं। कौसल्यायामाविरासीत्सातिथिः पुण्यदायिनीति॥६२॥ अतएवाहगालवः चैत्रशुक्लस्यनवमी नाडीपंचदशान्विता॥ रामस्यजन्मदिवसमुपवासा

न्हगामिनी॥ अश्वमेधक्रतुफलं दिशत्येवनसंशयइति ॥ ६९ ॥ एवमन्यान्यपिवचनानि तत्रैवसुस्थितान्येतावतैवात्वमित्युपरम्यते नवमीनिर्णयानंतरं दशम्यांको-
पिविशेषइतितिथिविशेषव्यवस्थायां विद्यादशमीनिर्णयोव्याख्यायते नारदीयपुराणे विश्वसृष्टातपस्तप्त्वा जिव्हाग्राद्यसरस्वती॥ उत्पादयामासतदीं,तद्दिनंपु
ण्यदायकामिति॥७०॥ नन्वेतत्सरस्वत्युत्पत्तिदिनमितिव्यवहृतं तेनदशमीतिव्यवस्थानजातेविवक्षायां कालिकापुराणेतदुदाहृते दशम्यामाश्विनेमासीजज्ञेसा
क्षात्सरस्वती॥ शुक्लपक्षेहिताथाय जगतांपुण्यदायिनीति॥ ७१॥ नन्वनेनवचनेन विद्यादशमीति नप्रतीयतइतिचेत्ब्रूमः कात्यायनः याविद्यादशमीप्रोक्ता श्रव
णर्क्षसमन्विता॥ आश्विनेमासिदशमी तस्यांविद्यासमारभेदिति॥७२॥ अत्रहिविद्यादशम्यांविद्यारंभकालइतिप्रतीयते साकियन्नाडीपरिग्राह्येतिसंशयेव्यास
आह नाडीत्रययुताग्राह्या दशमीचाश्विनेसाति॥ विद्याक्षरारंभकालः प्रातःकालेप्रशस्यतइति॥७३॥ लघुव्यासोपि आश्वयुक्शुक्लदशमी याविद्यादशमीस्मृता
॥ सात्रिनाडीपरिग्राह्या परस्मिन्दिवसेयदिति॥७४॥ नन्वत्रश्रवणमुद्दिश्य तिथिर्व्यवह्रियते काचिद्वत्सरे तद्भावेकथंकार्यमितिचेत्ब्रूमः श्रवणयोगोनानियतः कृ [१३]
ष्णाष्टम्यांरोहिण्याःप्राशस्त्येपितत्कालतिथेरेवांगीकारात् अतएवदिवसत्रयेति सरस्वतीमर्चयित्वा दशम्यांप्रातरुद्यापनंयुक्तमेवेति गुरुः प्रातर्विद्याक्षरारंभ
स्तत्रैवोद्यापनंचरेत्॥ श्रवणर्क्षेयदिभवेत्पुण्यकालोविशिष्यतइति॥७५॥ ननुलघुकात्यायनवचनेन सरस्वत्युद्यापनंपूर्वेद्युः श्रवणयोगेसति तत्रैवकार्यमितिप्रती

यते मूलर्क्षेपूजयेद्देवींश्रवणेनविसर्जयेत्॥ रात्रौपूजांप्रकुर्वीत तत्रैवोद्यापनंचरेदिति ॥७६॥ सूत्रकृताप्येवमेवोक्तं सरस्वत्यास्थापनंमूलस्यप्रथमांशे विसर्जनंश्रव-
णाद्यइति यदत्रकथंपरेद्युः दशमीमात्रस्वीकारस्तस्मादितिचेन्न तद्वचनस्यपरेद्युस्तल्लाभेसति पर्युदस्तत्वात्अन्यथाश्रवणस्यानित्यत्वास्वीकारे रात्रौविद्यारंभस्य
वैयर्थ्यापत्तेः तेनचसूत्रकृद्वचनानुरोधेनश्रवणयोगसंभवेप्रातर्मुख्यतमइतिप्रतीयते कात्यायनवचनस्यतद्दिनमनूद्यभावनामात्रस्वीकारेपरेद्युर्विद्याक्षरारंभस्यबाध
काभावोनियम्यते अतएवशाट्यायनिः रात्रौसमर्पणंकृत्वाप्रातरुत्थापनंचरेत्॥ विद्याधिकारोनैवास्ति रात्राविति विनिश्चयइति॥७७॥ एतेनविद्यादशम्यांपरेद्युर्ना
डीत्रययुतातिथिर्यदिदृष्टातदाश्रवणयोगाभावेपिपरेद्युः स्वीकार्यामितिव्यवस्थापितं यदत्रदशमीनिर्णयानंतरएकादशीनिर्णतव्यातिनिर्णयताप्रसक्तौ तस्यादिनत्र
यविधित्वेनसावकाशतामुपलभ्यमंडूकप्लुत्याअनंगत्रयोदशीनिर्णीयते सामान्यतः सूत्रकृतात्रयोदशी शुक्लकृष्णयोः पूर्वोत्तरयोरित्युदाहृतं तेनात्रविशेषविधिः
शिवरहस्ये चैत्रशुक्लत्रयोदश्यांमदनंदग्धवान्विभु॥ प्रदोषसमयेप्राप्ते वसंतोत्सवसंयुतइति॥७८॥ स्कांदपुराणेपि वसंतसहितेकाले चैत्रेमासिमहेश्वरः ॥ सिते
पक्षेत्रयोदश्यास्मरंरात्रौप्रदग्धवानिति॥७९॥ तद्दिनस्यपुण्यकालत्वेन स्नानदानादौमुख्यतयाकार्यत्वेप्रसक्ते कियन्नाडीपरिग्राह्येतिसंशये रात्रौपरेद्युस्त्रिनाडी प
रिग्राह्येति दिवोदासः सूर्यास्तमयतःपश्चाद्भगवान्परमेश्वरः ॥ त्रिनाड्यांदग्धवान्कामं तत्कालोयंविशिष्यतइति॥८०॥ गुरुरपि शुक्लानंगत्रयोदश्यांत्रयास्त्रिंशत्प्र

शुक्लइतिसूत्रकारः एतात्तिथिस्वरूपंकथंविज्ञेयमितिविवक्षायांप्रतर्दनं प्रतिगार्गेणोक्तं ब्रह्मांडपुराणे श्रृणुराजन्प्रवक्ष्यामिसुमंतुर्नामविप्रराट्॥ कृत्वानंतव्रतंपुण्यं न-
क्षत्रेलोकमातवानिति ॥ ८८ ॥ कोयमनंतःकस्योद्देशेनेदंव्रतमितिविधिसंशये ब्राह्मपुराणेश्रूयते योयंकात्रसमाख्यातः दिनरात्रिव्यवस्थया ॥ नक्षत्राणिग्रहाःसर्वे
प्यनंतोयमुदीर्यतइति॥ ८९ ॥ तदेतत्तादृशानंतस्यपूजायांवासुकिपूजनंपूर्वैरंगीकृतंवेदितव्यं स्कांदपुराणे वासुकिःसर्वदेवानामनंतोयमुदीर्यते ॥ ९० ॥ पूज्यतेभा
ग्यलाभाय चतुर्दश्यामसंशयइति ॥ ९१ ॥ एतदेवानूद्यविष्णुधर्मोत्तरेव्याख्यातं वर्षेवर्षेप्रकर्तव्यं यदनंतव्रतंमहत्॥ प्रोष्ठपद्यांशुक्लपक्षे स्त्रीपुंभिर्भोग्यासिद्धयइति
तदनेनवचनेनभाद्रपदशुक्लचतुर्दश्यामनंतव्रतंकार्यमितिप्रतीतौ साकियन्नाडीपरिग्राह्येतिकालभेदसंशये कात्यायनआह त्रिमुहूर्तापराकार्यायात्वनंतचतुर्दशी॥
वृद्धौह्रासेपिवाह्येषा व्यवस्थाकीर्तिताबुधैरिति ॥ ९३ ॥ अत्रिरपि अनंतस्यचतुर्दश्यांत्रिमुहूर्तापिलभ्यते॥ पराग्राह्याप्रयत्नेन वृद्धौह्रासेपिवान्नृभिरिति ॥ ९४ ॥
एतत्पूजाकालनिर्देशः कूर्मपुराणेश्रूयते मथित्वासागरंपूर्वं सुराःसर्वेतुवासुकिं॥ त्रिमुहूर्तेचतुर्दश्यांपूजयामासुरव्ययामिति ॥ ९५॥ अतएवत्रिमुहूर्तस्यप्राशस्त्यं
युक्तमुत्पश्यामः ननूक्तंकथायांमध्यान्हव्यापिनीग्राह्येति मध्यान्हेभोज्यवेलायांसमुत्तीर्यसरित्तटे॥ ददर्शशीलासास्त्रीणांसमूहंरक्तवाससामिति ॥ ९६ ॥ स्कांदपु
राणेपि धर्मेणपरिसंततः कौंडिन्योमुनिसत्तमः ॥ मध्यान्हेदुःखसंविग्नोह्यनंतंदृष्टवानसाविति ॥ ९७ ॥ तर्ह्येतद्वचनद्वयस्यकागतिरितिचेन्न तिथिसावकाशस्यतद्वि
षयेविवक्षितत्वात् अन्यथाअनुषंगाद्धिकरणन्यायेन व्रतवैयर्थ्यापत्तेः अतआहपैठीनसिः व्यवहारविशेषेण पूर्वमेवाविशिष्यते ॥ अन्यथावैपरीत्यंचेद्व्रतभंगोहिकेवं
लइति ॥ ९९ ॥ यद्यपिव्रतसामान्याधिकरण्यमनूद्यमध्यान्हकालस्यप्राशस्त्यंतथापिदूरापास्तमेवबोध्यं तदनेनव्यवहारेण तिथिनिर्णयासिद्धौलिंगकंदकोद्धारन्या-
यमनुसृत्यातिथिस्वरूपसिद्धिरितियुक्तमुत्पश्यामः आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये॥ पूर्णश्चतुर्थउल्लासःकांडेनैमित्तिकेशुभः ॥ १०० ॥ इति श्रीआनंदगि
रिस्वामि कृते नैमित्तिककांडेचतुर्थयउल्लासः ॥

सरस्वतींजगद्योनिं सर्वमंगलदायिनीं ॥ नौमिसर्वार्थसंसिद्धै मातरंजगतांहितां ॥ १ ॥ पक्षांतमासांतयोः स्वरूपविधौपंचदशीसिद्धा साद्विविधा पौर्णमास्यमा-
वास्येति तत्रव्यवहारात्पौर्णमासीपंचदशी त्रिंशत्यमावास्येतिव्यक्तं द्वादशसुपौर्णमासिषु दीपोत्सवतयाप्रतीतत्वेन कार्तिकपौर्णमास्यांविशेषोगृह्यते शिवधर्मो
त्तरे कार्तिकेशुक्लपक्षेतु पौर्णमासीयदातिथिः ॥ त्रिपुरंदग्धवानीशः सातिथिःपुण्यदायिनीति ॥ २ ॥ ननुत्रिपुरदहनकालस्य कदाप्रवृत्तिरितिविवक्षायांशिवरहस्ये
उदाहृतं सायान्हेत्रिपुरंहत्वा ननर्तवृषभध्वजः ॥ रक्षरक्षेतिमुनिभिः स्तुवद्भिर्भक्तितत्परैरिति ॥ ३ ॥ एतदर्थेसूत्रकृताप्युक्तं सायान्हव्यापिनीत्रिपुरोत्सवोक्तेरिति
तत्राहि त्रिपुरदहनकालस्यैव तिथेर्मुख्यताप्रसक्तौस्नानदानादौकथंयुज्यतइतिचेत्ब्रूमः शौनकः दीपोत्सवोयांक्रियते महादेवस्यपूजने ॥ तदाषोडशनाडिस्यात्पौ
र्णमासीपरास्मृतेति ॥ ४ ॥ अत्रिः चतुर्दशसुनाडीषु पौर्णमासीयदास्थितः ॥ स्नानादिमुख्यकालोयांशिवपूजाविधीयतइति ॥ ५ ॥ अत्राहि वचनद्वयेषोडशनाडीच-
तुर्दशनाडीत्युक्तंकेयंव्यवस्थेतिचेत्ब्रूमः व्यवस्थितविभाषया पूर्वस्यसावकाशत्वात् धात्रीपूजायांकालविशेषस्यमध्यान्हमात्रस्वीकाराच्च यदाहविष्णुवृद्धा
धात्रीपूजाप्रकर्तव्या पौर्णमास्यांनरोत्तमैः ॥ धात्रीहोमश्चतत्रैव मध्यान्हव्यापिनीतिथिरिति ॥ ६ ॥ ननुत्रिपुरोत्सवकालस्यसायाव्हव्यापित्वेमध्यान्हव्यापित्वंकथं
युज्यतइतिचेन्न तत्पक्षांगीकारस्यातिथिसावकाशाविषयत्वात् अन्यथावेदोपक्रमाधिकरणन्यायेनउपसंहारप्राबल्यस्य वैयार्थ्यापत्तेः अतएवाहवृद्धमरीचिः दीपो
त्सवस्यसायान्हे धात्रीपूजाप्रपूर्वकः ॥ तस्मान्मध्यान्हगामीयं पौर्णमासीविशिष्यतेति ॥ ७ ॥ तत्रापितिथिवृद्धौसत्यांषोडशनाड्यसावकाशताह्रासेचतुर्दशैवनाडी
तिर्विवेकः एतदाहमांडव्यः चतुर्दशैवनाडीस्यात्पौर्णमासीपरेहनी ॥ ह्रासेसातिविधिःप्रोक्तोवृद्धौषोडशनाडिकेति ॥ ८ ॥तदनेनवचनेन पूर्वतिथौकैलासयात्राप्र
स्तावतयामध्यान्हव्यापित्वंपरिगृह्यनिर्णेतव्यमितिदिक पंचदश्याः द्वैविध्येपौर्णमास्यांनिर्णीतायामधुनात्रिंशत्याममावास्यायांकोयंविशेषइतिविवक्षासंभवेका
लांतरभाविनोर्धोदययोगस्याविशेषमन्विष्यनिर्णीयते अतएवोक्तं सूत्रकृता पौष्यामर्धोदयोयोगइति कश्यपोप्याह अमार्कपातश्रवणैर्युक्ताचेत्पुष्यमाघयो ॥ अ-
र्धोदयःसविज्ञेयः किंचिन्न्यूनंमहोदयइति ॥ ९ ॥ अत्रहिपुष्यमाघयोरित्युक्त्याप्रतिपत्पर्वणोःसंधिर्गृह्यते यदाहगालवः प्रतिपत्पर्वणोःसंधिरमार्कश्रवणैर्युतः ॥ पुष्य
माघप्रयुक्तोयमर्धोदयमुदीर्यतइति ॥ १० ॥ स्मृतिचिंतामणौ अमार्कपातश्रवणैर्यदिस्यादर्धोदयस्तत्प्रतिपत्समेतः ॥ यःपुष्यमाघद्वयमध्यगामीकालांतरे जायतएव
योगइति ॥ ११ ॥ तदेतस्यार्धोदयस्यकालविवक्षयांहारीतेनोक्तं सूर्योदयस्यकालोहिव्यापिकोर्धोदयोमहान् ॥ नन्वर्थसंज्ञायुक्तोयं तिथिरेषाविनिर्णयइति ॥ १२ ॥

...एककालोदयाहि योगः पुण्यफलप्रदइति ॥ २० ॥ विस्तरस्तुनिर्णयदिनकरेद्रष्टव्यः अधुना प्रसज्यप्रतिषेधमाश्रित्य कपिलषष्ठीनिर्णीयते भाद्रपदबहुलाख्याकपिलाख्यायोगविशेषादितिसूत्रकारः वृद्धगार्ग्यः मासिभाद्रपदेकृष्णे षष्ठीभौमार्कसंयुता ॥ व्यतीपातेचरोहिण्यां साषष्ठीकपिलास्मृतेति ॥ २१ ॥ व्यासः षष्ठीभौमार्कसंयुक्ता व्यतीपातेनयुता ॥ कपिलाख्याभवेत्षष्ठीरोहिणीसंयुतापिचेति ॥ २२ ॥ नन्वियं रात्रौयोगविशेषागृह्यतेनवेतिसंशये रात्रिनिषेधपूर्वकं वसिष्ठआह भौमार्कपातसंयुक्ता रोहिणीसंयुतायदि ॥ कपिलाख्याभवेत्षष्ठी निशायांनोपयुज्यतइति ॥ २३ प्रभासखंडे क्षपायांकपिलायांवा त्वर्धोदयमथापिवा ॥ दिवायोगंप्रशंसंति रात्रियोगोनशस्यतइति ॥ २४ ॥ तदेतेनवचनद्वयेन रात्रियोगेनिषिद्धे सर्वारात्रिर्निषिध्य तइतिचेन्न भरद्वाजवचनेन रजनीप्रांतयामस्यग्राह्यतापत्तेः रजनीप्रांतयामेतु योगोयदिभविष्यति ॥ नदुःयातितदा नूनं कपिलेयंप्रपूजितइति ॥ २५ ॥ येत्वाहुर्मध्य रात्रादुपरिग्राह्यतास्यादितितन्नतद्व्रतस्यसूर्यप्राधान्यतयाप्रांतयामस्यैवप्राशस्यात् यदाहलौगाक्षिः सूर्योदयमथाश्रित्य कपिलेयंप्रवर्तते ॥ प्रांतयामांनुकूलस्य दत्तएवाविनिश्चयइति ॥ २६ ॥ तदेतस्यास्तिथेःस्वरूपंकिमित्याशंकायांविष्णुधर्मोत्तरेप्रतीयते कपिलेनतपस्तप्तं सूर्यप्रतिवशंददौ ॥ आविर्भूयोदयेकाले साषष्ठी [१५] कपिलास्मृतेति ॥ २७ ॥ एवंविधवचनेनतिथेः स्वरूपेनिर्णीतेतद्व्रतस्यतत्काले व्यवस्थितिः यदुक्तंभविष्योत्तरपुराणे तत्कालेकुरुतेमर्त्यः कपिलाव्रतमुत्तमं ॥ अ

श्वमेधादियज्ञस्य फलमाप्नोत्यनुत्तमिति ॥ २८ ॥ विष्णुवृद्धः सूर्योदेवीतिमंत्रेण समिदाज्यचरून्हुवेत् ॥ गोदानंतत्र दातव्यं व्रतसात्पुण्यकारणादिति ॥ २९ ॥ तथाच व्रतस्यास्यस्वरूपसिद्धौरीतिविवक्तंवेदितव्यं स्मृतिचिंतामणौ यदाभवेत्साकपिलाख्यषष्ठी व्रतंतदैवेतिनिवेदितव्यं सूर्योदयप्राप्यततोविधत्से व्रतस्य संपूर्णफलंप्रदिष्टमिति ॥ ३० ॥ विस्तरस्तुस्मृतिकल्पतरौ स्थितइतिसाधनेनोपरम्यते व्युत्क्रमेणषष्ठ्यर्थातिरिक्ततया पंचमीनिर्णयविशेषप्रसक्तौ नागपंचमीसमापततीति तदर्थंकालविशेषोनिर्णीयये एतदाहसूत्रकारः नभःशुक्लानागसंज्ञेति तेनचनभश्चनभस्यश्चवार्षिकाव्रतइति श्रुतिरुन्नीयते स्कांदपुराणे पंचमीनागपूजायां तार्याषष्ठीसमन्विता ॥ तस्यांतुतुषितानागा इतरासचतुर्थिकेति ॥ ३१ ॥ एतद्वचनस्यसामान्यप्रवृत्तितया विशेषः कथमितिचिंत्यते कात्यायनः श्रावणे शुक्लपक्षस्य पंचमीनागपंचमी ॥ नाडीत्रययुताग्राह्या नागानांपरितुष्टिदेति ॥ ३२ ॥ विद्धरथः नागपूजाप्रकर्तव्या श्रावणेमासिपंचमी ॥ शुक्लपक्षेयदाजातासा त्रिनाडीपरेदिनइति ॥ ३३ ॥ विष्णुवृद्धेनोक्तं पंचनाडीग्राह्येति पंचमी पंचनाडीस्यान्नागपूजाप्रशस्यते ॥ कलान्यूनापिसाग्राह्या परत्रैवमनीषिभिरिति ॥ ३४ ॥ तदतेनवचनेनाविरोधोपपत्तौ कुतस्त्रिनाडीविषयस्य प्रामाण्यमितिचेत्ब्रूमः सावकाशस्यतत्व्यवस्थितिसंभवात् यदाहरल्लः सावकाशविधेर्वृद्धौ पंचनाडीप्रशस्यते ॥ तत्रैवनागपूजायामन्यथासात्रिनाडिकेति अतएवसामान्यतोगौतमेनाप्युक्तं श्रावणेमासिसंप्राप्ते पंचम्यांशुक्लपक्षके सानागपंचमीप्रोक्तापरकार्यामनीषि-

कृत्यवर्ततेचाद्विनिश्चयइति ॥ ४२ ॥ अत्रहिगरुडपंचम्याः स्वरूपनिर्देशेचतुर्नाडीमतिक्रम्यवर्तनं पूर्वेद्युः परेद्युर्वेति संशयः एतदाहकात्यायनः परेद्युरेवयुक्तस्यात्सं
शयेसमुपस्थिते ॥ ४३ ॥ गरुडस्यतुपंचम्यांकालोयंव्यवहारतइति ॥ ४४ ॥ सापूर्वेद्युरेववापरेद्युरेववाचतुर्नाडीमतिक्रम्यवर्तते हासवृद्ध्योः परीक्षायांपरेद्युरेवेति
निश्चयः वायुपुराणे वैनतेयःसमुत्पन्नोविनताप्रीतिदायकः ॥ अंडंविभिद्यसहसाचतुर्नाड्याःपरंयतइति ॥ ४५ ॥ विष्णुपुराणेपि गरुडस्योदयेकालेसमुत्पत्तिर्वि
शिष्यते ॥ परेद्युरेवनिर्धार्यंपुण्यकालप्रदायकमिति ॥ ४६ ॥ अत्रहिकेषुचित्तिथिषु गरुडमुद्दिश्यतद्दिनेबलिप्रदानंकुर्वतीतिव्यवस्थितिः मरीचि गंधारदेशेसौरा-
ष्ट्रेबलि[illegible]नंप्रकुर्वते ॥ गरुत्मंतंसमुद्दिश्यफलमद्भुतवत्तेजनाइति ॥ ४७ ॥ गालवोपि कृतेगरुडपंचम्यांबलिदानंयथाविधि ॥ सर्पभीतिर्नचास्तेषां संपदस्युःपदेपदइ-
ति ॥ ४८ ॥ तत्रैवमृत्तिकयातद्दिनेप्रातःसमयेगरुडमूर्तिंकृत्वापूजयित्वासौराष्ट्रेगंधारदेशेचजलेप्रक्षिपंतीतिप्रतीतिः यदाहरलः तदागरुत्मतोमूर्तिंपूजयित्वाज
लेक्षिपेत् ॥ नसर्पभीतिस्तेषांहि नदारिद्र्यंकदाचनेति ॥ ४९ ॥ पूजायामुक्तमंत्रस्वरूपंविश्वामरतंत्रे आदित्यरथवेगेनेत्युक्तामंत्रंप्रपूजयेत् ॥ कृत्वागरुत्मतोमू-
र्तिंबलिदानप्रपूर्वकमिति ॥ ५० ॥ बलिमंत्रश्चब्रह्मांडपुराणउक्तः मातृदास्यविमोक्त्रेतेगरुडायनमोनमः ॥ पन्नगारेनमस्तुभ्यं बलिरेषप्रगृह्यतामिति ॥ ५१ ॥ ननु
सार्वदेशिकव्यवहारेतदप्रसिद्धतया सौराष्ट्रगांधाराणां देशांतरप्रवृत्तौ तत्रेषांप्रयोजकताभावइतिचेन्न तदाचारस्यतत्प्रवृत्तौबाधकाभावात् एतदाहशाट्यायनिः
यस्मिन्देशेयआचारः पारंपर्यक्रमागतः ॥ देशांतरेपितत्साध्योनचेतदुःखमवाप्नुयादिति ॥ ५२ ॥ विस्तरस्तुस्मृतिचंद्रिकायांद्रष्टव्यः पूर्वपरामर्शेनाष्टमीनिर्णये
विशेषमधिकृत्यकृष्णाष्टमीनिर्णीता काश्मीरखंडे महीध्रेमहाशैलेशैलेंद्रदुहितासति ॥ गंगाविवाहमकरोत्कृष्णपक्षेयदाष्टमीति ॥ ५३ ॥ शिवरहस्ये भगीरथ-
स्तपस्तप्त्वाप्रार्थयामासशंकरं ॥ ५४ ॥ गंगांप्रधारभगवान्सर्वलोकहितायइति ॥ ५५ ॥ तदेतस्यागंगाष्टम्याःकालविवक्षायांलघुयाज्ञवल्क्येनोक्तं यस्मिन्दिनेमहे
शानोगंगांदध्रेजगत्प्रियां ॥ गंगाष्टमीसाविज्ञेया प्रातर्नाडीप्रशस्यतइति ॥ ५६ ॥ विशेषः काश्मीरखंडेएवपुनराधिक्यतयावर्तते आश्वयुक्शुक्लपक्षस्यतिथिरेषाति
दुर्लभा ॥ यदारुणोदयव्याप्तिःस्नानंतत्रैवकारयेदिति ॥ ५७ ॥ उभयदिनेरुणोदयव्याप्तौकथमितिविवक्षायांमनुराह गंगाविर्भाव एतद्धियदाष्टम्यांप्रदृश्यते ॥
प्रातःसूर्योदयव्याप्तिस्तदाकार्यापरेहनीति ॥ ५८ ॥ अत्रहिलघुयाज्ञवल्क्यवचनेमनुवचनेनचपरदिनेसूर्योदयव्याप्तिः सिद्धानन्वेकमेववचनं विश्वासप्रदमस्तिव-
तिचेन्न वनवृक्षन्यायात्तत्प्रतीतेः नह्येकोवृक्षोवनंभवति तद्दिनेस्नानदानादौ विशेषमाहगौतमः स्नानंदानंप्रकर्तव्यं गंगाष्टम्यांतरोत्तमैः ॥ तदनंतक्रतुफलं ब्रह्म

सूयायकल्पतइति ॥ ५९ ॥ पैठीनासिरपि गंगांष्टम्यांप्रातरेव स्नानंकार्यंप्रयत्नतः ॥ गंगापूजाप्रकर्तव्या इमंमेमंत्रतोत्राहीति ॥ ६० ॥ नान्वियंपूजाकर्तव्यौतिवि
भगवान्बादरायणआह प्रातःस्नात्वाशुभेपात्रे जलमापूर्ययत्नतः ॥ गृहेसमानयिपुनर्गंधपुष्पाक्षतैर्यादीति ॥ ६२ ॥ गालवः गंधपुष्पाक्षतैर्गंगांधूपदीपैः प्रय
भक्षभोज्यादिनैवेद्यैस्तोषयेद्भाग्यवान्भवेत् ॥ ६३ ॥ ननुतत्पूजनंकियाद्दिनावाधेव्यवस्थापनीयामितिविवक्षायांतत्परेद्युःप्रातः समयेनदीतटाकादिमध्येवि
तिविवेकः तदाहलोगाक्षिः गंगाजलंपूजितंतद्गंगायामेवानिक्षिपेत् ॥ दोपोत्सवःप्रकर्तव्यःगंगातीरेयथाविधिः ॥ ६४ ॥ अत्रहिगंगातीरेयथाविधीत्युक्त्या
दिनेयत्रस्नानदानादिकंकृतंतत्रैवदीपोत्सवइतिविवेकः विस्तरोन्यत्रमृग्यइतिदिक् भाद्रेमासिविशेषविधितयाशुक्लपक्षे तदष्टम्यांकेदारेश्वरव्रतमाह लै
भाद्रेमासिसिताष्टम्यांकेदारेशंप्रपूजयेत् ॥ भाग्यवान्जायतेमर्त्यः सर्वत्रविजयंलभेदिति ॥ ६५ ॥ गालवोपि केदारेशंसंप्रपूज्यभाद्रेमासिसिताष्टमी ॥ त
र्वत्रविजयंभाग्यंचलभतेनरइति ॥ ६६ ॥ नान्विदंव्रतंकेनचीर्णमित्यपेक्षायां ब्रह्मांडपुराणे हेहयानामाधिपतिः राजाचित्ररथोमहान् ॥ केदारेशंसंप्रपूज्यस्व
तवान्पुनारिति ॥ ६७ ॥ स्कांदपुराणे यांघातासगरश्चोभौकेदारेशप्रपूजनात् ॥ राज्यभ्रष्टौस्वकंराज्यं लब्धवंताविितिश्रुतारिति ॥ ६९ ॥ तदेताभ्यांवच
तिथिःस्वरूपेनिर्णीतेसातिथिः कस्मिन्मुहूर्तेप्राशस्त्येनगृह्यतइतिविवक्षायांसायान्हव्यापित्वं सर्वमतसाधारणमितिसिद्धं व्यासः केदारेशप्रपूजायांसाया
पिनीतिथिः ॥ अष्टमीसापरिग्राह्यापरेद्युरितिनिश्चयइति ॥ ६८ ॥ पैठीनासिः अष्टम्यांशुक्लपक्षेहिकेदारेश्वरपूजनं ॥ सायान्हेसुस्थितंबोध्यंसर्वत्राविजिगीषुः
॥ ६९ ॥ तत्पूर्वदिनेमहालक्ष्मीव्रतं तदंगत्वेनविहितं तदपिसायान्हयुक्तमेव प्रशस्तं गार्ग्यः केदारेशाष्टमीपूर्वा दिनेलक्ष्मीव्रतंभवेत् ॥ सायान्हव्यापिनीस
प्तमीसापरिगृह्यतइति ॥ ७० ॥ भरद्वाजः सप्तमीसापरिग्राह्यामहालक्ष्मीव्रतेशुभे ॥ सायान्हव्यापिनीनूनं केदारेशार्चनंप्रतीति ॥ ७१ ॥ ततएवतत्रशांकरार्च
प्रतीतं वृद्धवचः महालक्ष्मीव्रतंयत्रकेदारेशार्चनव्रतं ॥ शंकरार्चनसंज्ञंचव्रतमेतत्रसंस्मृतमिति ॥ ७२ ॥ एवंव्रतत्रयव्यवस्थितौसप्तम्यांप्रदोषसमये पूज
महालक्ष्मीसंनिधौनिधापयेयुरितिसर्वमतसिद्धांतः एतदाहवृद्धयाज्ञवल्क्यः आनीयकुंकुमारक्तंसूत्रंतूलविनिर्मितं ॥ पूजितंतुप्रबध्नीयाद्दक्षिणेहस्तपंकज
७३ ॥ अत्राहिहस्तपंकजइत्युपलक्षणं बाहुसंनिधानेधारणस्यसार्वजनीनव्यवहारात् एतदाहमरीचिः बाहुमूलेधारणीयंकेदारेश्वरसूत्रकं ॥ अहंदधामीति
रणेप्रपठन्नरइति ॥ ७४ ॥ ननुधारणेप्रपाठेन्नरइत्युक्त्यापूजायां मंत्रांतरंमृग्यमितिचेन्नत्प्राशस्त्यंततग्राह्यमितिन्यायेनपूजानुकुलस्यैवसूत्रस्यग्रहेणप्युपयुक्त

शिवरात्रिव्रतमुख्यानाडीषोडशिनीयतः ॥ निशीथेसमयेतत्रसहपूर्वापरार्धतइति ॥ ७९॥ यदास्मिन्वचनेसहपूर्वापरा-
र्धतइत्युक्तं तेनायमर्थःपर्यवसितः पंचदशनाड्याउत्तरार्धःसप्तदशनाड्याः पूर्वार्धइत्येकनाडी तेनसहिताषोडशिनीनाडीशिवप्रादुर्भावकालइतिविवेकः येत्वा
हुः ऊनपंचदशनाडीपूर्वंऊनसप्तदशनाडीपरामिति सोपिनिशीकालइतिविवेकस्तथाप्युक्तरीत्यामुख्ययावृत्त्यासमाधानंयुक्तमुत्पश्यामः एतदाहमनुः पूजाकालं
समुल्लंघ्यव्रतंचरतिमानवः॥ महादेवापचारेणपतत्येवनसंशयइति ॥ ८० ॥ तदनेनवचनेनगौणमुख्ययोर्मुख्येसंप्रत्ययइतिन्यायमनुसृत्यमुख्यकालो व्यवहृतो
वेदितव्यः यदाहरल्लः सामान्यकालेमुख्यत्वंव्यवहारोविशिष्यते ॥ ८१ ॥ गौणंतदन्यथाग्राह्यंविशेषादन्यतास्थितावति ॥ ८२ ॥ शिवरात्रिसमयेशिवलिंगस्योप-
रिबिल्वार्चनमनंतफलमिति ब्रह्मांडपुराणेश्रूयते शिवरात्रौबिल्वमेकं लिंगस्योपरिनिक्षिपेत् ॥ अश्वमेधक्रतुफलंव.जपेयशतंलभेदिति ॥ ८३ ॥ ननुशिवरात्रि
शब्दःयोगोवारूढोवानाद्योनद्वितीयश्चयोगरूढेविवक्षितत्वात् तदर्थंसमर्थोबोध्यः शिवयोगेनयुक्तारात्रिः शिवरात्रिरिति एतदुक्तंब्रह्मपुराणे शिवयोगयुतारा-
त्रिःशिवरात्रिःप्रभण्यते ॥ यस्यांव्याधोपिसंपूज्यह्यज्ञानामुक्तिमाप्तवानिति ॥ ८४ ॥ तेनचशिवप्रादुर्भावदिवसतयाशिवरात्रिरितितद्दिनव्यवस्थितिसिद्धा के- [१७]
चित्शिवयोगाभावेपिकृष्णाष्टम्यांरोहिणीवाशिवरात्रिरेवेतिव्यक्तं एतदुक्तंशिवधर्मोत्तरे शिवयोगेनयुक्तापिरहितापिकदाचन ॥ शिवरात्रिरितिज्ञेयासातिथिः
शिववल्लभेति ॥ ८५ ॥ अत्रव्रतविषयःकृतकल्पोनिर्णीयतइतिविज्ञेयमायुष्मता इतःवर्त्रानिशीथव्यापिनी महालिंगप्रादुर्भावतोकोरिति सूत्रानुरोधेनाशिवरात्रि-

र्निर्णीता तदेतदनुरोधेनसौभ्रात्रन्यायमधिकृत्यनरकचतुर्दशीनिर्णीयते एतदुक्तंहरिवंशे आश्वयुक्कृष्णपक्षस्यभगवान्हरिरव्ययः ॥ नरकंहतवान्यस्यांचतुर्द-
श्यांमहायशाइति ॥ ८६ ॥ विष्णुधर्मोत्तरे नरकासुरसंहारंप्राग्ज्योतिषपुरेहरिः ॥ आश्वयुक्कृष्णपक्षस्यचतुर्दश्यांचकारयइति ॥ ८७ ॥ एतत्पुराणवचननरका
सुरनिधनेप्रतीतेतद्दिनेजगतिसुमंगलोत्सवइतितैलाभ्यंगप्रतीतिः कात्यायनः नरकस्यचतुर्दश्यांतैलाभ्यंगकरोतियः ॥ अश्वमेधक्रतुफलंभवत्येवनसंशयइति
॥ ८८ ॥ मांडव्यः चंद्रोदयेप्रभातेतुतैलाभ्यंगंकरोतियः ॥ नरकस्यचतुर्दश्यामश्वमेधफलंलभेदिति ॥ ८९ ॥ तदेताभ्यांवचनाभ्यांतैलाभ्यंगस्यांवाधिसङ्को द्वि-
तीयवचनेनचंद्रोदयप्रभातकालौस्वरूपतोनिर्दिष्टोननुभयादेवेतत्सत्वेकथंव्यवहारइतिचेन्न परादेनेसूर्योदयस्यदर्शनेनेति कलामात्रस्यग्राह्यत्वात् अतएवाह
व्यासः कलामात्रापरिग्राह्यानरकस्यचतुर्दशी ॥ परेद्युर्यदिकुर्वीरन्नभ्यंगंसर्वसूर्यइति ॥ ९० ॥ स्मृतिदर्पणे चतुर्दशीयाश्वयुजस्यकृष्णा । स्वातृक्षयुक्ताचभवेत्प्र-
भाते ॥ स्नानंसमभ्यज्यनरैस्तुकार्यं । सुगंधितैलेनविभूतिकामैरिति ॥ ९१ ॥ अत्राविशेषोसमुप्रोक्तः चतुर्दशीकलामात्रापरास्मिन्दिवसेयदि ॥ तदापूर्वदिनंत्याज्यं
तैलाभ्यंगोविधीयतइति ॥ ९२ ॥ हारितोपि तैलाभ्यंगंतुकर्तव्यंप्रातःकालयदातिथिः ॥ आश्वयुक्कृष्णपक्षस्यचतुर्दश्यांविधूदयइति ॥ ९३ ॥ नचैवंस्यात्तेनक्षत-

मासोपरेद्युस्तत्रैवस्यामुहूर्तत्रितयमधिगतायत्रमंत्रोमहीद्यौः ॥ भूमिर्भूमीतिमंत्रस्तदनुनिगदितः संस्पृशेत्भूमिमेनां कृत्वापूजांयथावत्सकलमभिमतंतेनलब्धाचिरायुरिति ॥ ९९ ॥ लोगाक्षेः भूमिर्भूमीतिमंत्रेणमहीद्यौरितिमंत्रतः ॥ महीपूजाप्रकर्तव्यामहीपानेवजायतइति॥ १०० ॥ अत्रहिवचनद्वयेतिथिनिर्णयासिध्या पूजास्वरूपेनिर्णीते तत्रैवविशेषविधिमाह वृद्धगार्ग्यः गंधपुष्पाक्षतैर्नूनंभक्षभोज्यादिषड्रसैः ॥ महीपूजाप्रकर्तव्यापरत्रेहचशर्मणइति ॥ १०१ ॥ गालवोपि महीपूजांप्रकुरुतेपौर्णमास्यांनसंशयः ॥ संवत्सरंसलभते भक्ष्यभोज्यादिसंपदामिति ॥ १०२ ॥ विस्तरस्तुस्मृतिरत्नावल्यांस्थितइतिस्वरूपमात्रनिदर्शनंविज्ञेयं आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चयं ॥ पूर्णःपंचमउल्लासःकांडेनैमित्तिकेशुभः ॥ १०३ ॥ इति श्रीआनंदगिरिस्वामिकृते स्मृतिसारसमुच्चयेनैमित्तिककांडेपंचमउल्लासः ॥

हिरण्यगर्भंप्रणमामिभक्त्या सरस्वतीजानिमशेषहृद्यं ॥ सृष्टेर्विधातारमनंतसौख्यं विद्यागुरुंसंततयोगिगम्यं ॥ १ ॥ यदत्रमंडूकप्लुत्यातदेकादशींविहाय
त्रयोदशीनिर्णीता ततएवाधुनासावकाशप्राप्तत्वादेकादशीनिर्णीयते सादिनत्रयमवधीकृत्य प्रवर्तमानंसंशयंछिनत्तीतिवस्तुगतिः भरद्वाजः दशमीयदिपूर्वेद्यु
रेकादश्युत्तरेयदि ॥ द्वादशीयदिसाशुद्धा संदेहोनैवविद्यतइति ॥ २ ॥ विष्णुवृद्धोपि दशमीपूर्वदिवसे विज्ञायोत्तरतोदिने॥ द्वादशीसमुपोष्यैवसैकादश्यातरि-
च्यतइति ॥३॥ ब्रह्मांडपुराणेतिथिस्वरूपमुदाहृतं कालकूटंदधाराथ जगतांहितकृत्तमः ॥ एकादश्यांमहेशान सातिथिः पुण्यदायिनीति ॥ ४ ॥ शिवधर्मोत्तरे
ब्रह्मणाविधृतानूनं दशमीद्वादशीतथा ॥ हरिरेकादशीसाक्षात्हरेणदिवसत्रयमिति ॥ ५ ॥ तदेतैर्वचनविशेषैर्दिवसत्रयेव्यवस्थितिरवगम्यते तदधुनाएकादशी
वचनविशेषैर्बोध्येति वचनांतराण्युदाहरामः एतदाहसूत्रकारः एकादशीपूर्वापरादिनेद्वादश्यभावइति लोगाक्षिः नवमीदशमीविद्धा यदिचैकादशीतथा ॥ परे
द्युर्द्वादशीदृष्टा साग्राह्यातुप्रयत्नतइति ॥ ६ ॥ व्यासः एकादशीपराकार्या यदिदृष्टातुद्वादशी ॥ नचेत्पूर्वाभवेद्दोषा सर्वेषामेवनिश्चयइति ॥ ७ ॥ मंडनमिश्रेणोक्ते
द्वादशीसत्वेप्येकादशी कलामात्राग्राह्येति कलामात्राप्ययदादृष्टा यद्येकादश्युपोष्यते ॥ द्वादशीपरतश्चेत्सानचेत्पूर्वैवकेवलामिति ॥ ८ ॥ बौधायनोपि कलामात्रा
यदितिथिरेकादश्युदयेसति ॥ परेद्युःसाद्वादशीचेदुपोष्यानात्रसंशयइति ॥ ९ ॥ अत्रविशेषोवसिष्ठेनोक्तः संपूर्णैकादशीयत्र द्वादशीचेन्नलक्ष्यते विषयुक्तेति
सात्याज्या गुणैःसर्वैःसमन्वितेति ॥ १० ॥ अत्रहि रुक्मांगदमतमंबरीषमतमितिद्वैविध्यमेकादश्याविधृते अंबरीषमते एकादशीसत्वेपिद्वादश्यभावेत्यज्यते
रुक्मांगदमतेतु द्वादश्यभावेपिपरेद्युरेकादशीदर्शनात्गृह्यतइतिविवेकः एतदाहपैठीनसिः रुक्मांगदमतेनूनमेकादश्याःप्रधानता ॥ अंबरीषस्यतुमते द्वादशी
त्ववारिज्यतइति ॥ ११ ॥ तथाचमतद्वयअंगीकारे यदंबरीषमतं तदेवयुक्तमुत्पश्यामः प्रागत्रदिवसत्रयमुद्दिश्य तदेकादश्यांनिर्णीतायां तेनैवपथामहागणपतेर्महा
चतुर्थ्यांदिवसत्रयमुद्दिश्याविशेषविधिर्निर्णीयते वृद्धवसिष्ठः महाचतुर्थ्यांप्राप्तायांदिवसत्रयमीर्यते ॥ पूजामहागणपतेःसर्वसिद्धिप्रदायिनीति ॥१२॥ तिथि
निर्णयस्यप्राङ्निर्णीतयायोयमवशेषःसएवकथ्यतइतिविवेकः तत्राहिउपवासःएकभुक्तमितिपक्षद्वयंव्यवस्थितं पैठीनसिः दिनत्रयेपूजयतिसमुपोष्यगजाननं
अथवाप्येकभुक्तंवाकृत्वापूजांसमाचरेदिति ॥१३॥ अत्रपूजाविधिर्बादरायणेनोक्तं एकोत्तरशतैःपत्रैःपूजयेत्गणनायकं ॥ दिवसत्रितयेभक्त्यावांछितंलभते
नरइति ॥१४॥ वृद्धगार्ग्यः एकविंशतिपत्राणिपुष्पाण्यप्येकविंशतिः ॥ एकविंशतियिक्षाणिविघ्नराजप्रपूजनइति ॥१५॥ यदेतैर्वचनैःपूजाविधौसिद्धायांकी-

रायणशास्त्रपारायणकार्यामतिस्मृतिकल्पतरौस्थितं वेदपारायणंचैवशास्त्रपारायणंतथा ॥ माहात्म्यंविघ्नराजस्य पठेन्नियमकंनरइति ॥२५॥ स्मृतिचन्द्रि
कायामपि पूजायांनग्नराजंमातादनमापयोश्चपारायणार्थैः । शास्त्रेसंतोष्यनूनंगणपतिमहिमानंपठेत्शास्त्रदृष्टं ॥ कुर्यात्पूजांयथोक्तांत्रिदिनमपितथातच्चतुर्थे-
ह्निपश्चाद्द्वार्थैःसंघोषयित्वाक्षिपतुजलमाशप्रार्थनापूर्वमेवेति ॥२६॥ विस्तरस्तुमूलग्रंथेव्यवतिष्ठतइत्यवसीयते भाद्रपदशुक्लतृतीयायांमहाचतुर्थिमनूद्य
गौरीपूजाप्रकर्तव्येतित्रिकांडमंडनः भाद्रशुक्लतृतीयायांगौरीगौरीपूजनेयत्नतः॥ वनिताभिर्विशेषेणपूजनीयाप्रयत्नतइति ॥२७॥ हारितोपि पूजनीयाप्रयत्नेनक-
न्याभिर्मंगलेप्सुभिः ॥ भाद्रशुक्लतृतीयायांगौरीसाक्षान्महेश्वरीति ॥२८॥ ननुसातृतीयाकियन्नाडीयुक्तापरिग्राह्येतिसंशये यदाहात्रिः मासिभाद्रपदेप्राप्ते [१९]
यातृतीयात्रिनाडिका ॥ गौरीव्रतंप्रकर्तव्यंविशेषाद्वनिताजनैरिति ॥३०॥ कश्यपः सौभाग्यव्रतंस्त्रीणांतृतीयाप्रोष्ठपद्यसौ ॥ दानंसुवासिनीपूजायथाशक्ति-
विधीयतइति ॥३१॥ त्रिनाडिपूजायमप्युक्ता भाद्रशुक्लतृतीयायांगौरीपूजांसमाचरेत् ॥ सार्धनाडीपरिग्राह्यापराप्रशस्यतइति ॥३२॥ अत्रायंव्यवहा-
रः आत्रिवर्षयावत्ऋतुदर्शनंतावत्कन्याभिः भर्तुरायुष्यवृद्धये तद्दिनेगौरीपूजाप्रकर्तव्येति यदाहपैठीनसिः आत्रिवर्षंतुकन्याभिर्यावत्स्यादृतुदर्शनं ॥ गौरीपू-
जाप्रकर्तव्याप्रोष्ठपद्यांनसंशयइति ॥३३॥ पूजायामंत्रमाह वृद्धयाज्ञवल्क्यः गौरीमिमायेतिमनुर्गौरीपूजाविधौभवेत्॥ जपेहोमेचसर्वत्रगौर्यामेषमनुर्भवेदिति

एवंगौरीपूजाविधौनिर्णीतायांकियत्सुदिनेषुपूजेतिविधिसंशये गार्ग्यआह कृत्वामृत्तिकयामूर्तिंगौर्याःपूजांसमाचरेत् ॥ त्रिदिनंपूजयित्वाथजलेतुप्रक्षिपेत्पुनः
॥३५॥ व्यासोपि सर्वाभरणसंयुक्तांगौरीसंपूजयेत्सतः ॥ चतुर्थदिवसेप्राप्ते जलेतामुत्सृजेत्पुनरिति ॥३६॥ तथाचगौरीपूजायांत्रिनाड्यांप्रतीतायां आत्रिदि
नंतांपूजयित्वाजलेमांगल्यघोषपूर्वकमुत्सृजेदिति सर्वदेशेषुप्रतीयतइत्यादिक यदत्रपूर्वंगौरीव्रतेचेतिसूत्रमनूद्यपराविद्धायास्तृतीयायाः प्राशस्त्यमुक्तं तेनैव
व्यवहारेणात्रिदिनपूजानिर्मिता ततएवव्यवहारान्महानवम्यांनवसुदिवसेषुपूजाविधिप्रयुक्तेन तिथिनिर्णयेप्राङ्निर्णीते तदधुनाविशेषविधिनिर्णीयते निर्णया-
मृतेगौतमः दुर्गापूजाप्रकर्तव्यादिवसेषुनवस्वपि ॥ आरभ्यप्रतिपदि नवम्यांतुसमापयेदिति ॥ ३७ ॥ अत्रहि उपवासोनक्तभोजनमिति मतद्वयंव्यवतिष्ठ
ते यदाहदक्षः नवरात्रौप्रकर्तव्य उपवासस्ततोथवा ॥ नक्तंवाभोजनीयेह पूजयित्वाचमातरमिति ॥ ३८ ॥ तथाह्यत्रमातरमित्यनेन जगन्मातादुर्गाप्रतीयते
यदाहवृद्धवसिष्ठः जातवेदसमंत्रेण दुर्गासंपूजयेन्नरः ॥ नक्तव्रतंसमारभ्य यद्दिनेषुनवस्वपीति ॥ ३९ ॥ एतन्मूर्तिपूजाविधानं सावधानयुक्तं तन्मध्येतृतीय
दिवसे त्रिवर्षकन्यावासोलंकारैः संभूष्यपूजनीयेति कात्यायनः त्रिवर्षकन्यासंपूजा वासोलंकारभूषणैः ॥ तृतीयायांयथायोगं वांछितंलभतेनरइति ॥ ४० ॥
तदत्रगायाहव्यापित्वंयुक्तमेव यदाहगालवः कन्यापूजाविधौनूनं सायंकालःप्रशस्यते ॥ त्रिशन्नाडीमतीत्यैव तृतीयासफलाभवेदिति ॥ ४१ ॥ ततएवसप्त

वहा ॥ आश्वयुक्शुक्लपक्षस्य दशमी यानिगद्यतीति ॥ ४६ ॥ अत्राहि विजयदशम्याः स्वरूपोनिर्णीतो विजयकालोऽयं क इत्यपेक्षायां सायान्हव्यापित्वां वेविक्तं अतएवा हकात्यायनः संध्याकालेसमुत्पन्ने दशम्यां विजयावहे ॥ शरपातंप्रकुर्वीरान्विजयार्थं दिवौकसामिति ॥ ४७ ॥ तदेतास्मिन्वचनेसंध्याकालइत्युक्त्यासायान्हव्यापि त्वंनवस्थापितं तत्रपूर्वेद्युर्वा यत्रसायाह्नाधिक्यं सएवकालोविशेषणोयइतिविवेकः एतदाह वृद्धयाज्ञवल्क्यः सायाह्ने यत्रचाधिक्यंतद्दिने ... तत् ॥ पूर्वेद्युर्वा परेद्युर्वाश्रवणंतूपसर्जनामिति ॥ ४८ ॥ यदत्रश्रवणंतूपसर्जामित्युक्त्या श्रवणंप्रसक्तंतत्सत्वेयोगविशेषः तदन्यथात्वेपिसायाह्नव्यापित्वमेवसिद्धं तथा सायाह्नव्यापित्वेसिद्धे तिथिस्वरूपंनिर्णीतमेव तत्रैवशमीपूजायाः प्राधान्यंविवक्षितं मनुः शमीतरुंसमासाद्य राजान स्वेष्टदेवतां ॥ पूजयित्वातुसंध्यायां शरपातं प्रकुर्वीतइति ॥ ४९ ॥ धनुपूजामन्त्रः गार्ग्यगोक्तः संसृष्टमितिमन्त्रेणनिषंगसहितंधनुः ॥ पूजयित्वाशरंधृत्वापातयेल्लक्ष्यसंयुतामिति ॥ ५० ॥ तत्पूर्वेद्ने नवम्यामेव प्रातःगजाश्वादिपूजेतिविवेकः यदाहहारीतःगजाश्वरथखड्गादीन्छत्र दोलिकयासमं ॥ चामरव्यजनादींश्चनवम्यामेवपूजयेदिति ॥ ५१ ॥ विष्णुधर्मोत्तरे शरखड्गरथादीनांछत्रांदोलिकयासमं ॥ पूजानवम्यांप्रातःस्याच्छास्त्रमेवंविनिश्चयइति ॥ ५२ ॥ यद्यपिरथादीनांपूजानवम्यामेवाविहिता तथापि दशम्यांगजाश्वाद्यारोहणाधिकारतया तत्रैवशमीतरुसमीपेधनुःशरयोःपुनः पूजाविधानं गजादीनामुत्सृष्टावाधिरिति विवेकवत्ताप्रतीयते एतदाहत्रिः आरोहणंगजाश्वादेः पूजितस्यपरैवतु ॥ निषंगधनुषोः पूजापुनरेवशमीतराविति ॥ ५३ ॥ विस्तरस्तुहेमाद्रौद्रष्टव्यः उभयप्रदोषमुद्दिश्ययेत्रिंशत्प्रनाडिकापरिग्राह्येति सामान्य त्रयोदशीनिर्णयः पूर्वसनंगत्रयोदशीनिर्णयेव्याख्यातः तदत्रसावकाशतया प्रामाणिकव्यवहारमुद्दिश्यनिर्णीयते यदुक्तंस्मृतितरंगिण्यां पूर्वोत्तरसोवापि त्रिंशन्नाडीयदातिथिः ॥ तदाप्रदोषाविज्ञेयस्त्रयोदश्यामसंशयामिति ॥ ५४ ॥ ब्राह्मपुराणे पक्षयोरुभयोश्चैवयाभवेत्सात्रयोदशी ॥ त्रिंशन्नाड्यांप्रसन्नह्याभवत्येव विनिश्चयइति ॥ ५५ ॥ तदेताभ्यांवचनाभ्यांपूर्वोत्तरयोः प्रदोषविषयेत्रयोदश्यांप्रसक्तेसूर्यास्तमयमुद्दिश्य व्यवस्थाविज्ञेया वृद्धयाज्ञवल्क्य ... काले ... नाडीद्विकाविधिष्यते ॥ त्रिंशन्नाड्यामर्धनाडीत्रयोदश्यांतदूर्ध्वतइति ॥ ५६ ॥ अत्रहितदूर्ध्वतरत्युक्त्यात्रिंशन्नाडीउत्तरमप्यर्धनाडीगृह्यते तथाचतयोः समवायेसैवमुख्यानाडीप्रदोषइतियदुक्तं भट्टभास्करीये सूर्यास्तमयेकालोहप्रदोषोमुख्यतांगतः ॥ तत्रैवभारतीपूज्यास्वाध्यायंविसृजेत्ततइति ॥ ५७ ॥ अयमेव महापुण्यकालइति मंदवासरयोगेशिवसंपूज्यनक्तभोजनंकार्यमितिलोकव्यवहारः शिवपुराणे मंदवासरयुक्तोयंप्रदोषःस्यात्रयोदशी ॥ अस्यांशिवातिथौपूजा

महाभाग्यप्रदायिनीति ॥ ५८ ॥शिवरहस्येत्वयंविशेषः त्रिंशन्नाडिकलान्यूनात्रिंशन्नाडीतदुत्तरा ॥ त्रयोदशीपरिग्राह्यापक्षयोरुभयोरपीति ॥ ५९ ॥ योग
विशेषोहिप्रबलः भरद्वाजः चित्रायुक्ताचतुर्थीचेच्छिवयुक्ताचतुर्दशी ॥ मंदवासरयुक्तेयंमहापुण्यप्रदायिनी ॥ ६० ॥ जयंतीरोहिणीयुक्ताचित्रायुक्ताचपूर्णि-
मा ॥ अनंतफलमुद्दिष्टंपुण्ययोगेनलभ्यतइति ॥ ६१ ॥ स्मृतिरत्नाकरे चित्रायुक्ताचतुर्थीशिवतिथिरपिसातेनयोगेनयुक्ता रोहिण्यासंयुताचेद्वसुतिथिरपि
सामंदवारेणयुक्ता ॥ सेयंशैवोप्रशस्ताबहुसुकृतफलापुण्ययोगेलनभ्या। लब्धेनांपुण्यभाजःसुकृतिनइहतेसर्वतःश्लाघनीयाइति ॥ ६१ ॥ अस्यांहिमहातिथित्वेन
शिवपूजायाःप्राशस्त्येप्रतीते तद्दिनेनक्तभोजनंसोमप्रदोषेपितुल्यं यदाहशाट्यायनिः शनिवारप्रदोषेपिसोमवारप्रदोषके ॥ त्रयोदश्यांनक्तभोजीशिवलोकेसम
श्नुतइति ॥ ६२ ॥ तदेतद्वचनेनभाग्यवतोव्रताचरणेन शिवसांनिध्यकारणमितियुक्तमुत्पश्यामः ननुप्रदोषविषयेविषयभागउक्तः तस्यकागतिरितिचेन्न वेद
शास्त्रयोस्तदानीमनध्यायसिद्धेःकोयंविषयविभागइतिचेत्ब्रूमः कश्यपः चतुर्थीप्रथमेमासेसार्धयामेतुसप्तमी ॥ यामद्वयंत्रयोदश्यांप्रदोषःसर्वगर्हितइति ॥ ६३
प्रदोषशब्दस्यप्रकृष्टदोषवाचकतयातदनध्यायविधिः तदाहरल्लः भारतींपूजयेद्यत्रप्रदोषःकथ्यतेबुधैः ॥ तदूर्ध्वनापिचाध्येयंयावत्कालंविसर्जनामिति ॥ ६४ ॥
विस्तरस्तुस्मृतितिलकेद्रष्टव्यइतिदिक् सर्वासुतिथिष्वमावास्यामध्याह्नगामीषोडशनाडीयुक्ताया सोपवासादिषुयुक्तेतिसर्वमतसिद्धांतः पैठीनसिः मध्याह्न
व्यापिनीग्राह्यात्वमावास्यानसंशयः ॥ उपवासादिषुतथाषोडशैवप्रनाडिकेति ॥ ६५ ॥ परेद्युरितिशेषः गालवः परेद्युर्यदिलभ्येतनाडीषोडशसंमिता ॥ अमा
वास्यापरिग्राह्यासोपवासादिकर्मणीति ॥ ६६ ॥ अनयाव्यवस्थयासामान्यतमअमावास्यांषोडसनाड्यांप्रसक्तायांव्रतांतरेविशेषविधिर्निगद्यते ब्रह्मांडपुराणे
सोमानातपुरातन्वीव्रतंसप्तमजन्मनि ॥ कृतंपुण्यफलंदत्वामोचयामासभामिनीति ॥ ६७ ॥ सप्तमेजन्मनिकृतंव्रतंकिमित्यपेक्षायांसोमवासरयुक्तामावास्येति
समापतति वसिष्ठः सोमवासरसंयुक्तममावास्यांव्रतंचरेत् ॥ वैधव्यदोषनिर्मुक्ता जायतेवनितापुनरिति ॥ ६८ ॥ व्रतस्वरूपंमरीचिराह सौमंगल्यव्रतं
स्त्रीणाममायांसोमवासरः ॥ प्रदक्षिणंप्रकुरुतेतरुमश्वत्थसंज्ञितमिति ॥ ६९ ॥ व्यासः आमावाजस्यमंत्रेणतरुमश्वत्थमेवतु ॥ संस्पृश्यपूजयेत्तत्रगंधपुष्पाक्षतैः
क्रमादिति ॥ ७० ॥ मदनरत्नेविशेषः नालिकेरफलैर्वापिरंभादोनाफलैरपि ॥ क्रमुकाद्यैश्चकर्तव्यमथवास्वर्णरौप्यकैरितिः ॥ ७१ ॥ साकियन्नाडीपरेग्राह्येतिवि-
धिंसशयेपूर्वद्युर्नाडीद्वितयात्परंपरेद्युर्मुहूर्तत्रितयसत्वेकार्यमितिविवेकः यदाहरल्लः पूर्वतिथ्यायदिभवेन्नाडीत्रितयतःपरं ॥ परेद्युश्चेत्प्रकर्तव्यंमुहूर्तत्रितयेसतीति

[illegible] पठितस्यपुरापाठ
दृढीकुर्यान्नसंशयइति ॥ ७९ ॥स्मृतिरत्नावल्यां पारायणंवाकुर्वीतलिखेद्वापियथातथं ॥ चिंतनाद्वाप्रकुर्वीतयोनध्यायेनदुष्यतीति पैठीनसिः पारायणविधौ नूनंपुण्यकर्मणिदूषणं ॥ नैवास्तित्यज्यतेनूनंसमुखेगुरुशिष्ययोरिति ॥ ८० ॥ पाठइतिशेषः स्मृतिपारिजाते प्रदोषकालंसंत्यज्यपूर्वपाठंदृढंक्रियात् ॥ तद्दोषस्तत्र विद्येतप्रदोषः सर्वदोषतेति ॥ ८१ ॥ विदूरथः सर्वानध्यायमुल्लंघ्य पूर्वपाठंदृढीक्रियात् ॥ संत्याज्याप्रतिपद्यत्रविस्मृतेरेवकारणमिति ॥ अत्रहि विस्मृतिरेव कारणमित्युक्त्याप्रतिपदिलेखनमात्राधिकारइतिबोध्यं पारायणेनदोषएवेति यदाहवृद्धयाज्ञवल्क्यः पारायणंप्रतिपदिकुर्यादेवनदोषता ॥ पुस्तकंविलिखेदेव नदोषस्तत्रविद्यतइति ॥ ८२ ॥ एतत्प्रपंचोविस्तारोभट्टभास्करीयेनिरूढइतिसिद्धं मुख्यानध्यायप्रसक्त्या चतुर्दश्यादिषुत्रिषुतिथिषुश्रावणेमास्युपाकर्मकुर्वी-रान्नितिप्रयाविविच्यते यदाहांगिराः ऋग्यजुःसामविदुषामुपाकर्मणिशस्यते ॥ चतुर्दशीपौर्णमासीप्रतिपच्चयथाक्रममिति ॥ ८३ ॥ पैठीनसिरपि ऋग्यजुःसामगानांहिपौर्णमासीचतुर्दशी ॥ प्रतिपच्चयथायोगमुपाकर्मणिशस्यतइति ॥ ८४ ॥ अत्रहियथायोगमित्युक्त्याप्रागुक्तक्रमोबोध्यः तेनचऋग्यजुःसामगा-नांचतुर्दश्यादिपुतत्करणंविशेषविधिरिति नन्वेतेषामेवक्रमेणनक्षत्रोपयोगित्वमुक्तं गार्ग्येण बह्वृचःश्रवणेकुर्युर्धनिष्ठायांतुयाजुषाः ॥ सामगाशततारायां [२१]

मुपाकर्मप्रकुर्वतइति ॥ ८५ ॥ तदेतादृशस्यवचनस्यकागतिरितिचेन्न क्षत्रियवैश्ययोर्नक्षत्रप्राधान्यात् एतदाहगालवः तिथिरेवप्रधानंस्यात्ब्राह्मणानामु-पाकृतौ ॥ नक्षत्रंतुप्रधानंस्यात्तथाक्षत्रियवैश्ययोरिति ॥ ८६ ॥ नक्षत्राण्युक्तान्येव लौगाक्षिः श्रवणंचधनिष्ठाचशततारायथाक्रमं ॥ ऋग्यजुःसामविदुषंभवे त्क्षत्रियवैश्ययोरिति ॥ ८७ ॥ उपाकर्मणातिशेषः विप्राणांयदिश्रवणयोगः तर्हिऋग्यजुः सामगानामपिविशेषविधिरितिबोध्यं अन्यथोत्तराषाढधनिष्ठावे धवैयर्थ्यापत्तेः यदाहांगिराः उत्तराषाढवेधोहिधनिष्ठावेधयायुतः ॥ श्रवणंतुहिनस्त्येवतस्मादेचोपसर्जनमिति ॥ ८९ ॥ अत्रैवाविप्रवेधाविषयेविशेषोवासिष्ठे नोक्तः मुहूर्तत्रितयादूर्ध्वंनोत्तराषाढवेधता ॥ श्रवणस्यभवेन्नूनंतदूर्ध्वंबाधनिष्ठयेति ॥ ९० ॥ तदेतेनवचनेनपूर्वोत्तरयोः साविपर्ययेवेधदोषोनिरस्यते श्रवणात्पूर्वंमुहूर्तत्रितयेयद्युत्तराषाढः तदानवेधः तथाश्रवणस्यमुहूर्तत्रितयादूर्ध्वंयदिधनिष्ठातदानवेधइति एवंचातिथेर्नकिंचिद्बाधकमितिविवेक्तव्यं श्रवण योगोविशेषविधिरिति यदेतदुपाकर्मणिविप्राणांचतुर्दश्यादयः ऋग्यजुःसामगानांयुक्ततराइति किमनयाकुसृष्ट्या तेनात्रनिर्णयेत्रयाणामपितिथीनांपरदिने कियन्मुहूर्तसत्वेग्राह्यतेतिविधेसंशये कात्यायनआह मुहूर्तत्रितयंग्राह्यंचतुर्दश्यादिषुत्रिषु ॥ परेद्युश्चेदुपाकर्मचतुर्दश्यादिषुक्रमादिति ॥ ९१ ॥ विस्तरस्तु स्मृतिचंद्रिकायांद्रष्टव्यः यदनध्यायमाधिकृत्यैवचतुर्दशीप्रसक्तौ कार्तिकशुक्लचतुर्दश्यां कैलासयात्रालोकतः प्रतीतेतिसानिर्णीयते शिवरहस्ये जालंधर परंप्राप्यमहेशाद्यासुरास्तदा ॥ [illegible]

संकल्पश्रवणेजाते तदुत्तरविधिरुच्यते पैठीनसिः वेदघोषैः शास्त्रघोषैर्मांगल्यैः स्वस्तिवाचनैः ॥ ग्रामयात्राप्रकर्तव्यातीर्थैदेवालयेतथेति ॥ १०० ॥
विडूरथः तीर्थेस्नात्वातत्रतत्रपूजयेद्देवतामनुः ॥ उपवासःप्रकर्तव्यस्तद्दिनेपुण्यलिप्सुभिरिति ॥ १०१ ॥ लोगाक्षिः ऊर्जशुक्लचतुर्दश्यामुपवासंचरेद्व्रती ॥
परेद्युःपारणांकुर्यादितिशास्त्रस्यनिश्चयइति ॥ १०२ ॥ तदत्रतद्दिनउपवासप्रसक्तौ साकियन्नाडीयुक्ताग्राह्येति।विधिसंशये शाट्यायनेनोक्तं चतुर्दशसुना-
डीषुचतुर्दश्यामुपोषणं कार्तिकेशुक्लपक्षस्यपरेद्युरितिनिश्चयइति ॥ १०३ ॥ शाह्यायणोप्याह चतुर्दश्यांप्रकुर्वीत कार्तिक्यांशुक्लपक्षके ॥ चतुर्दशसुना-
डीषुपरेद्युर्विधिसंशयइति ॥ १०४ ॥ विस्तरस्तुस्मृतितरंगिण्यांमृग्यइतादिक आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये ॥ पूर्णःषष्ठःसमुल्लासः कांडेनैमि-
त्तिकेशुभः ॥ १०५ ॥ इतिश्रीआनंदागिरिस्वामिकृते स्मृतिसारसमुच्चयेनैमित्तिककांडेषष्ठउल्लासः

कमलाकांतममलंकलयामिस्वलीलया ॥ जगद्येनान्वितंतंवांछतिाथप्रसिद्धये ॥१॥ केषुचित्तिथिषुनिर्णीयतेषूपवासनक्तैकभुक्तानिविचार्यते यदाहगाल-
वः शिवरात्रौकृष्णजन्मदिनेत्वेकादशीतिथौ ॥ उपवासःप्रकर्तव्यस्त्वन्यथारौरवंव्रजेदिति ॥२॥ पैठीनासिः नभोक्तव्यंनभोक्तव्यंनभोक्तव्यंकदाचन ॥ शिव
रात्रौकृष्णजन्मदिनेत्वेकादशीतिथाविति ॥३॥ नन्वेतेषुतिथिषुउपवासेत्वकृतेकिंदूषणमित्यपेक्षायांतदुक्तंब्रह्मांडपुराणे शिवरात्रौभुज्यतेचेत्कृष्णजन्माष्टमीति
थौ ॥ एकादश्यांसिक्तमेकंक्रिमिरेवनसंशयः ॥४॥ एतत्प्रत्यवायश्रवणंफलंकीदृशमितिचेत्ब्रूमः वराहपुराणे उपवासःशिवतिथौकृष्णजन्माष्टमीतिथौ ॥
अश्वमेधफलंदद्यात्तथाप्येकादशीतिथाविति ॥५॥ एवंतिथित्रयेषूपवासफलनिर्णयेजातेप्रत्यवायेचासिद्धेनक्तविधौकिमितिचिंत्यते देवलः पक्षयोस्तुत्रयोद
श्यांसोमवासरएवच ॥ शनिवारप्रदोषेपिनक्तभोजनमीरितमिति ॥६॥ वृद्धगार्ग्यः नक्तभोजनकृन्मर्त्यःप्रदोषेसर्वसंपदं ॥ लभतेनात्रसंदेहःपरलेहचशर्मणइ-
॥७ तथाचनक्तभोजनविषयेमंदवासरःसोमवासरश्चत्रयोदश्याविशेषणं तेनचात्रसोमवासरशब्दउपलक्षणंगृह्यते ततएवपृथक्सोमवासरेपिनक्तभोजनंकार्य-
मितिसिद्धं यदाहशाट्यायानिः सप्तमेवासरेनूनंसोमवासरएवहि ॥ नक्तभोजनकृन्मर्त्यःफलंचानंतमश्नुतइति ॥८॥ एवंफलोद्देशेननक्ततिथिषुनिर्णीतेषुरात्रि
भोजननिषेधःकेषुचित्तिथिषुविविच्यते अमावास्यांपौर्णमास्यांरविवारेतथैवच ॥ रात्रौभोजनकृन्मर्त्यःरौरवंनरकंव्रजेदिति ॥९॥ वृद्धवसिष्ठः रविवारेपौर्ण-
मास्याममायांरात्रिभोजनं ॥ यःकोपिकुरुतेमर्त्यःशूलरोगंसचाप्नुयादिति ॥१०॥ फलमुक्तंस्कांदपुराणे अमायांरविवारेचपौर्णमास्यांयथाविधि ॥ उपवासं
नरःकृत्वामहादानफलंलभेदिति ॥११॥ ननुसौराष्ट्रदेशेसौरभक्तैरेवरविवासरेरात्रिभोजनंक्रियतेतर्हिवैयर्थ्यमितिचेन्न जनपदाचारस्यतद्विवक्षायांबाधकाभावा
त् अतएवाहरलः यस्मिन्देशेयआचारस्तद्देशेसनदुष्यति ॥ आचारःकेरलेदेशेकुचमंडलदर्शनामिति ॥ तदेतेनवचनेनसौराष्ट्रविषयेरात्रिभोजनं रविवासरेन
निषिद्धतामितिसिद्धं अन्यथाकेरलदेशेकुचमंडलदर्शनस्यविरोधापत्तेः एतदाहवृद्धयाज्ञवल्क्यः भोजनंननिषिद्धंस्यात्सौराष्ट्रेरविवासरे ॥ रात्रौकेरलदेशेहि
कुचमंडलदर्शनमिति ॥१३॥ किंबहुनेत्यलंविस्तरेण अधुनासर्वासुतिथिषुपूर्वपरविषयेविचार्यते गौतमः पूर्वापरयुताग्राह्याप्रतिपच्छुक्लकृष्णयोः ॥ द्वितीया
यांविनिमयःकर्तव्यइतिनिश्चयइति ॥१४॥ पैठीनासिः तृतीयानुपराग्राह्याचतुर्थ्यपितथापरा ॥ पूर्वास्यात्पंचमीनूनंषष्ठीचापिपरास्मृतेति ॥१५॥ व्यासः
सप्तमीपूर्वयुग्बोध्यात्वष्टमीशुक्लकृष्णयोः ॥ पूर्वापरयुताग्राह्यानवम्याःपूर्वतास्थितिरिति ॥१६॥ हारितः दशमीनवमीयुक्तादशम्येकादशीयुता ॥ द्वादशीसातु

दिक् प्रागेवस्नात्सामान्यतः तिथिविषयव्यवहारे संक्रमेनक्तभोजननिषेधउक्तः तेषुकिमतिरिक्तं फलमितिविचिकित्सायामधुनाफलोद्देशोनिरूप्यते बादरा-
यणः संक्रमोयदिजायेतयोवाविष्णुपदाभिधः ॥ स्नानदानादिकंकार्यंषडशीतिमुखेतथेति ॥२१ ॥ पैठीनसिः अयनेविषुवेचैवतथाविष्णुपदाभिधे षडशीति
मुखेकुर्यात्स्नानदानादिकंनरइति तन्वेतेषांस्वरूपनिर्देशःअथमित्याशंकायां गालवआह स्थिरभेप्रविशेत्सूर्यस्तदाविष्णुपदंभवेत् उभयेप्रविशेद्यत्रषडशीति
मुखंभवेदिति ॥ २२ ॥ वृद्धवसिष्ठः मकरःकर्कटश्चोभावयतेपरिकीर्तितौ मेषस्तुलाचविषुवसंक्रमः परिगीयतइति तदेतैर्वचनैःसंक्रमस्वरूपेनिर्णीतेतत्रतत्र
विशेषविधिर्विविक्तव्यः तथाह्यत्रभरद्वाजः विष्णुपद्यांप्रातरेवस्नात्वाहोमंतुकारयेत् ॥ संस्नामिद्दिवसेमंत्रहोमस्तत्रप्रशस्यतइति ॥ २३ ॥ मरीचिः लाजैस्तिला-
क्षतैसार्हिसंक्रमेणप्रशस्यतइति ॥ २४ ॥ विद्धरथः मध्यान्हेमनुजःस्नात्वाषडशीतिमुखेतदा ॥ गोदानंतत्रकर्तव्यंपितृणांपिंडदोभवेदिति ॥ २५ ॥ तदनयावस्थ
याविष्णुपद्याः प्रातः कालेव्याप्तिस्तस्याःषडशीतिमुखस्यमध्यान्हव्यापित्वंयुक्तमुत्पश्यामः कात्यायनः अयनेविषुवेचैवयोवाकोवापिसंक्रमः ॥ कालोभ
वतिमध्यान्हंप्रातर्वास्नानमाचरेदिति ॥ २६ ॥ अत्राहविशेषमाह वृद्धमनुः अनंतफलदंस्नानंविषुवेचायनेतथा ॥ दानंचकोटिगुणितंपितृणांपिंडदानतइति
॥ २६ ॥ अत्राहिमुख्ययावृत्याविषुवायनयोर्मासोविवक्षितः हारितः चैत्रेविषुर्यदिभवेत्कार्तिकेयातदानरः ॥ स्नानदानादिकंकुर्वन्शिवलोकंसमश्नुतइति ॥२७
तदत्रसर्वसंक्रमाधिक्येकर्कटमकरौप्रतीतौतावेतौदक्षिणायनमुत्तरायनमिति यदुक्तंब्रह्मांडपुराणे स्वर्गद्वारंनिबध्नातिदक्षिणायनसंक्रमे ॥ द्वारमुद्धाटयंत्येवम-

मकरेचोत्तरायणइति ॥ २८ ॥ यद्यपिसर्वसंक्रमाणांसाधारणोधर्मस्तथाप्यनयोर्विशेषोधिकृतोवेदितव्यः यदाहकश्यपः मकरःकर्कटश्चोभेसंक्रमेष्वधिकौमतौ॥
उपवासःस्नानदानंसर्वेभ्योत्रविशिष्यतइति ॥२९॥ स्कांदपुराणे धेनुंसकांचनंदद्याद्विप्राणामपिभोजनं ॥ अयनाद्विनयेमर्त्यःस्वर्गसोपानपद्धतिरिति ॥ ३० ॥
विस्तरस्तुहेमाद्रौस्थितइतिदिक् यद्यतःप्राक्संक्रमफलोनिर्णीतेयारेष्वापघवारतयाभानुवासरस्यमुख्यताप्रसक्तौतद्व्रतविषयोत्रनिर्णीयते स्कांदपुराणे दिलीपनृ
पाते पूर्वमतंयज्ञानुवासरे ॥ कृत्वापापभियंत्यक्त्वासूर्यलोकंसमाप्नवानिति ॥३१॥ लोगाक्षिः ब्राह्मणैःक्षात्रयैर्वैश्यैर्व्रतमादित्यवासरे ॥ कर्तव्यंनात्रसंदेहःस्वर्ग
द्वारस्यपक्षमार्गिणे ॥३२॥ [illegible] शुक्लपक्षायां बादरायणआह माघेमकरसंक्रांतौव्यतीतायांततःपरं ॥ आदित्यवासरेस्नानमारभेत्
[illegible] इति पैठीनसिः प्रातःस्नात्वाशुचिर्भूत्वापुण्यं [illegible] ॥ आदित्यवासरंनूनंव्रतमेतत्समारभेदिति ॥ ३३ ॥ विश्वामित्रः क्षीरपूर्वोविधिःप्रोक्तोसूर्य
कास्नानपूर्वकः ॥ [illegible] ब्राह्मणानेनामति ॥ ३४ ॥ तदत्रविशेषमाह वृद्धमनुः उपवासःप्रकर्तव्यः [illegible] ॥ आदित्यवासरेनूनंसूर्य-
स्यप्रीतयेनृभिरिति ॥ ३५ ॥ तद्दिनेरात्रिभोजनेचांद्रायणव्रतंकृत्वाप्रायश्चित्तेनपरिहरेदिति [illegible]

रेदिति ॥४३॥ वसिष्ठः नक्तंतथैवकृच्छ्रकमुपवासोपियस्त्रिधा ॥ सोमवासरमुद्दिश्यव्रतंसम्यग्विधानतइति ॥४४॥ कश्यपः अन्यव्रतानिदपुण्यंनत्याज्यंतुक-
दाचन ॥ तथाप्युद्यापनंनूनंकर्तव्यंनात्रसंशयइति ॥४५॥ तदेतैर्वचनैर्व्रतस्यकर्तव्यतासिद्धौकदोद्यापनंकर्तव्यमित्याशंकायां बादरायणआह एकादशसुवर्षे-
षुव्रतमेतत्समाचरेत् ॥ ततउद्यापनंकार्यंव्रतस्यपरिपूर्तयइति ॥४६॥ विदूरथः आदौमध्येतथैवांतेकुर्यादुद्यापनक्रियां ॥ कृत्वापिनैकभुक्तादीन्वर्जयेन्मात्रसंश
यइति ॥४७॥ एवंविधवचनस्यसोमवासरव्रतस्यानित्यत्वासिद्धौकालोपदेशेकृते कस्मिन्मासेकार्यमित्यत्र पैठीनसिराह माघफाल्गुनवैशाखेकार्तिक्यांमार्ग
शीर्षके ॥ कुर्यादुद्यापनंनूनमन्यत्रपरिवर्जयेदिति ॥४८॥ देशभेदमाहगालवः गृहेषुपुण्यक्षेत्रेषुतीर्थेदेवालयेतथा ॥ व्रतस्योद्यापनंकार्यंमहेशपरितुष्टयइति
॥४९॥ व्रतस्वरूपं कात्यायनआह सोमानंस्वर्णमंत्रंसमिदाज्यचरुष्वपि ॥ त्रियंबकेनमंत्रेणसाज्यव्रीहीन्हुवेत्ततइति ॥५०॥ गौतमः शिवगायत्र्याचैवपंच
क्षयीततःपरं ॥ तिलांश्चपायसंहुत्वाकलशानाभिपूजयेदिति ॥५१॥ कलशस्वरूपमाहदेवलः अष्टमूर्तिस्वरूपोयंमहादेवउदीर्यते ॥ अष्टाभिःकलशैरर्च्यउमया-
सहितःशिवइति ॥५२॥ गार्ग्योपि आचार्यायचगोदानंवायनंचसदक्षिणं ॥ ब्राह्मणान्भोजयेत्तेनशिवसायुज्यमाप्नुयादिति ॥५३॥ नन्वत्रानेकविधंव्रतमुक्तं
तत्रत्रयाणांमंत्रकार्यैतिचिंत्यते ब्रह्मांडपुराणे सोमोगौरीतिमंत्रश्चादिवोनाभाविचक्षणः एकभुक्तेचनक्तेचतौमंत्रौमुख्यतांगताविति ॥५४॥ कलशाभिमंत्रणे-
मंत्रआश्वलायनेनोक्तः यःसोमःकलशेष्वेतिकलशंपरिपूजयेत् ॥ तीर्थानिप्रोक्षणंकृत्वाशिवसायुज्यमश्नुतइति ॥५५॥ विस्तरोव्रतकांडेस्थितइत्युपरम्यते
शिवव्रतानुरोधेनसर्वोत्तमव्रतंकिमित्याशंकायांशिवरात्रिरापततीति शिवरहस्ये अश्वमेधादयःसर्वेक्रतवःसहदक्षिणाः ॥ शिवरात्रिव्रतस्यास्यकलांनार्हंतिषोड-
शीमिति ॥५६॥ पराशरपुराणे शिवरात्रिव्रतंचैकंक्रतवःसहदक्षिणाः ॥ एकत्रतुलितौधात्रातत्रपूर्वोभवद्गुरुरिति ॥५७॥ सनत्कुमारसंहितायां शिवरा-
त्र्याः परंनास्तिव्रतंत्रैलोक्यविश्रुतं ॥ यथाशिवःप्रधानोभूत्तथाशिवव्रतंविदामिति ॥५८॥ तदेतैर्वचनैःशिवरात्रिव्रतस्यसर्वोत्तमतासिद्धौकतिवत्सरमेतद्व्रतं
कार्यमित्यपेक्षायां पैठीनसिराह अष्टवत्सरमेतद्धिशिवरात्रिव्रतंचरेत् ॥ तत्रैवोद्यापनंकार्यंव्रतस्यपरिपूर्तयइति ॥५९॥ त्रिकांडमंडनः आरंभःशिवरात्रौहि
व्रतस्योद्यापनंतथा ॥ तत्रैवचप्रकर्तव्यमथवाफाल्गुनेभवेदिति ॥ कात्यायनः माघेव्रतसमारंभव्रतस्योद्यापनंयदि ॥ फाल्गुनेचचतुर्दश्यांकदाचिदुपयुज्यतइ-
ति ॥६०॥ अत्रहिफाल्गुनकृष्णचतुर्दश्यांकदाचिदुद्यापनंकार्यमितिप्रतीतं तत्रसमाधानमितिचेत्ब्रूमः हारितः फाल्गुनस्यतुमासस्यकृष्णपक्षेचतुर्दशी ॥

शिवरात्रिव्रतंनूनंमहाराष्ट्रेषुयुज्यतइति ॥ ६१ ॥ एतेनव्रतव्यवस्थायांसिद्धायांव्रतकर्तव्यतामाहभट्टभास्करः शिवरात्रौतूपवासःपरेद्युर्होममाचरेत् ॥ आचार्यंवर
वेदादौसर्वज्ञंवेदपारगामिति ॥ ६२॥वायुपुराणे समिदाज्यचरून्हुत्वाशिवस्यद्वादशाक्षरात् ॥ शिवगायत्रियाचैवपायसंहोममाचरेत् ॥ ६३ ॥ कद्रुद्रायेतिमंत्रेण
तिलान्व्रीहीन्पृथक्पृथक् ॥ पंचाक्षर्याहुनेदेवंव्रतसाद्गुण्यकारणादिति ॥ ६४॥ ईशानसंहितायां शिवरात्रिव्रतेपुण्येबिल्वपत्रेणहोमयेत् ॥ यातेरुद्रेतिमंत्रेण
गोदानंवायनंचरेदिति ॥ ६५॥ एवंविधवचनैः व्रतसमाप्तौजातायांफलप्रागेवोदाहृतं व्रतमेतन्नित्यमेवेति शिवरात्र्युपवासोल्लंघनेव्रतसमाप्तावपिदोषोस्त्येवेति
सिद्धं यदाहरल्लः शिवरात्रिव्रतंनित्यंयोभुंक्तेमोहतःकुधीः ॥ क्रिमिराशिंप्रभुंजानोनरकंचसमश्नुतइति ॥६६॥ विस्तरस्तुनिर्णयतरंगिण्यांवोदितव्यः तथैत
स्मिन्शिवरात्रिव्रतेनिर्णीतेनित्यमनित्यंवेतिसंशयेप्रसक्ते सार्वजनीनव्यवहारेणभोजनस्यप्रत्यवायदर्शनान्नित्यत्वमुपस्थितं तथाचसतिकस्यचित्पुंसः शिवरात्रौ
शिवपूजायाः नियततयातद्दिनेसूतकसंभवेकथमितिचिंत्यते लोगाक्षिः शिवरात्रौनित्यपूजाप्रतिसंवत्सरंभवेत् ॥ तद्दिनेह्युपघातश्चेत्फाल्गुनेमासिकुर्वतइति
॥६७॥ अत्रह्युपघातशब्दोजातकमृतकादिपरइति निर्णयपारिजातः अतएवकात्यायनः जातकंमृतकंवापिशिवरात्रौयदापतेत् ॥ फाल्गुनेमासकुर्वीरन्चतुर्द
श्यांयथातथामिति ॥ ६८॥ अत्रत्यचतुर्दशीशब्दःफाल्गुनकृष्णचतुर्दशीपरः एतदाहगालवः फाल्गुनेकृष्णपक्षस्यचतुर्दश्यांयथाविधिः ॥ सूतकेमृतकेप्राप्तेशिव
रात्रेस्तुपूजनामिति ॥६९॥ भरद्वाजोपि शिवरात्रौलुप्तपूजाफाल्गुनेमासिकथ्यते ॥ सूतकेमृतकेप्राप्तेचतुर्दश्यांयथाविधीति ॥७०॥ ननु सूतकानिवृत्तौजाता
यांनिवृत्तिदिनेकर्तुमुचितमेव श्राद्धादौव्यवहारसंभवादितिचेन्न कचित्पक्षेफाल्गुनकृष्णचतुर्दश्या शिवरात्रिनिर्देशात् यथाहविष्णुवृद्धः चतुर्दश्यांफाल्गुन-
स्यकृष्णपक्षेमहोत्सवः ॥ शिवरात्रिर्मालवाख्येदेशेकार्यतएवहीति ॥ ७१॥ यद्यपिमालवदेशेतद्दिनेशिवरात्र्युत्सवः तथाप्यत्रनसमाधानमितिचेत्ब्रूमः वि-
द्धूरथः सूतकमृतकंवापिशिवरात्रौसमापतेत् ॥ तद्दिनस्वतुपूजेयंफाल्गुनेमासिकथ्यतेति ॥७२॥ तदनेनवचनेनसूतकांतेकर्तव्यतायाः प्राशस्त्याभावोबोध्यः
नचैवंतथापिस्वीक्रियतेकिंबाधकमितिवाच्यं हारीतवचनेन निरस्तत्वात् तथाहि मुख्यार्थःसंभवेष्वत्रगौणोंगीक्रियतेयदि ॥ शिवरात्रौबाधकंस्यात्फाल्गुनस्मा
सिनिर्णयइति॥ ७३ ॥ ननुतत्रापिगदिसुकंमृतकंवापतेततः किंकार्यमितिचेत्ब्रूमः शाट्यायनिः समतिक्रांतमर्यादःकालोयदिभवेत्तदा॥ ब्राह्मणस्यमुखेध्येवसर्व
मेतद्भविष्यतीति ॥ ७४ ॥ वृद्धवसिष्ठोपि सूतकान्तेसूतकंचेन्मृतकंवाभविष्यति ॥ तदाब्राह्मणहस्तेनकार्यमित्येवनिर्णयइति ॥ ७५ ॥ विस्तरोन्यत्रमृग्यइति

कादिगुणविशिष्टवत एकादश्यांशुक्लपक्षमाविसंस्कृतायादि ॥ उपवासेनितफलायोगदानादिसमवेइति ॥८३॥ एतावताव्यवहारिणोकमत्रसौयतामिति विवक्षा
यांसंवत्सरेतिसृणामेकादशोनांप्राधान्यांविवक्षितं यदाहमरीचिः प्रथमैकादशीयत्रबोधनैकादशीतथा ॥ भीमस्यैकादशीयत्रवत्सरेषुविशिष्यतइति ॥८४॥
तन्मध्येतिसृणांकेनहरितोषणामितिविवक्षायां पैठीनसिराह शयनेजागरंकुर्याद्बोधनेदीपमुत्सृजेत् ॥ भीमेतूपवसेदेववत्सरैकादशीफलमिति ॥८५॥ नन्व-
स्याएकादश्याःउद्यापनविधिः कीदृक्प्रकारइत्यपेक्षायांस्मार्तैकादशीवैष्णवैकादशीतिद्विविधापतति यदुक्तंब्रह्मवैवर्ते रुक्मांगदमतंयत्रवैष्णवैकादशीभवेत् ॥
अंबरीषमतंयत्रसास्मार्तैकादशीस्मृतेति ॥८६॥ उभयोरपिपृथगेवव्यवस्थावैष्णवैकादश्यामिदंविधानंबोध्यं यदाहात्रिः द्वादशाक्षरमंत्रेणसमिदाज्यचरून्हुनेत्
॥ विष्णुगायत्र्याचैवसातिलव्रीहिहोमकामिति ॥८७॥ कात्यायनः कदलीनारिकेलानांशकलैर्जुहुयात्ततः ॥ मूलमंत्रेणचतथागोदानंचसमाचरेदिति ॥८८॥ २५
स्मार्तैकादश्यामयंविशेषः गौतमः पंचाक्षरेणमंत्रेणसमिदाज्यचरून्हुनेत् ॥ रुद्रगायत्र्याचैवबिल्वपत्रंहुनेत्ततइति ॥८९॥ मांडव्यः कदलीशकलंचैवकत्रुद्राये-
मंत्रतः ॥ तिलव्रीहीन्हुनेत्तत्रत्वहंरुद्रेतिमंत्रतइति ॥९०॥ विस्तरस्तुहेमाद्रौव्रतकांडेस्थितइत्युपरम्यते यदत्रद्वादशीनिर्णयेतदेकादश्यनुसंधानेनसिंहपुच्छाव-
लोकनन्यायमाहुः तेनद्वादश्याःसामान्यतोनिर्णयोजातप्रायएवेतिसिद्धं तथाप्यत्रविशेषमधिकृत्यव्यवह्रियते वृद्धयाज्ञवल्क्यः दशम्यामेकभुक्तस्यादेकाद-

श्यामुपोषणं ॥ द्वादश्यामप्येकभुक्तंदिनत्रयमिदंस्मृतमिति ॥९१॥ अत्रहिदिनत्रयमिदंस्मृतमित्युक्तंदशमीभेदस्तुप्रागेवनिर्णीतः द्वादशीविषयेद्वैविध्यं
विशेषविषयःप्रवर्तते वत्सरमधिकृत्यैवप्रवर्तमानत्वात् तत्राहिचातुर्मास्यमध्यतोविधिः तयोरेकतराआषाढकार्तिकमध्यवर्तिश्रावणशुक्लद्वादशीतिव्यवह्रियते
वामनपुराणे श्रावणेमासिसंप्राप्तेद्वादशीश्रवणर्क्षभे ॥ प्रादुर्बभूवचादित्यांभगवान्कमलेक्षणइति ॥९२॥ बृहन्नारदीये आदित्यांवरदानेनजातोनारायणस्वयं ॥
श्रावणेशुक्लपक्षस्यद्वादश्यांवामनाकृतिरिति ॥९३॥ तदेतद्वचनद्वयेनश्रवणद्वादश्यांप्रतीतायांतद्दिनएवदध्योदनदानमुक्तंविष्णुधर्मोत्तरे दध्योदनंप्रदातव्यंवा
मनस्यप्रतुष्टये ॥ सदक्षिणंचसफलंसपत्रंवायनंचरेदिति ॥९४॥ तदन्यतराद्वादशीविष्णूद्यापनद्वादशीतिकार्तिक्यांप्रतीयते हारितः कार्तिकस्यशुक्लपक्षस्य
प्रबुद्धोसौरमापतिः द्वादश्यांयतएवातउत्थानद्वादशीभवेदिति ॥९५॥ भविष्योत्तरपुराणे उत्थानदादशीयत्रतुलसींतत्रपूजयेत् ॥ हरिणासार्धमेवात्रयोश्वमे
धफलंलभेदिति ॥९६॥ वृद्धवासिष्ठः वृंदावनेतुतुलसींधात्रीमपिसमन्विता ॥ तेत्रिणोपूजयेन्नूनंसतुपूजाफलंलभेदिति ॥९७॥ कात्यायनः सरस्वतीचल-
क्ष्मीश्चपार्वतीचयथाक्रमं ॥ बीजंददुर्यतोस्माद्धित्रयाणामपिपूजनमिति ॥९८॥ अत्राहित्रयाणामपिसामान्याकारेणपूजाप्रसक्तौहरेरत्यादपरिहारिण्याः तुलस्याएव
विशेषोवर्गतंव्यः यदुक्तंपाद्मपुराणे यथा[illegible]वनेप्रीतिस्तुलस्याममपूजने ॥ तथाजपाद्यनुष्ठानेसंतोषोममनास्तिहीति ॥९९॥ यद्यपित्रयाणामपिसामान्यतो

चिंत्यते कात्यायनः क्षौरंचमृत्तिकास्नानंतथापुण्याहवाचनं ॥ सर्वव्रतेषुसामान्यंविशेषोन्यत्रमृग्यतामिति ॥१०६॥ पैठीनसिः गोदानंवायनंदानंब्राह्मणानांतुभो
जनं ॥ सर्वव्रतेषुसामान्यंनात्रकार्याविचारणेति ॥१०७॥ गोदानप्रदानेविशेषविधिमाह गालवः ब्राह्मणंसमलंकृत्यवस्त्रालंकारभूषणैः ॥ कुंडलैःकंचुकाद्यैश्च
गांदद्यात्प्रयत्नतइति ॥१०८॥ गांस्वरूपशांतिपर्वण्याभिहितं स्वर्णशृंगींरौप्यखुरांसवत्सांदक्षिणान्वितां ॥ गोदद्यातिनरोभक्त्यास्वर्गलोकंसमश्नुतेति ॥१०९॥
गोदानमंत्रस्तत्रैवाभिहितः यज्ञसाधनभूतायाविश्वस्याघप्रणाशिनी ॥ विश्वरूपधरोदेवःप्रीयतामनयागवेति ॥११०॥ तीर्थप्रोक्षणमंत्रोपिसर्वसाधारणएव
यदाहगार्ग्यः समुद्रज्येष्ठामंत्रेणतीर्थस्नानंसमाचरेत् ॥ सर्वव्रतेष्वेकाविधिर्भावितानात्रसंशयइति ॥१११॥ नन्वत्रविशेषविधयाकोयमवशिष्यतइतिचेत् ब्रूमः
व्यासः होममंत्रोद्रव्यराशिःसर्वत्रैवपृथक्पृथक ॥ व्रतेषुविनियुज्यंतेसर्वमन्यद्यथोदितमिति ॥११२॥ यद्व्रतविशेषविधानंकिमेतेनप्रयोजनमिति तत्र नैवव्यव
हारगम्यं वयमत्रसांप्रतंविस्तरभियाचनिरवकाशतांलभामहइतीतदिक आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये ॥ पूर्णःसप्तमउल्लासःकांडेनैमित्तिकेशुभः
॥११३॥ इतिश्रीआनंदगिरिस्वामिकृतेस्मृतिसारसमुच्चये नैमित्तिककांडे सप्तमउल्लासः ॥

कमलाममलांवंदे कलिकल्मषहारिणीं ॥ सर्वाधारां सर्वसौख्यदात्रीं लोकस्यमातरं ॥ १ ॥ यदत्रसर्वव्रतसाधारणानिर्णयोयद्यपिपूर्वंव्याख्यातस्तथाप्युत्सृष्टवि-
धयासंकष्टचतुर्थीनिर्णीयते देवलः वैशाखेमासिशुक्लस्यपक्षस्यचचतुर्थिका ॥ संकष्टकचतुर्थीयंविघ्नराजस्यतोषकृदिति ॥ २ ॥ योयमत्रावतारोमहागणपतेः
संकष्टकचतुर्थ्यांप्रतीतः ब्रह्मांडपुराणे पार्श्वं गिमुनेर्दत्वामहागणपतिर्महान् ॥ वरंतत्पुत्रतांप्राप्तःसंकष्टकचतुर्थिकेति ॥ ३ ॥ ननुसंकष्टकशब्दः योगोवारूढो
वायोगोयंविवक्षितः विघ्नासुरहननाभिप्रायत्वात् यदुक्तंगणेशपुराणे महाविघ्नासुरोनामपुरामूषिकरूपधृक् ॥ बबाधेसौमुनिगणान्हतवान्विघ्नराड्यतइति ॥ ४ ॥
तदेतैर्वचनैःसंकष्टचतुर्थ्यास्तिथिस्वरूपेविविक्तेतदधुनातद्व्याप्तिमुखेननिर्णयोव्यवह्रीयते साकियन्नाडियुक्तापरिग्राह्येति सायाह्नव्यापिनीतिसुव्यक्तं यदाहऋ-
ष्यश्रृंगः सायाह्नव्यापिनीग्राह्यासंकष्टकचतुर्थिका ॥ नक्तेतथैवोपवासेकीर्त्यतेनैकभुक्ततेति ॥ ५ ॥ एतेनचतुर्विंशतिनाड्याउत्तरंपूर्वस्मिन्परस्मिन्वादिवसेग्राह्यतां
गोक्रियते यदाहगार्ग्यः पूर्वस्मिन्वापरस्मिन्वासंकष्टकचतुर्थिका ॥ सायाह्नव्यापिनीग्राह्याचाधिकव्याप्तिरिष्यतइति ॥ ६ ॥ शाट्यायनोपि सायाह्नव्यापिनीसे
यंसंकष्टकचतुर्थिका ॥ चतुर्विंशतिनाडिभ्यःपरांविज्ञाययेतरामिति ॥ ७ ॥ अत्राहियोगविशेषोमदनरत्नेनिरूपितः अंगारकेणवारेणयुक्तायातुचतुर्थिका ॥ संक
ष्टकचतुर्थीसापुण्ययोगातिशायिनीति ॥ ८ ॥ गालवोपि कुजवासरसंयुक्तासंकष्टकचतुर्थिका ॥ कदाचित्पुण्ययोगेनलभ्यतेनात्रसंशयइति ॥ ९ ॥ केचिदाहुः
यदाकदाप्यंगारकयोगेसंकष्टकचतुर्थीति तद्देशांतरविषयं पैठीनसिः सौराष्ट्रेचमहाराष्ट्रेगुर्जरेमाळवेतथा ॥ अंगारकचतुर्थीयंसर्वकालेषुपूज्यतइति ॥ १० ॥
तदनेनवचनेनसर्वदेशप्रसिद्धभावतयापुराणवचनप्रसक्त्याच वैशाशुक्लचतुर्थ्येवगणपत्यवतारदिनमिति तद्योगेतदयोगेचसंकष्टचतुर्थीतिसिद्धं एतदाहरत्नः
यातिथिःसर्वदेशेषुनैवश्लाघयतेतरां ॥ प्रामाण्यसंदेहतयाव्यवस्थायुज्यतेतरामिति ॥ ११ ॥ किमत्रविशेषगवेषणयेतिविद्वद्भिरादर्तव्यमितिदिक् संकष्टचतुर्थ्या
मवशिष्टायांनिर्णीतायांतदनुबंधवशेनक्षत्रियेषुरूढावर्तमानयाललितापंचम्यानिर्णयोव्याख्यायते कालिकापुराणे उत्पन्नाललितादेविकेरळेभूसुरोत्तमः निज
घानमहादैत्यंद्वितीयंमहिषासुरमिति ॥ १२ ॥ तदनेनवचनेनतद्दिनंकिमिदमितिननिर्धारितं वागीश्वरीसंहितायांविशेषः आश्वयुक्शुक्लपक्षस्यपंचमीललिता-
मता ॥ तस्यांजज्ञेमहादेविललितालोकसुंदरीति ॥ १३ ॥ तदनेनवचनेन निर्धारितायांतिथौतस्यांविधीयमानायाः पूजायाःतिथौकाहशीव्याप्तिरितिविवक्षा
यांभगवान्मंडनमुनिराह रात्रौयामेव्यतीतेतुद्वितायायातुनाडिका ॥ ललितापूजयेत्तत्रक्षत्रियैर्भाग्यलिप्सुभिरिति ॥ १४ ॥ अत्रहिक्षत्रियैर्भाग्यलिप्सुभिरित्यु-

[illegible] ॥१९॥ [illegible] ॥२०॥ [illegible]

व्रतोतेषुतेषांयदेकादश्यादुपस्थितिः तदाएकभुक्तादेर्निराशिष्यमाणतयाव्रतभंगः तदेताभ्यांवचनाभ्यांनास्तीतिव्यवस्थापितं तथाचसामान्यतःप्राप्तस्यसोमवासरैकभुक्तस्याविशेषतःप्राप्तस्यैकादश्युपवासस्यविशेषएकादश्युपवासएवमुख्यतमोऽव्यवहृतः एवंसतिमुख्यत्वांगीकारेपिसोमवासरैकभुक्तफलंव्यर्थमितिचेन्न एकभुक्तनक्तापेक्षयाउपवासस्यैवप्राबल्यात् यदाहांगिराः उपवासेप्रसक्तेतुएकभुक्तंयदापतेत् ॥नक्तंवानैवदोषोस्तितस्मात्कुर्यादुपोषणमिति ॥२१॥ दोषाभावेपि फलहानिराद्रियतइतिचेन्न विशेषकरणेतदवांतरकालेनिफलस्यापिमहापर्वंतर्भावात् अन्यथाप्रयाजाद्यंगानांदर्शपूर्णमासप्रतिफलानुद्देशापत्तेः एतदाहकात्यायनः शिवरात्रौचतुर्थ्यांवाकृष्णाष्टम्यामुपस्थितौ ॥ सोमवासरमुख्यानामेकभुक्तंनदुष्यतीति ॥२२॥ तदनेनवचनेनएकभुक्तस्यमहोपवासमध्येहानिर्निरस्तोवगंतव्यः फलमप्याहदेवलः एकभुक्तंचनक्तंचाप्युपवासतिथौभवेत् ॥ एकभुक्तफलंतत्राप्युपवासाद्ध्रुवंभवेदिति ॥२३॥ पैठीनसिः उपवासमतिक्रम्यनक्तंवाप्येकभुक्तकं ॥ यदाचरतिमूढात्मारौरवंनरकंव्रजेदिति ॥२४॥ तदेतेनवचनेनफलस्याभ्युच्चयप्रसक्त्यातितद्व्रतविषयहानिरन्यदिसामानाधिकरण्यमुपलभ्यनभवत्येवेतिसिद्धं यदाहरुद्रः महाव्रतेकृतेनूनमुपसर्जनकंव्रतं ॥ संपूर्णमेवभवातितस्मादुभयसंमतामिति ॥२५॥ एतावद्व्यवहारेणव्रतसांकर्यप्रसंगः केनापिसाधयितुमशक्यइतियुक्तमुत्पश्यामः आषाढादिषुचतुर्षुमासेषुप्रतीतानांकेषांचित्तिथीनांकालविशेषप्रतिपत्तिःप्राङ्निरूपिता अनुनातत्रव्रतानुगुण्यवत

तिथीनांस्वरूपंनिरूप्यते लौगाक्षिः श्रावणेकृष्णपक्षस्यतिथिर्जन्माष्टमीतिथिः ॥ तस्यांव्रतंप्रकर्तव्यंविष्णुलोकजिगीषुभिरिति ॥२६॥ अत्रहिव्रतंप्रकर्तव्यमित्युक्तंतत्रकोविशेषइत्यपेक्षायामधुनातदुद्यापनविधिर्बोधव्यः यदाहपैठीनसिः कृष्णाष्टमीव्रतंकृत्वाद्वादशेवत्सरेसति ॥ उद्यापनंप्रकर्तव्यंव्रतस्यपरिपूर्तयइति ॥२७॥ विष्णुवृद्धः द्वादशाक्षरमंत्रेणसमिदाज्यचरून्हुनेत् ॥ सहस्रशीर्षेतिपुनःपरमान्नंतुहोमयेदिति ॥२८॥ तथाचव्रतस्वरूपसिद्धौविशेषोवगतएवेति प्रोष्ठपद्यांत्रीणिव्रतानिप्रतीतानितानिकानीत्यपेक्षायां विनायकचतुर्थीततोमुनिपंचमीततः केदाराष्टमीतिमहाचतुर्थीव्रतोद्यापनंतत्रप्रथमोपस्थितंभवति तस्यैवविशेषविधिः प्रथमनुष्ठेयः तथाहिमरीचिः गणानांत्वेतिमंत्रेणसमिदाज्यचरून्हुनेत् ॥ ततोगणेशगायत्र्यासक्षीरंदूर्वयाहुनेदिति ॥२९॥ मुनिपंचम्यांकार्यमेतदुपस्थितंबोध्यं यदाहात्रिः प्राप्तायांमुनिपंचम्यांउद्यापनविधिस्थितः ॥ यथायोगंप्रकुर्वीतव्रतंसंपूर्णतामियादिति ॥३०॥ तत्रद्रव्यमंत्रप्रकारश्चेत्थं विश्वावसुः पालाशसमिधंतन्त्रचरुमाज्यंहुनेत्ततः ॥ देवाएतस्यांमंत्रेणसप्तर्षीणांपृथक्पृथगिति ॥३१॥ वृद्धमनुः सप्तर्षीणांतुहोमोस्मिन्नाहुतिःपृथगेवतु ॥ तिलैर्धान्यैःसप्तभिश्चयथायोगंहुनेत्ततइति ॥३२॥ सप्तधान्यस्वरूपं[illegible]र्णयामृतेदर्शितं श्यामाकश्चैवगोमश्चचणकोव्रीहिरेवतु ॥ सप्तधान्यानिनीवारःप्रियंगुर्वीवकस्तथे-

यदाहबादरायणः यानियानिव्रतानीहतत्तन्मासेप्रशस्यते ॥ तत्तद्दिनेत्वलाभेचमाघकार्तिकराधयोरिति ॥४२॥ राधोवैशाखमासः तथाचतदेतद्वचनानुकू-
लेननिर्णयोगंतव्यइतिदिक तदत्रकेषांचिद्व्रतानांव्रतकांडेनिरूपणीयतयाधर्ममात्रंप्रतिपादितं तत्तेषस्यतद्दाकरेबोध्यत्वेननविस्तरभीसंगच्छाति तदन्यथाधर्मशा
स्त्रत्वेसमुच्चयाविरुद्धमेवेति अधुनाउपवासमुद्दिश्यपारणानिर्णीयते व्यासः उपवासस्तुपूर्वेद्युःपारणाप्रातरेवतु ॥ एकादश्यामयंन्यायस्तदन्यत्रोपयुज्यतइति
॥४३॥ तदनेनवचनेनपारणाप्रातरेवेतिनिर्धार्यते ननुकृष्णजन्माष्टमीशिवरात्र्योर्नक्षत्रांतिथ्यंतेचपारणाकुर्यादिति कात्यायनेनोक्तं शिवरात्रौप्रकुर्वीततिथेरं-
तेचपारणं ॥ कृष्णाष्टम्यांप्रकुर्वीतनक्षत्रांतेचपारणामिति ॥४४॥ तदेतद्वचनस्यकागतिरितिचेन्न तद्वचनस्यप्रातरतिक्रमात्पूर्वनिवृत्तेः यदाहगार्ग्यः प्रातःका-
लेयदानास्तितिथिरंतेचपारणा ॥ प्रातःकालेयदानास्तिनक्षत्रांतेचपारणेति ॥४५॥ यदेतद्वचनेनतत्कालव्यापित्वंनिरस्यतइतिविज्ञेयं एकादश्यास्तुल्यतोप-
योगित्वात् एवंसोमवासराममावास्ययोरुपवासेमुनिपंचम्याद्युपवासेप्ययमेव्यवस्था यदाहपैठीनसिः अमावास्योपवासेपिसोमवासरएववा ॥ तथैवमुनिपं
चम्यांप्रातरेवतुपारणेति ॥४६॥ तथाचतिथिनक्षत्रांतपारायणायाःसावकाशतयातत्कालव्यापित्वाभावोनिश्चीयते यदुक्तंरल्लेन यामद्वयादुपरिचेत्तत्काले
पारणास्मृता ॥ यामत्रयादुपरिचेत्प्रातरेवाहिपारणेति ॥४७॥ तथाचास्यवचतस्यकागतिरितिचेन्न तदेतद्वचनस्यसार्तातिरिक्ताविषयत्वात् अतएवव्यासे
नायमेवार्थोनिर्धारितः वचनांतरंच तिथ्यंतेपारणांकुर्यान्नक्षत्रांतेचपारणां ॥ प्रातःकालेयदायोगोनचेत्प्रातर्विशिष्यतइति ॥४८॥ यद्यपिपारणास्मार्तैरपिति
थ्यंतनक्षत्रांतयोःकर्तुंशक्यातथापिसावधानधियारात्रावेवतिथिनक्षत्रयोर्निर्गमे तदनवकाशसंभवात् अतएवाहगौतमः तिथ्यंतेपारणासेयंनक्षत्रांतेपिपारणा
॥ शापदग्धैःपरिग्राह्यास्मार्तैर्नैवकदाचनेति ॥४९॥ शापदग्धवैष्णवाशैवाःपाषंडिनइत्यर्थः कुतएतन्निर्धार्यतइतिचेद्ब्रूमः लोमशः दधीचिगौतमाभ्यांचभृगु-
णायेपराकृताः ॥ शापदग्धाइमेज्ञेयास्तएवाशिवनिंदकाइति ॥५०॥ तथाचसर्वेषूपवासेषुवैष्णवशैवपाषंड्यतिरिक्तैःप्रातःपारणाकार्येतिविवेकः अन्यथाक्वासि
श्चिद्वत्सरेकृष्णजन्माष्टम्यांरोहिण्यभावेशिवरात्रौशिवयोगाभावे चातिथिमुख्यतायांवैयर्थ्यापत्तेरितिदिक केषुचिद्देशेषुपक्षव्रतमामनंतिमुनयः तदत्रनिर्णीयते
लोगाक्षिः पक्षव्रतंयःकुरुतेसर्वैरप्युपपातकैः ॥ विमुक्तःशिवसायुज्यंलभतेनात्रसंशयइति ॥५१॥ शंकरसंहितायां पुरापैलमुनिःकृत्वापक्षव्रतमिदंध्रुवं ॥ स-
प्राप्यशिवसायुज्यंतत्रैवविलयंययाविति ॥५२॥ अत्राहिपक्षव्रतंकार्यमितिविधिरुन्नीयते तत्स्वरूपंकीदृशमित्यपेक्षायांशाट्यायनिराह आदावंतेचभोक्तव्यमेक

भुक्तंचनक्तकं ॥ उपवासंचरेन्मध्येपक्षव्रतमिदंस्मृतमिति ॥५०॥ पैठीनसिः नंदाभद्राचविजयारिक्तापूर्णेतिपंचदौ ॥ तिथिरुद्दिश्यतेसेयंयेषुपक्षव्रतंभवेदिति ॥५१॥ गालवः पक्षव्रतंत्रिवारेणपक्षस्यैवोपयुज्यते ॥ तिथिषुप्रतिपन्मुख्येष्वेषधर्मःसनातनइति ॥५२॥ तदेतैर्वचनैःपक्षव्रतस्वरूपसिद्धौकस्मिन्मासएवत-दुपपद्यतइतिविवक्षायांश्रावणमासःप्रसक्तः यदाहवृद्धवसिष्ठः पक्षव्रतंप्रकर्तव्यंश्रावणेमासिभूसुरैः ॥ विशेषात्सर्वपापौघैर्मुच्यतेनात्रसंशयइति ॥५३॥ ननु द्वादशसुमासेषुप्रतीतेषुकिंश्रावणमासेप्रसज्यतइतिचेन्न विष्णोःशयनमासतयातत्प्रीतिदायकत्वेनतस्यैवफलाभ्युच्चयापत्तेः यदाहांगिराः शयनेषुचसर्वेषु मासेषुश्रावणोवरः ॥ पक्षव्रतंप्रकुर्वीततत्रैवद्विजसत्तमैरिति ॥५४॥ नन्वस्यव्रतस्योद्यापनविधिःकीदृशइत्यपेक्षायाभविष्यत्पुराणेश्रूयते प्रवःपांसोतिमंत्रेणस-मिदाज्यचरून्हुनेत् ॥ अष्टाक्षयांचपयसाहुनेत्तद्व्रतसिद्धयइति ॥५५॥ नन्विदंकस्मिन्देशेप्रतीतइत्यपेक्षायांकण्वमुनिराह गांधारेकेकयेदेशेकर्नाटेद्राविडेतथा॥ शेषादेवप्रकुर्वीतब्राह्मणोक्षत्रियोविशइति ॥५६॥ ननुतद्देशसंभवानामेवव्रतकीर्तनेनकस्यचिद्वाक्किमतोव्रतकरणंव्यर्थमितिचेन्न सामान्यतस्तत्प्रतीतौविशेष व्यवहारासिद्धेः एतदाहरलः देशांतरेप्रतीतस्यधर्मस्यापिक्वाचित्क्वाचित् ॥ गरिष्ठेबाधकाभावादाचारंविश्वसेत्ततइति ॥५७॥ विस्तरोन्यत्रमृग्यः यदितःप्राक् श्रावणमासमधिकृत्यपक्षव्रतंनिरूपितं तदत्रविशेषगवेषणयापुराणश्रवणेविशेषवत्तानिर्णीयते यदाहवसिष्ठः पुराणश्रवणंकार्यंसिंहमासेप्रसज्यते ॥ श्रावणेसं प्रसक्तोयंसिंहमासःशुभावहइति ॥५८॥ गोभिलः कृतेपुराणश्रवणेसिंहमासेशुभावहे ॥ जपहोमादिकंसर्ववत्सरेषुप्रसिध्यतीति ॥५९॥ तदेताभ्यांवचना-भ्यांपुराणश्रवणस्यसिंहमासेकार्यताप्रसक्तौकथमत्रैवाधिक्यमितिचिंत्यते विष्णुसंहितायां सिंहसंक्रमणेकालेभगवान्हरिरव्ययः ॥ मधुकैटभसंहारंचक्रेकाल शुभावहइति ॥६०॥ सनत्कुमारसंहितायां हतौयत्रैवदिवसेमधुकैटभराक्षसौ ॥ सिंहमाससइत्युक्तःसंक्रमेसमुपस्थितइति ॥६१॥ तथाहिसंक्रमेसमुपस्थितइ-त्युक्त्यासंहारकालोयंसंक्रमणकालएवेतिव्यवहर्तव्यः तथाचसतितन्निधनमात्रेणपुराणश्रवणंकथंयुज्यतइतिचेद्ब्रूमः कालिकापुराणे मधुकैटभभेदोभिर्विष्णु-नाकलिपतामही ॥ यस्मादशुचितांप्राप्तापुण्यश्रवणमीर्यतइति ॥६२॥ तदनेनवचनेनमेदिन्याराक्षसांगतयातत्राशुचित्वंप्रसक्तंतस्मात्तन्मासिपुराणश्रवणेनस-दोषोनिरस्यते यदाहपैठीनसिः आबालवृद्धैःश्रोतव्यंसिंहमासेपुराणकं ॥ आसुरांगभवोदोषस्तस्मादेवनिरस्यतइति ॥६३॥ गालवोपि जपहोमादिकंसर्वम-सुरेर्न्यस्यतेतरां ॥ पुराणश्रवणंतस्मात्तस्मिन्मासिविधीयतइति ॥६४॥ ननुपुराणश्रवणंसिंहमासेकर्तव्यमितिप्रतिपन्नं यदिनिशीथसमयेसंक्रमोजातस्तदापुरा

तां व्यासमूर्तेनमस्तुभ्यंपौराणिकनमोस्तुते ॥ सकुटुंबपावयस्वपुराणश्रवणादिहेति ॥७१॥ एतावताव्यवहारसिद्धौ सिंहमासिमासांतरेपुराणश्रवणाभावे-
पिपुराणश्रवणंकार्यमित्येवयस्तुगतिः अथप्रकीर्णव्यवहारेणश्रावणमासमनुरुध्यविशेषविधेत्सयाकिमवशिष्टमित्यपेक्षायांपवित्रारोपणमापततीति गौतमः श्राव
णेमासिकुर्वीतपवित्रारोपणंबुधः ॥ चतुर्दश्यांशिवःसाक्षात्तुष्यत्येवनसंशयइति ॥७२॥ ननुकोयंपवित्रशब्दतःकिंतस्यारोपणमितिविवक्षायांवातुलागमेप्रती-
यते पवित्रोनामनागेंद्रस्तपःकृत्वामहत्तरं ॥ शिवस्यकंठाभरणस्थानंलेभेप्रयत्नतइति ॥७३॥ शिवचंद्रिकायां भुजंगराजःसहसागिरीशं । प्रणम्यरोमांचसम-
न्वितात्मा ॥ तदीयकंठाभरणंस्वरूपं । वरंययाचेवरदंप्रसन्नमिति ॥७४॥ तदर्चनाभावोप्रत्यवायोपितत्रैवश्रूयते समर्चयंतिप्रतिवत्सरंचये ।नंदेशूकाधिपते [२९]
भवंतं ॥ तैर्यत्कृतंकर्मतदीयमस्तु । फलंतवेत्येवमवोचदीशइति ॥७५॥ तदेतैर्वचनैःपवित्रारोपणंकार्यमितिप्रसक्तं कस्मिन्दिनेकस्मिन्मासीतिनप्रतिपन्नंतर्हि
तत्तावदुच्यतामितिचेद्ब्रूमः हारीतः श्रावणेतुचतुर्दश्यांशुक्लपक्षेयदातिथिः ॥ पवित्रारोपणंकार्यंशिवस्येतिविनिश्चयइति ॥७६॥ मांडव्यः शुक्लपक्षेप्रकर्तव्यं
पवित्रारोपणंबुधैः ॥ श्रावणेमासितन्नूनंचतुर्दश्यामसंशयइति ॥७७॥ तदेताभ्यांवचनाभ्यांशिवस्यैवपवित्रारोपणमितिप्रसक्तंतदितरेषांदेवानांकथंयुज्यतइ
तिसंशयेप्रसक्तेसमाधानंब्रूमः कात्यायनः पवित्रारोपणंसर्वदैवतेषुप्रशस्यते शिवस्याज्ञाप्रसक्तत्वाद्यासेनांगस्यतस्यहीति ॥७८॥ कारणागमे पवित्रायवरंद-

त्वाव्यासितस्यैवयोददौ ॥ सर्वदैवतवृंदेषुपवित्रारोपणंददाविति ॥७९॥ कामिके शृणुदेविप्रवक्ष्यामिपवित्रारोपणंमम ॥ सर्वदेवेषुकर्तव्यंममैवप्रीतिदायक-
मिति ॥८०॥ ननुपवित्रारोपणंसर्वदैवतेषुसामान्यंप्रतीतंतद्दिनएवसर्वेषांकार्यमितिचेद्ब्रूमः पराशरः शिवस्यविघ्नराजस्यस्कंदस्यापिप्रशस्यते ॥ चतुर्दश्यां
पौर्णमास्यांदुर्गायाइतिनिश्चयइति ॥८१॥ पैठीनसिरपि रवेर्विष्णोश्चदुर्गायाःपौर्णमास्यांप्रकुर्वते ॥ पवित्रारोपणंपुण्यंचतुर्दश्यांशिवस्येतीति ॥८२॥ तथा
हिसर्वदैवतेषुपवित्रारोपणविधौशिवस्यमहागणपतेःस्कंदस्यचतुर्दशी भास्करस्यमहाविष्णोर्दुर्गायाःपौर्णमासीतिनिर्णयोवधारितः ननुपवित्रारोपणविधौचतु-
र्दशीपौर्णमास्योर्वाकियत्कालीपरिग्राह्येतिविप्रसंशये बाभ्रायणआह चतुर्दशीपरिग्राह्यापवित्रारोपणविधौ ॥ मुहूर्तत्रितयंनूनंशिवस्येतिविनिश्चयइति ॥८३॥
भट्टभास्करीयेप्युक्तं स्कंदस्यविघ्नराजस्यमहेशस्यचतुर्दशी ॥ मुहूर्तत्रितयंनूनंपरिग्राह्यानसंशयइति ॥८४॥ कालिकापुराणे दुर्गायाश्चमहाविष्णोःपवित्रारो
पणेस्मृते ॥ रवेर्भुक्त्याग्राह्याप्रतिपत्पौर्णमासीनिसंशयइति ॥८५॥ विस्तरस्तुतत्तदागमेषुप्रतीयतइत्युपरम्यते उभयप्रदोषमुद्दिश्यपक्षयोःप्रसक्तौव्रतोद्यापनंनिर्णी
यते शिवरहस्ये त्रयोदश्यांनक्तभोज्यापक्षयोरुभयोरपि ॥ व्रतस्योद्यापनंकुर्यात्ससमेत्वथवत्सरइति ॥८६॥ भविष्यत्पुराणेपि सोमवासरयोगेवामंदवासर

हिस्यत्रयाणांप्राधान्यंविवक्षितंतेकार्तिकमाघवैशाखाःसार्वजन्याः यदाहकात्यायनः वैशाखेकार्तिकेमाघेविशेषाद्व्रतमिष्यते ॥ व्रतस्योद्यापनंकार्यंव्रतस्यपारिपूर्तयइति ॥९४॥ त्रिकांडमंडनः कार्तिकेदीपदानंस्यान्माघेस्नानंविशिष्यते ॥ पानीयदानंवैशाखेस्वर्गसोपानपद्धतिरिति ॥९५॥ तदनेनवचनेनत्रयाणांप्राधान्येप्रतीतेत्रिषुसर्वमपिकार्यमेवेतिसिद्धं पैठीनसिः माघेचकार्तिकेमासिवैशाखेस्नानमिष्यते ॥ दानंचसर्वथाकार्यंव्रतस्यपारिपूर्तयइति ॥९६॥ यदत्रस्नानमात्रंविशेषविधिस्तयोरितरकर्मणोरपियुक्तताप्रतीयते तथाहिप्रातःस्नानंसर्वत्रयुक्तमेवसर्वकर्मणांयोग्यताधिकारेविनियोगसंभवात् दानंक्वचित्कंनिर्धनस्यतसंभवात् यदाहबादरायणः सामर्थ्याभवतोदानेस्नानमेवविशिष्यते ॥ तत्कालीनंतुयद्दानंदातव्यमितिनिश्चयइति ॥९७॥ यद्यपिसामर्थ्याभावेदानमप्रतीतस्नानस्यसामानाधिकरण्यमाश्रित्यव्यवहर्तव्यंतथाचस्नानस्याविशेषावस्थायांप्रतीतायां स्वर्गसोपानपद्धतिरित्युक्त्याकरणीयताव्यवहारः ननु व्रतस्योद्यापनंचरेदित्युक्त प्रारंभावसानयोःस्वरूपंकीदृशमित्यपेक्षायां शाट्यायनिराह प्रारंभःप्रतितद्धेवसमाप्तिरमयासह ॥ प्रति वत्सरमेवं स्याद्व्रतस्योद्यापनंचरेदिति वृद्धमनुः नववत्सरपर्यंतंमासव्रतमिदंस्मृतं ॥ ततउद्यापनंकुर्याद्व्रतसाद्गुण्यकारणादिति ॥९८॥ व्रतेनियममाहमरीचिः एकभुक्तंतुकर्तव्यंपुराणश्रवणंतथा ॥ यथाशक्तोचदानंस्यात्सिद्धिर्मासव्रतस्यात्विति ॥९९॥ कार्तिकव्रतेतदुद्यापनविधिर्गौतमेनोक्तः प्रताद्विष्णुरितिप्रोक्तासमिदाज्यचरून्हुनेत् ॥ अष्टाक्षरेणमंत्रेण गोधूमंपायसंहुनेदिति ॥१००॥ माघमासव्रतोद्यापनविधिर्गार्ग्येणोक्तः यथान्नोमित्रमंत्रेणसमिदादीन्हुनेत्पृथक् ॥ तिलव्रीहीन्सगोधूमंरुद्रगायत्र्याहुनेदिति ॥१०१॥ वैशाखस्योद्यापनविधिंवृद्धयाज्ञवल्क्यआह त्रीणिपदेतिमंत्रेणहुत्वातुसमिदादिकान् ॥ कूष्मांडंचगुडान्नंचद्वादशाक्षरतोहुनेदिति ॥ ॥१०२॥एवमेतैर्वचनैर्व्रतस्वरूपेनिर्णीते भाग्यतोविशेषदानमाहहेमाद्रिः वैशाखेगजदानंस्यात्कार्तिकेश्वःप्रदीयते ॥ शयनीयंचमाघेस्यान्मासव्रतफलंलभेदिति ॥१०३॥ गोदानवायनादिकंतूक्तमेवअत्रविशेषमाहहारितः शालग्रामंकार्तिकेतुवैशाखेविष्णुविग्रहं ॥ माघेतुशिवलिंगंचदत्वासायुज्यमश्नुतइति ॥१०४॥ तदेतैर्वचनैर्मासव्रतस्यव्याप्तिलाभइतिकिमतिविस्तरेण आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये ॥ पूर्णोप्यष्टमउल्लासःकांडेनैमित्तिकेशुभः ॥१०५॥ इतिश्रीआनंदगिरिस्वामिकृतस्मृतिसारसमुच्चये नैमित्तिककांडे अष्टमउल्लासः ॥

गिरींद्रतनयांवंदेस्वाच्चिदानंदरूपिणीं ॥ शिवस्यार्धासनगतांसर्वमंगलदायिनीं ॥१॥ अथात्रावाशिष्टतयापूर्वोक्तसोमावास्याव्रतस्यकोयमुद्यपनाविधिरिति
विक्षायांवचनमुखेनोदाह्रीयते गोभिलः सोमवासरसंयुक्ताप्यमावास्यायदाभवेत् ॥ तस्मिन्नेवदिनेकार्यंव्रतस्योद्यापनंबुधैरिति ॥२॥ विदूरथः अष्टमेवत्सरे
कार्यममावास्याव्रतंशुभं ॥ सोमयुक्तंवनितयास्युद्यापनसमन्वितमिति ॥३॥ यदेताभ्यांवचनाभ्यांउद्यापनविधौप्रसक्तायांउद्यापनाविधिस्वरूपमाहविष्णुवृद्धः
स्नात्वाप्रत्यूषसमयेकृत्वाश्वत्थप्रदक्षिणं ॥ गृहंगत्वास्वपतिनासाकमुद्यापनंचरेदिति ॥४॥ गार्ग्योपि सोमयुक्ताप्यमावास्यायदुद्यापनकर्मणी ॥ संप्राप्याप्यष्ट-
मेवर्षेविधियुक्तंप्रकारयेदिति ॥५॥ अत्रहिविधिस्वरूपंस्मृतिपारिजातेउदाहृतं मंत्रोयंसमिदादेस्यात्प्रसोमासोमदच्युतः ॥ पायसंहरिमंत्रस्यहुनेदष्टोत्तरोम-
नुरिति ॥६॥ व्यासः शिवस्यपंचमूर्तीनांकलशान्विन्यसेपृथक ॥ लक्ष्मीनारायणंदेवंकलशेसंप्रपूजयेदिति ॥७॥ अत्रविशेषोवासिष्ठेनोक्तः स्वर्णकंचुकवस्त्रा
द्यैर्दंपतीपरिपूजयेत् ॥ अमावाजस्यमंत्रेणवायनंतुप्रदापयेदिति ॥८॥ वायनेविशेषमंत्रोब्रह्मांडपुराणउक्तः उमामहेश्वरोदेवोलक्ष्मीनारायणोविभुः ॥ व्रतेना-
नेनसुप्रीतौसौभाग्यंदिशतांममेति ॥९॥ अस्मिन्व्रतेचीर्णेसतिगोदानंविशेषविधिरितिस्मृतिरत्नाकरेउक्तं व्रतस्योद्यापनंयत्रसोमानावास्यपूर्तये ॥ गोदानंनि
यमेनैवदातव्यंनात्रसंशयइति ॥१०॥ यदत्रब्राह्मणभोजनादेकंप्रकृतोपयोगितयानिर्धार्यं यदाहदेवलः एकस्मिन्ब्राह्मणेभुक्तेकोटिब्राह्मणभोजनं ॥ भाग्यहीन-
स्यभवतितत्सत्वेतावताचरेदिति ॥११॥ तदनेनवचनेनब्राह्मणभोजनस्यस्वोकार्यतायांप्रतीतायांदंपत्योर्भोजननियमवत्तयाविधेर्यविष्णुपुराणे द्वौवात्रयोवादं
पत्योःसोमावास्यास्यकेव्रते ॥ भोजनीयाःप्रयत्नेनसौभाग्यंवनितालभेदिति ॥१२॥ भोजनांतेप्रार्थनामंत्रःसनत्कुमारसंहितायामुक्तः सर्वेविप्राःसुमंगल्योज-
न्मजन्मांतरेपिच ॥ सौभाग्यंमेदिशत्वद्यभवामिचसुमंगलीति ॥१३॥ ततोविप्राशिषोगृहीत्वाभुक्त्वाआदेहपातंव्रतमाचरेदितिविवेकः मध्येयद्युपघातस्तदो-
द्यापनविधिनाव्रतपरिपूर्तिरिति।सिद्धं यदाहदक्षः सौमंगल्यव्रतेह्यस्मिन्नुद्यापनविधौकृते ॥ व्रतभंगोनतत्रास्तिव्रतंकुर्यान्नसंशयइति ॥१४॥ पुराणदृष्ट्यान्य-
त्सर्वंविवेचनीयमितिदिक मासांतरेषुप्रतीताप्रतीतव्रतविषयेसंघातवत्तयाधुनानिर्णयोव्याख्यायते कात्यायनः मार्गशीर्षेतुपंचम्यांस्वर्णगौरीव्रतंशुभं ॥ कर्त-
मृषिभिर्दृष्टंयोषित्सौभाग्यवृद्धयइति ॥१५॥ पैठीनसिः योषित्सौभाग्यसिध्यर्थंस्वर्णगौरीव्रतंशुभं ॥ मार्गशीर्षेतुपंचम्यांशुक्लपक्षेप्रकारयेदिति ॥१६॥ साकि-
यन्नाडीपरदिनेव्रतमुद्दिपरिग्राह्योतिविधिसंशये लोगाक्षिराह मुहूर्तत्रयमुल्लंघ्यातिथिःपरदिनेयदि ॥ पंचमीतुपरेष्टाह्यास्वर्णगौरीव्रतेमतोति ॥१७॥ एतद्व्रतमु

मयात्वपूजिताधुना ॥२४॥ पुत्रान्देहिपशून्देहिसौमंगल्यंप्रयच्छमे ॥२५॥ हरितालिव्रतंनामआषाढशुक्लपंचम्यांप्रतीतं यदाहवृद्धमनुः आषाढशुक्लपंचम्यांह
रितालव्रतंशुभं ॥ कर्तव्यंशास्त्रदृष्टेनविधिनाभूसुरोत्तमैरिति ॥२६॥ तत्रतिथिव्यवस्थागार्ग्येणोक्तः अब्धिनाडीपरिग्राह्याहरितालेतुपंचमी ॥ उमामहेश्वरंत-
त्रसंपूज्येप्सितमाप्नुयादिति ॥२७॥ ज्येष्ठालक्ष्मीव्रतंत्रिकांडमंडनआह ज्येष्ठेतुकृष्णपक्षस्ययाभवेत्पंचमीमता ॥ ज्येष्ठालक्ष्मींससंपूज्यवांछितंलभतेनरः ॥२८॥
तत्पूजाकालंमंडनमुनिराह त्रिमुहूर्तात्परंस्नात्वावनिताभिःसमंततः ॥ गोष्ठान्मृदंसमानीयपरिपूज्याप्रयत्नतइति ॥२९॥ तेनकिंफलमितिविवक्षायांविदूरथ-
आह ज्येष्ठालक्ष्मींसुसंपूज्यदौर्भाग्यविनिवृत्तये ॥ पुत्रपश्वादिसंपत्तिलभतेनात्रसंशयइति ॥३०॥ विस्तरस्तुस्मृतितरंगिण्यांस्थितइतिदिक व्रतेषुसर्वत्रमहा
नवमीव्रतंजगद्विख्यातं तदुद्यापनविधिःकीदृशइतिगवेषणायांभट्टभास्करीयेव्यवस्थितः दुर्गाव्रतेषुसर्वत्रनवरात्रिव्रतंमहत् ॥ उद्यापनंप्रकर्तव्यंनवमेवत्सरेसती [३१]
ति ॥३१॥ नवमेवत्सरेसतीत्युक्त्यामहानवम्यामेवप्रतीयते यदाहकात्यायनः दिवसेषुनवस्वेवनक्तभोजनमाचरेत् ॥ दशमेदिवसेप्राप्तउद्यापनविधिंचरेदिति ॥
बौधायनोपि दशमेवत्सरेप्राप्तेउद्यापनविधिर्भवेत् ॥ दुर्गासंतुष्यतेयेनव्रतस्यास्यप्रभावतइति ॥३३॥ व्रतसिद्धिःकीदृशइतिविवक्षायांगौतमआह उषस्युत्था-
यसंकल्प्यस्नात्वानद्यांयथाविधि ॥ गृहमागत्ययत्नेनव्रतोद्यापनमाचरेदिति ॥३४॥ लोगाक्षिः द्रव्यैर्नवविधैरेवात्रहोतव्यंतुप्रयत्नतः ॥ दुर्गायामूलमंत्रेणसमिदा

दियथाक्रमामिति ॥३५॥ विशेषोवृद्धवसिष्ठेनोक्तः नवधाबाधनान्यत्रवस्त्रकंचुकभूषणैः ॥ भूषयित्वाप्रकर्तव्यान्येवंशास्त्रंयथाविधीति ॥३६॥ गोदानेविशेषः
हारीतः गोदानंनवधैवात्रमथवाषडिहेष्यते ॥ अथवात्रितयंदेयमितिशास्त्रस्यनिश्चयइति ॥३७॥ तदेतैर्वचनैर्व्रतस्वरूपसिद्धौकिमेतेनफलमुद्दिश्यतइतिचेत्ब्र-
मः रुद्रयामलतंत्रे नवरात्रिव्रतंकृत्वायदुद्यापनकृन्नरः ॥ अश्वमेधसहस्रस्यफलंप्राप्नोत्यसंशयइति ॥३८॥ कालिकापुराणेपि विधानेनविधायैवनवरात्रिव्रतंमहत्
॥ ऐहिकामुष्मिकान्कामान्लभतेनात्रसंशयइति ॥३९॥ यद्यपीदंकाम्यमतंभवतितथाप्युद्यापनंविनाफलोद्देशोननिश्चयतइतिशास्त्रंयथावदत्रेयं कालमनूद्यमा-
घमासिशुक्लपक्षस्यरथोत्सवारंभेनसप्तम्यादितोऽपूर्वपुत्रपौत्रपर्यंतंतथाहविधिमुद्दिश्यप्रतिपदिरथोत्सवदिनंनिर्णीतं ततोवशिष्टानांगणेशादिदैव-
तानांकस्मिन्कालेरथोत्सवइतिचिंत्यते सिद्धांतरत्नावल्यां शिवस्यादिप्रभावस्यस्कंदस्यचमहात्मनः ॥ दुर्गायाभैरवेश्चापिमहाविष्णोरथोत्सवइति ॥४०॥
अत्राहिशिवादीनांरथोत्सवविधौशिवस्कंदयोःप्राग्रथोत्सवव्यवहारोविज्ञातएव तदनेनाधारीणांदेवतानांरथोत्सवविधिर्निरूपणीयमितिप्रतिपन्नं तथासति-
महागणपतेःप्रधानत्वाद्रथोत्सवदिनंनिर्णीयते मरीचिः वैशाखेशुक्लपक्षस्यदैत्यौघसुरघर्घटौ ॥ चतुर्थ्यांनिहतौयस्मात्ताद्दिनेत्वारभेत्ररइति ॥४१॥ रथोत्सवद्व-
तिशेषः शारदातिलके वैशाखेशुक्लपक्षस्यचतुर्थ्यांतुरथोत्सवः ॥ विघ्नराजस्यनियतमारब्धस्याद्यथाविधिः ॥४२॥ आरंभादिनेपूर्वादिनसंस्पृष्टोयुज्यतेनवेतिसं-
शयेचतन्नाडीपरिग्राह्येति कामिकेप्रतीयते आरंभश्चेच्चतुर्थ्यांहिचतन्नाडीयादिस्थिता ॥ नचेत्पूर्वदिनंग्राह्यंरथोत्सवविधौवधैरिति ॥४३॥ तदनेनवचनेनगणप

जाननयोः पंचाहोत्सवोनियतः प्रथमंमहागणपतेर्निर्णीयते मकुटागमे प्रारंभस्तुचतुर्थ्यांस्यादुत्सवःपंचभिर्दिनैः ॥ रथोत्सवदिनेतत्रचतुर्नाडीवाशिष्यतइति
महाविष्णोरयंविशेषः विष्णुपुराणे पौर्णमास्यांकालनेमिंहतवान्हरिरव्ययः ॥ वैशाखतद्दिनेतस्माद्रथोत्सवमुदीर्यतइति ॥४८॥ तत्रप्रारंभविषयेतदवसानवि
षयेचकारणागमेव्यवहारोविज्ञायते आरंभेव्यवस्थानेपिदशनाडीविशिष्यते ॥ तिथेरत्रव्यवस्थेयंमहाविष्णोरथोत्सवइति ॥४९॥ अन्यत्सर्वंस्मृतिचंद्रिकायां
स्थितामितिदिक संवत्सरांतर्गतोत्सवमध्येकृष्णजन्माष्टमीदिनेनिर्णीतेतदपरदिनेदाधिशिक्योत्सवःकर्तव्यइतिस्मृतिपारिजातेउक्तं देशेग्रामेचनगरेदाधिशिक्यो
त्सवंचरेत् ॥ गवांराशिप्रवर्धंतशत्रवोविलयंययुरिति ॥५०॥ पैठीनसिः कालेकालेचकर्तव्योदाधिशिक्योत्सवोनरैः ॥ संपदःसर्वदेशेस्युर्यत्रकापिनसंशयेति
॥५१॥ ननुदाधिशिक्योत्सवसमन्वयःवैष्णवक्षेत्रेविष्णोरेवयुक्ततरःकिमितरक्षेत्रेष्वितरदेवतानामितिचेन्न जगत्क्षेमकरावतारतयाकृष्णस्यसर्वदेवैरपितदंगी-
कारात्अन्यथाविजयदशम्याः महेंद्रविजयदिनत्वेनसर्वदेवतास्थाइष्वनंगीकारापत्तेः यदाहलोगाक्षिः आंदोलिकायामारोप्यशिवादीनुत्सवात्मकान् ॥ देशे
ग्रामेचनगरेभ्रामयेयुरितस्ततइति ॥५२॥ कात्यायनः विष्णोर्महोत्सवःसोयंसर्वदेवमहोत्सवः ॥ दाधिशिक्योत्सवस्तस्माद्देशेग्रामेविशिष्यतइति ॥५३॥ तत्र
नवमीदिनेदाधिशिक्योत्सवेकर्तव्येस्वाकियन्मुहूर्तवर्तिनोपरदिनेग्राह्येतिविधिसंशयेजाबालिराह दशनाडीयादिवसेत्परास्मिन्दिवसेतदा ॥ दाधिशिक्योत्सवंकु-
र्यादितिशास्त्रस्यनिश्चयइति ॥५४॥ ननुसायाह्नसमयेदाधिशिक्योत्सवतयातत्कालोमृग्यइतिचेन्न तिथेःपूर्वाण्हवर्तिन्यास्तद्विषयेशास्त्रकृद्भिरंगीकृतत्वात् य-
दाहवृद्धयाज्ञवल्क्यः कालोनानियतःसोयंपौर्वाण्हीमुख्यतामता ॥ दाधिशिक्योत्सवंकुर्यात्तद्दिनेनैवसंशयइति ॥५५॥ नचाविजयमुहूर्तसाधनंदशम्याःकथमि-
तिवाच्यं राथंतराद्धिकरणन्यायेनतात्तिथेरन्यतरप्रवृत्तेः यदाहविष्णुवृद्धः यत्रैवानियतःकालस्तात्तिथौसाधुगम्यते ॥ काचित्तिथेर्मुख्यलाभकालोनानियतोभवे
दिति ॥५६॥ विस्तरोहेमाद्रौद्रष्टव्यः प्रागत्रकाचिद्रथोत्सवविषयेकालोनिर्णीतः तत्रयजमानाचार्यर्त्विजांयदिसूतकमापततितत्रकिंकार्यमित्याशंकायांचिंत्यते
कारणे कौतुकंबंधयेद्यत्रतन्मध्येसूतकंभवेत् ॥ मातापितृपरित्यागादन्यस्यतुनविद्यतइति ॥५७॥ दीक्षे भार्यायदिप्रसूतास्यात्कौतुकंबंधनयादि ॥ दीक्षामन्यस्य
कृत्वैवनिर्गच्छेन्नात्रसंशयइति ॥५८॥ अत्रह्ययंव्यवहारोवृत्तःदीक्षामन्यस्यकृत्वैवेत्युक्त्याव्याधिकरणधर्मावच्छेदकावच्छिन्नत्वेनस्वरूपहानेनप्रवृत्तेतितदेतन्नानुप-
पन्नयोग्यतायांबाधकाभावात्तथाहिअग्निर्नासिंचेदित्यत्रयद्वेयोग्यताविरहोयुक्तएवप्रकृतेःभार्यामातापितृविषयतायाःयोग्यत्वमेवानिर्गमनासिद्धंयदाहपैठीनसिः

दीक्षास्वपिचसर्वत्रमातापितृस्मृतींविना ॥ भार्याप्रसूतिकाहित्वादीक्षासम्यक्प्रसिद्धतीति ॥ ५९ ॥ गार्ग्योपि दीक्षायाविषयेनूनंमातापितृस्मृतिर्यदि ॥ भार्यायदि
प्रसूताचेदुर्धार्त्यंनसंशयइति ॥ ६० ॥ तदेताभ्यांवचनाभ्यांप्रागुक्तदोषस्यनिरासिष्यमाणतयायदितरव्यवहारेसूतकानंगीकारोनिर्भरएवेत्यवधातव्यः एत-
दाहलोगाक्षिः दीक्षांकृत्वासूतकीतिविश्रित्यजातिमूढधीः ॥ नरकेपच्यतेनूनयावदाचंद्रतारकामिति ॥ ६१ ॥ तदनेनवचनेप्रत्यवायश्रवणात्कृतकौतुकबंधनस्य
सूतकंनास्तीतिसिद्धं यत्वाहुराचार्ययजमानयोः सूतकाभावोयुक्ततरः तादेतरेषामस्त्येवेतितन्नशास्त्रविरुद्धत्वात्तथाहि व्यास : एकदेशपरित्यागोमहाननय
ईर्यते ॥ त्यक्तेत्यक्तंचसर्वत्रयुक्तयुक्तंभाविष्यतीति ॥ ६२ ॥ शाख्यायानेः ऋत्विजोयजमानश्चतथाप्याचार्यमेवच ॥ यावत्स्नपनमुद्दिष्टंतावत्शुद्धानसंशयइति
॥ ६३ ॥ स्मृतिचंद्रिकायां आचार्योऋत्विजश्चहाभवतियजमानोप्यसेत्रपुण्ययुक्तः । यावत्स्नानंचतन्नप्रकृतइभमताकौतुकेनप्रतीताः ॥ तावत्सूतिर्मृतिर्वानभव
तियादेतेदोषतस्यकभावात । नष्टःकृत्स्नोध्ययागोविकृतविधितयासाध्यतेतेननूनमिति ॥ ६४ ॥ तदेतैर्वचनैःआचार्यर्त्विग्यजमानानांमृतिसूत्योर्दीक्षाविषयेव्य-
वहारोनयुज्यतइतिप्रतिपन्नंनन्वत्रजपपारायणकर्तृणांकथमेवोतिचेत्ब्रूमः गालवः जपपारायणंचेत्तुकुर्वतेतुरथोत्सवे ॥ सूतकंमृतकंवापितेषामस्त्येवानिश्चयइति
॥ ६५ ॥ नवैवंतेषांविधिलोपोस्तीतिशंकनीयंबार्हस्पत्याधिकरणन्यायेनतदंगीकारात्एतयुक्तंरत्नेन यज्ञेवाप्युत्सवेवापिदीक्षापूर्वोयतोविधिः ॥ इतरेषांनदो
षोस्तिस्नानत्यागोपरोभवेदिति ॥ तदेतेनवचतेनजपपारायणकर्तृणामन्यमुखेनसिध्यतीतिकिंबहुनेत्युपरम्यते प्रागेकत्रानंतचतुर्दश्यांकालविशेषनिर्णीतेतद्-
त्रसूतकप्रसक्त्यानिर्णीयते वसिष्ठः अनंतस्यचतुर्दश्यांसूतकेसमुपस्थिते ॥ आश्विनेमासिकर्तव्यंचतुर्दश्यामसंशयइति ॥ ६७ ॥ चतुर्दश्यांशुक्लचतुर्दश्यामि
त्यर्थः यदाहव्यासः शुक्लपक्षचतुर्दश्यामाश्विनेमासिकथ्यते ॥ सूतकेसमनुप्राप्तेयदनंतव्रतंशुभामिति ॥ ६८ ॥ ननुसूतकांतेकर्तव्यमितिकाचित्प्रतीयते मरी-
चिः उपघातोयदिभवेत्सूतकादिस्तदंतरे ॥ सूतकांतेतुकर्तव्यंविधिसामान्यचोदितमिति ॥ ६९ ॥ अत्रत्यादिशब्दःपरराष्ट्रादुपद्रवकरःतथाचरत्नः परराष्ट्रोपद्र
वश्चेत्तद्दिनेचोपघातनं ॥ समतीतेयकर्तव्यंप्रायश्चित्तंविधीयतइति ॥ ७० ॥ एतादृशवचनस्यजगत्सुजागारितत्वेनाकिमुत्तरमासेविधानमितिचेन्नतत्रत्यांतरा
व्दस्यप्रागुक्तवाक्यस्थान्वयसंभवात्नचमहानवमीवन्नवत्सूतकांतेकर्तव्यतेतिवाच्यंवचनबलेनविषयाविभागसंभवात्तथाहि लोगाक्षिः नवरात्रिव्रतंयत्रयद्-
नंतव्रतंतथा ॥ सूतकांतेचमासांतेकर्तव्यमितिनिश्चयइति ॥ ७१ ॥ यद्यपिसूतकांतेकर्तव्यत्वमुभयोस्तुल्यंतथापिमासांतरंविधानंव्यवहारतःस्मृतिसिद्ध ननु

व्यः काचिदत्रवद्वादशसुसंक्रमणेषुस्नानमुद्दिश्यकालोनिर्णीतः तदत्रोपिद्वादशसुसंक्रमोपवासंकुर्वतोतिवस्तुगतिः तदुद्यापनविधिनिर्णीयते बादरायणः सर्वेषु
संक्रमेष्वेवयस्तूपवासततोहनुः ॥ अश्वमेधायुतफलंभवत्येवविनिश्चयइति ॥७७॥ जाबालिः द्वादशस्वपियोमर्त्यःसंक्रमेषूपवासकृत् ॥ सूर्यलोकंसमभ्येत्यमोद
तेशाश्वतःसमाइति ॥७८॥ अत्राहिद्वादशसुसंक्रमेषुप्रतिसंवत्सरमुपवासोभिहितःसाकियद्वत्सरेषुकार्यइतिविवक्षायांलोगाक्षिराह कृत्वाद्वादशवर्षाणिसंक्रमेषू
पवासकं ॥ ततउद्यापनंकुर्यादितिशास्त्रस्यनिश्चयइति ॥७९॥ भरद्वाजोपि द्वादशेवत्सरेनूनंसंक्रमस्योपवासके ॥ उद्यापनविधेस्तत्रव्रतस्यपरिपूर्तयइति ॥८०॥
ननुद्वादशवत्सरविधायिनःसंक्रमव्रतस्यकस्मिन्संक्रमेप्रारंभोद्यापनविधिरितिविवक्षायां पैठीनसिराह उत्तरायणसंक्रांतौप्रारभेद्व्रतमुत्तमं ॥ तत्रैवोद्यापनंकुर्या
दितिशास्त्रविदोविदुरिति ॥८१॥ मैत्रायणिरप्याह एकत्रसर्वासंक्रांतिरुत्तरायणमेकतः ॥ उत्तरायणसंक्रांतिःसर्वेभ्योपिगुरुर्भवेदिति ॥८२॥ एतेनमकरसं
क्रांतेःसर्वाधिक्यंवस्तुतोवगम्यतेतथाचमकरसंक्रांतावुद्यापनविधौसिद्धायांनाद्विधिःकोदृशइतिविवक्षाक्रियते विदूरथः चित्रंदेवेतिमंत्रेणसमिदाज्यचरून्हुने ३३]
त ॥ ततःसवितृगायत्र्यास्माज्यदूर्वाहुनत्त्रुघइति ॥८३॥ कात्यायनः पायसंक्षीरसर्वस्वंसघृतंसगुडंतथा ॥ मूलमंत्रेणजुहुयात्सूर्यस्येतिविनिश्चयइति ॥८४॥
एतेनहोमस्वरूपेनिर्णीतेसूर्यस्यद्वादशसुफलसेवुसूर्यस्यप्रतिमाःसमर्चयेद्धेमाद्रौस्थितं द्वादशप्रतिमाभ्यर्च्यासूर्योसौद्वादशात्मकः ॥ सौवर्णैरजतैर्वापिप्रतिमाप-
रिकीर्तिताइति ॥८५॥ गोदानस्वरूपंभट्टमाहकृपीयेदृशं गृष्टिरेवप्रदातव्यागौरस्येतिविनिश्चयः ॥ संक्रमस्यव्रतेनूनंद्वौवास्युर्वात्रयोपिवेति ॥८६॥ वायनस्वरू

पमाहात्रिः पदस्येवपरिकल्पत्वाद्वयोरयनयोरपि ॥ दंतीनांतावतांचपुजनंसंप्रशस्यतइति ॥८७॥ विस्तरोस्मिन्स्मृतिचंद्रिकायामाद्रियतइतिदिक अथसं-
वत्सरश्राद्धमृतिदिवसकालोनिर्णीयते व्यासः अष्टाविंशतिनाडीभिःश्राद्धंसांवत्सरंभवेत ॥ प्रातःश्राद्धविधेर्व्यानानामेवंयुक्ततरंमतमिति ॥८८॥ मांडव्यः परेशुम
हविंशत्यानाड्यायुक्तायश्रातिथिः ॥ तदासंवत्सरश्राद्धंकर्तव्यमितिनिश्चयइति ॥८९॥ नन्वत्रद्वैविध्यप्रसंगेकथमत्रनिर्णयइतिचेतब्रूमः लोगाक्षिः ह्रासश्चेदष्ट-
विंशत्यावृद्धिःस्यात्सप्तविंशतिः ॥ समाचेत्साधंपञ्चनाडीविंशत्यांतुविधीयतइति ॥९०॥ एतद्बोधायनापस्तंबविषयंतत्राहवस्तुतोबोधायनानामष्टविंशतिनाडी-
तदापस्तंबानांसप्तविंशतिनाडीतिविवेकोवसीयते उभयोःसायाह्नविषयेकोचिद्वैलक्षण्यायदाहगार्ग्यः आपस्तंबमतेसिद्धंसदाविंशतिनाडिका ॥ बोधायनमते
सिद्धमष्टाविंशतिनाडिकेति ॥९१॥ तदेवंबोधायनापस्तंबयोर्निर्णयोविविक्तेयदेतदाश्वलायनानांब्राह्मणानांचकथमितिचिंत्यते आश्वलायनः अष्टादशसु-
नाडीषुसमतीत्यप्रवर्तते ॥ नाडीत्वेकापिसाग्राह्यातिथिःसांवत्सरेयदीति ॥९२॥ अंगिराः वृद्धोवायदिवाह्रासेयात्वष्टादशनाडिका ॥ ग्राह्यैवसाप्रयत्नेनचा-
श्वलायनसंमतामिति ॥९३॥ अत्रचकारग्रहणेननाडीत्वेकातदूर्ध्वंगृह्यतेअन्यथापराह्णव्यापित्वयोगात्तथाहिबोधायनापस्तंबानांसायाह्नव्यापित्वमाश्वलायनप्रा

तिथिसंवत्सरश्राद्धंजायतेयद्यवस्थया ॥ काम्यश्राद्धेपिसाज्ञेयासर्वयुक्ततरमतामिति ॥ १०१ ॥ अत्राहिसर्वयुक्ततरामित्युक्त्याअपराण्हसायान्हयोर्नक्षत्रव्याप्ति
त्वमवसेयत यदाहशाख्यायनिः अपराण्हेचसायाह्नेनक्षत्रंसंगतंयदि ॥ तथातिथिःप्रकर्तव्याकाम्यश्राद्धेनसंशयइति ॥१०२॥ पार्वणश्राद्धेविशेषोवगम्यते
पिद्धरथः अमावास्यांयथायार्गपौर्णमास्यांयथाविधिः ॥ कर्तव्यंपार्वणश्राद्धंकाम्यश्राद्धंतदिष्यतइति ॥१०३॥ पर्वणोरिदंपार्वणमितिशब्दार्थनिर्णयःतस्मिन्पार्व
णश्राद्धेतिथिःकियन्नाडीपरिग्राह्येतिविधिसंशयेकात्यायनआह सामगानामृचामत्रनाडीद्वाविंशतिर्मता ॥ बोधायनापस्तंबानांपंचविंशतिनाडिकेति ॥१०२॥
विस्तरोहेमाद्रौसम्यगेवावतिष्ठतइतिसर्वंरमणीयं नैमित्तिककांडोयमनेनव्यवहारेणविज्ञायतेतरां आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये ॥ पूर्णोनवमउल्लासः
कांडेनैमित्तिकेशुभः ॥१०५॥ इतिश्रीआनंदगिरिस्वामिकृतस्मृतिसारसमुच्चयेनैमित्तिककांडेनवमउल्लासः ॥ ॥ ॥ नैमित्तिककांडश्चसमाप्तः ॥ ॥ ॥

इति स्मृतिसार-समुच्चये नैमित्तिककांडः समाप्तः

अथ स्मृतिसार--समुच्चये काम्यकांडः प्रारंभः

काम्यकांडस्य विषयानुक्रमः

स्मृतिसारसमुच्चये काम्य कांडे प्रथम उल्लासः

जगल्लक्ष्यमलक्ष्यंयासांयेयास्मिन्प्रतिष्ठितं ॥ नौमितंपरमात्मानंमहेशंसर्वसाक्षिणं ॥ १ ॥ कांडत्रयंविनिर्दिष्टंस्मृतिसारसमुच्चये ॥ नैमित्तिकंचनित्यंचयतःपूर्वमुदाहृतं ॥ २ ॥ काम्यकांडंविनिर्देश्यंसर्वाघौघप्रशांतये ॥ प्रायश्चित्ततदत्रास्तिनिर्णयोयंतदीर्यते ॥ ३ ॥ तथाहि यदत्रस्मृतिसारसमुच्चयेकांडद्वयोपाधियुक्ततयाप्राङ्निर्णीताः कालास्तदुपयुक्ताआचारव्यवहाराश्चतच्छेषतयाव्यवस्थितानांपातकानांप्रायश्चित्तंविनिर्देष्टव्यमितिसर्वस्वविदांसिद्धांतः तत्राहिब्रह्महत्यादयोयेपातकविशेषामहांतः तदन्येगोवधाद्याउपपातकविशेषादेवतायतनादिविशेषकृत्येषुग्रामजनपदादिधर्मेषुप्रायश्चित्तंविनिर्देष्टव्यमिततथैवजातिसांकर्यादिबाधानिवृत्तयेतदनुलोमाविलोमादिनामुक्तप्रायश्चित्तंबोध्यं तथैवाभक्ष्याभक्षणादिपुव्यवस्थाविधीयते एवंविधव्यवहारेकृच्छ्रचांद्रायणादीनांकर्तव्यताविधिर्विषयेस्वरूपांस्तारुपवगंतव्या तत्रैनेनन्यायेनप्रागुक्तानांकांडद्वितयोपपादितानामपिनित्यनैमित्तिकानांव्यवहारोप्यत्रबोध्यः तथाजन्मांतरीयसंस्कारवशादागतानांरोगविशेषाणामपिशांतिर्निर्णीयते तदेतानिप्रायश्चित्तानियदितीर्थयात्रादिनाक्षालितानांपातकानांतावताशुद्धिंगमयंति तथापिताद्विधौवाह्निसंतर्पणं

मरीचिरपि ज्ञानाद्[illegible]कुर्वतेब्रह्महत्यया ॥ अकामतोवाग्दोषस्यप्रायश्चित्तंविनिर्दिशेदिति ॥८॥ चांद्रायणलक्षणंगार्ग्येणोक्तं दत्वांगवेब्राह्मिराशिमा-
[illegible] ॥ समुत्सृत्यचतद्ब्रोहिंराशिंसंशोध्ययत्नतः ॥९॥ गोमूत्रतःपाचयित्वाप्यन्नंतंडुलसंभवं ॥ चत्वारिंशद्दिनेभुक्त्वाचांद्रायणमिदंस्मृतमिति
॥ १० ॥ अत्रायंविधिनिर्णयः ब्रह्महत्यानिमित्तवाग्दोषेसतिकाशीगोकर्णमुख्यमहाक्षेत्रेषुगत्वामहाब्रह्मसभामध्येममवाग्दोषसमुत्पन्नः प्रायश्चित्तमुपादिशंत्वि-
तिब्रूयात् दिनकरग्रंथे वाग्दोषाद्वाब्रह्महत्यायस्यप्राप्ताद्विजातिकं ॥ गत्वैवदंडवत्भूमौपतेत्क्षेत्रेषुपातकीति ॥ ११ ॥ क्षौरपूर्वंततोविप्रश्चांद्रायणपुरःसरं ॥
कारयित्वाततोहोमंप्रायश्चित्तंविनिर्दिशेदिति ॥ १२ ॥ कोयंप्रायश्चित्तहोमविधिरितिविवक्षायां जाबालिराह ब्रह्मजज्ञानमंत्रेणसमिदाज्यचरून्हुनेत् ॥ त्रि-
यंबके[illegible]लक्षमेकंतिलाहुतिरिति ॥ १३ ॥ काण्वोप्याह ब्रह्मजज्ञानर्चमुक्ताहुत्वातुसमिदादिकान् ॥ तिलाहुतिलक्षसंख्यात्र्यंबकेणततश्चरेदिति ॥ १४ ॥
एवंविधविषयेराजदंडब्रह्मदंडयोर्युक्तताप्रतीयते यदाहगालवः प्रथमंराजदंडःस्याद्ब्रह्मदंडस्ततःपरः ॥ गोनिष्क्रयद्रव्यसंख्याब्रह्महत्याकृतेभवेदिति ॥१५॥
विस्तरोनिर्णयामृतेस्थितइतिदिक् ब्रह्मवधप्रायश्चित्तंसर्ववर्णसममितिनिर्णीतंतत्प्रायश्चित्तायप्रसिद्धक्षेत्राण्युद्दिश्ययदेतदभिहितंतादृशकृतप्रायश्चित्तविनिपा-
ताभावेनयःकोप्यकृतप्रायश्चित्तःतस्यजन्मांतरेकिमितिचिंत्यते देवलः प्रायश्चित्तविहीनोयःब्रह्महत्यासमन्वितः ॥ यातनामनुभूयाथक्षयरोगीभवेन्नरइति
॥ १६ ॥ अत्रहिक्षयरोगीभवेदित्युक्त्यायमलोकयातनानंतरंमनुष्यजन्मनिनिर्दिष्टोयंव्यवहारः ननुजन्मांतरीयपातकस्ययातनस्यानिर्वाहात्किमर्थंक्षयरोगोपद्र
वइतिचेन्न शेषाशेषिभावत्वस्यजन्मांतरीयसंस्कारविधानात् तदेवक्षयरोगोपद्रवेतस्यनाशःकथंसंभवतीतिचिंत्यते कात्यायनः जन्मांतरीयसंस्कारात्क्षयरो
गीभवेन्नरः ॥ तद्रोगस्यनिवृत्त्यर्थंशांतिंतत्रसमाचरेदिति ॥ १७ ॥ गार्ग्योपि ब्रह्महत्यापातकाद्धि जन्मांतरकृतान्नरः ॥ क्षयरोगीनिरोगीस्याच्छांतिहोमेकृतेपर
मिति ॥ १८ ॥ व्यासोपि ब्रह्महाक्षयरोगीचेत्प्रायश्चित्तंविनिर्दिशेत् ॥ शांतिःशांतिविधानेनरोगस्योतिनसंशयइति ॥१९॥ तथाहि यदिक्षयरोगीभवतितस्यज-
न्मांतरेब्रह्महत्यांविनिर्दिश्यशांतिनिर्देष्टव्यइति तथाविधव्यवहारेकीदृशीशांतिरितिविवक्षायांमरीचिराह सोमःपुनानमंत्रेणसमिदाज्यचरून्हुनेत् ॥ अग्नेनये
तिमंत्रेणलक्षमेकंतिलाहुतिरिति ॥ २० ॥ यदेतदकरणेनास्मिन्नपिजन्मनिपुनर्निरयोवासइतिसिद्धं एतदाहमांडव्यः क्षयरोगीनरोयस्तुशांतिहोमंकरिष्यति ॥
तच्छांत्यातस्यपापस्यरोगस्यापिभविष्यतीति ॥ २१ ॥ ननुरोगनाशार्थंकृतप्रायश्चित्तहोमस्यतत्कालेरोगनाशोनभवतितथाप्येतस्यपुनरुपायःकइतिचेन्न उक्त

रीत्यासाधनीयस्यन्यूनतायांतद्रोगनाशाभावात् यदाहपैठीनसिः रोगनाशस्यशांतौहियथोक्तंतत्समाचरेत् ॥ न्यूनश्चेन्नैवनाशोऽस्तिरोगस्येतिविनिश्चयइति
॥ २२ ॥ गोदानंब्राह्मणवधनिमित्तंसाक्षान्महापातकेदशसंख्याविधयाप्रतीयते रोगस्यगोदानद्वयमेवकर्तुमुचितमिति यदाहविश्वावसुः ब्रह्महत्याकृतेमर्त्यःदश
गोदानमाचरेत् ॥ गोदानंछितयंदत्वाक्षयरोगेयथाविधीति ॥ २३ ॥ तथाचसाक्षाज्जनिपातकोद्देशेब्रह्महत्यायांदशगोदानप्रदानंयतोनिर्दिष्टंतदुद्देशेनक्षत्ररो
गनिमित्तेशांतिहोमेगोदानद्वयदातव्यमितिविवेकोद्रष्टव्यः एतदर्थंविशेषोहिदिनकरग्रंथेस्थितइतिनियतमुपरम्यते यत्रहिब्रह्महत्यापातकमुद्दिश्यप्रायश्चित्तंवि-
हितंतदनुसारेणगोवधस्यब्राह्मणहत्यासादृश्यप्रतिपादनेनप्रायश्चित्तंकिंचिन्न्यूनतयानिर्दिश्यते यदाहदेवलः गोवधंकामतःकृत्वाप्रायश्चित्तंनचार्हति ॥ ब्रह्म
हत्यासमत्वेनवाग्दोषेतत्समुद्दिशेदिति ॥ २४ ॥ यतोहेतोःवाग्दोष निमित्ततयागोवधस्यप्रायश्चित्तंव्यवस्थापितंततएवषोडशानिग्रहाधिकरणन्यायेनतत्स्वरू
पंवक्तव्यमितितदर्थमधुनावचनानिकीर्त्यंते वृद्धहारितः कामतोगोवधंकृत्वापुण्यक्षेत्रेषुकिल्बिषी ॥ पापंक्षालयतेनूनंप्राजापत्येनानिश्चितमिति ॥ २५ ॥
अत्रहिप्राजापत्यकृच्छ्रंगोवधेप्रतीतंतेनचपुण्यक्षेत्रेतद्विधायमुक्तोभवति प्राजापत्यलक्षणंभगवानाहसूत्रकारः एकभुक्तनक्तायाचितोपवासैस्त्रिरात्रमावृत्याप्राजा-
पत्यकृच्छ्रमितिकात्यायनोपि एकभुक्तेननक्तेनात्रिदिनंतूपवासयेत् ॥ अयाचितोपवासाभ्यांप्राजापत्यंसमीर्यतइति ॥ २७ ॥ एतेनप्राजापत्यलक्षणेसिद्धेतदूर्ध्वं
किमितिशंकायांपैठीनसिराह क्षौरपूर्वंविधायैवप्राजापत्यंतुकिल्बिषी ॥ गोवधेब्राह्मणमुखेप्रायश्चित्तंसमर्हतीति ॥ २८ ॥ तथाहिप्रायश्चित्तंसमर्हतीत्युक्त्या
दंडेनघटइतितारणाभावेकार्यानुदयेनतद्धोमविधिस्वरूपंनिरूप्यते यदुक्तंनिर्णयसारावल्यां यूयंगावेनमंत्रेणगोवधेहोममीर्यते ॥ समिदाज्यचरून्हुत्वाश्यामा
कंचहुनेत्ततइति ॥ २९॥ ब्रह्मकैवर्तपुराणे श्यामाकंचत्रिसाहस्रंत्र्यंबकमनुर्भवेत् ॥ हुत्वावन्हौविमुक्तःस्याद्गोवधेकिल्बिषीनरइति ॥ ३० ॥ ननुपुण्यक्षेत्रे
ष्वित्युक्तंपुण्यक्षेत्राणिकानीत्यपेक्षायांब्रह्महत्यागोवधपरिहारेपुराणवचनान्युदिश्यंते काश्मीरखंडे ब्रह्महत्यांगोवधंवायदन्यत्सर्वपातकं ॥ कृत्वाविमुच्यतेनूनं
वाराणस्यांप्रवेशतइति ॥३१॥ गोकर्णखंडे अपिपापशतंकृत्वाब्रह्महत्यादिमानवः ॥ सकृत्प्रविश्यगोकर्णंनरोमुच्येतपातकैरिति ॥ ३२ ॥ ननुमध्यार्जुनश्रीशैला
दिषुमहाक्षेत्रेषुजाग्रत्सुकिमेतेषामेवविशेषविधानमितिचेत्ब्रूमः यदुक्तंत्रिस्थलीसेतौ गोकर्णंहृदयंक्षेत्रंकाशीभ्रूमध्यमीर्यते ॥ उदरंरामसेतुश्चभूमेरिति
विनिश्चयइति ॥ ३३ ॥ अतएवसर्वक्षेत्रेषुक्षेत्रत्रयंविख्यातंबोध्यमितिदिक् गोवधमुद्दिश्यप्रायश्चित्तमुक्तंतदेतदनुश्वासश्वासरोगेजन्मांतरसंस्क

निवृत्तौततएवपातकानिवृत्तिर्गम्यते एतत्फलमुक्तंस्मृतिपारिजाते श्वासश्वासीनरोयस्तुशास्त्रोक्तंशांतिमाचरेत् ॥ रागान्मुक्तःपुण्यवाञ्जायतेनात्रसंशयइति
४० ॥ एतत्पूर्वकर्मविपाकात्प्राप्तमपिज्ञानन्यःकरोतितस्यदीर्घायुरितिसिद्धं यदाहवृद्धमनु दीर्घायुर्लभतेनूनंश्वासश्वासीनरोयतः ॥ शांतिहोमेनपुण्या
त्मारोगहानिंलभेत्तत्इति ॥ ४१ ॥ एतदेवप्रायश्चित्तविषयाकर्मविपाकात्प्राप्तंनोलंघनीयामिति शांतिहोमस्वरूपंनिरूपितं प्रसिद्धस्यब्रह्महत्यापातकस्यमहा
पातकतयातदुद्देशेनगोवधस्यतत्साम्यात्प्रायश्चित्तमुदाहृतं तत्रहिजन्मांतरपरिपाकोपिनिरूपितः अधुनाद्वितीयस्यमहापातकस्यसुरापानस्यप्रायश्चित्तंनिरूप्य
ते लोगाक्षिः सुरापानेतुवाग्दोषेप्रायश्चित्तंविनिर्दिशेत् ॥ कृत्वासांतपनंकृच्छ्रंतेनमुक्तोभविष्यतीति ॥ ४२ ॥ गोभिलोपि कृतेसांतपनेकृच्छ्रेसुरापानंकृतंयदि॥
वाग्दोषेणतुसंप्राप्तंविनश्यतिनसंशयइति ॥ ४३ ॥ सांतपनंकृच्छ्रलक्षणमुक्तंसूत्रकृतापूर्वंन्द्यनाहारोगोमूत्रगोमयक्षीरदधिसर्पिकुशोदकान्येकीकृत्यपानंपरेद्युरु
पवासःसांतपनंकृच्छ्रमिति गौतमः गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकं ॥ परेद्युरुपवासंकुर्यात्कृच्छ्रंसांतपनंस्मृतमिति ॥ ४४ ॥ ननुस्मृतिचिंतामणावुक्तं
शात्रवर्षंतसक्षीरपानमुपवासइति याथासुरापीतिकदाचित्तौसांसंतप्तगोक्षीरमपिप्रधानं ॥ कुर्यात्त्रिवर्षंचकृतोपवासोमुक्तोभवेदेषविधिःप्रदिष्टइति
४५ ॥ तदेतस्यवाक्यस्यकागतिरितिचेन्न अकामकृतसुरापानस्यतत्प्रायश्चित्तविधानात् यदाहमरीचिः अकामतःसुरापीतिरात्रिवर्षंपयःपि-

बेत ॥ तप्तकृतोपवासोथतेनमुक्तोभविष्यतीति ॥ ४६ ॥ तदेतस्यप्रायश्चित्तस्यतदंतेहोमविधानंकीदृशमित्याशंकायांबौधायनआह तिलव्रीहियुतंद्रव्यं
गोमूत्रंपवमानकम् ॥ हुत्वाहुतिःप्रमुक्तःस्यात्सुरापानादकामतइति ॥ ४७ ॥ अत्रायंमंत्रःकश्चनिर्धार्यइतिचेत्क्रमः विश्वावसुः यस्त्वाहृदेतिमंत्रेणसह
स्वाहुतिमाचरेत् ॥ तिलव्रीहिगोमूत्रंसुरापानात्प्रमुच्यतइति ॥ ४८ ॥ नन्वेतावताप्रायश्चित्तेनकिंपातकंनिर्गमिष्यतीतिचेत्क्षेत्रप्रभावाद्बोध्यं तदाहिशिव
धर्मोत्तरे गंगास्नानकृतयेनप्रातश्चांद्रायणंचरेत् ॥ तेनकृच्छ्रकृतनूनंप्रायश्चित्तंसमर्हतीति ॥ ४९ ॥ विष्णुधर्मोत्तरे सेतुस्नायीनरोयस्तुमहापातकवान्यदि॥
विमुच्यतेनसंदेहस्तस्मात्सेतुंसमाश्रयेदिति ॥ ५० ॥ गोकर्णखंडे गोकर्णसागरस्नानंमहाबलमहेशितुः ॥ दर्शनंब्रह्महत्यादिमहापातकनाशनमिति ॥ ५१ ॥
तदनेनवचनेनपुण्यक्षेत्रप्रविश्यततोनुतापदर्शनेनतत्रत्यतीर्थयात्राकृत्वांततःपातकमुक्तःप्रायश्चित्तंसमर्हतीतिव्यवस्थितिरनेनसिद्धा एतदाहकात्यायनः महा-
क्षेत्रंप्रविश्याथमहापातककिल्बिषी ॥ तीर्थश्राद्धादिनानूनंप्रायश्चित्तंसमर्हतीति ॥ ५२ ॥ अत्रहिविशेषविधानंनिर्णयमरीचौस्थितमिति साध्वेतस्मादुपर
म्यते सुरापानात्किंचिन्न्यूनतायांसुवर्णस्तेयमहापातकमितितदानुगुण्येनप्रायश्चित्तमुच्यते यदाहगार्ग्यः स्वर्णस्तेयंबुद्धिकृतंप्रायश्चित्तान्नश्यति ॥
अबुद्धिपूर्ववाग्दोषःप्रायश्चित्तेननश्यतीति ॥ ५३ ॥ देवलोपि प्रायश्चित्तंसमर्हतीस्वर्णस्तेयकृतात्पापात् ॥ बुद्धिपूर्वकृतायेतुवाग्दोषेसमुपस्थिताइति ॥५४॥

सद्दक्षात्रितयंकृत्वास्वर्णापहरणेकृते ॥ वाग्दोषाद्धिनिवृत्तस्यादितिशास्त्रस्यानिश्चयइति ॥ ५९ ॥ अत्रहिसुवर्णस्तेयमहापातकस्यवाग्दोषैरात्रिसत्राधिकरण
न्यायेनतीर्थयात्रादितावि मुक्तिगतवतःप्रायश्चित्तहोमांविनानशुद्धिरितिसम्यगेवव्यवस्थापितं चतुर्विधानांमहापापानांमध्येगुर्वंगनागमनं गुरुतल्पपातक नि
श्चयः यदुक्तंगौतमसूत्रे गुर्वंगनागमनमितिपूर्वकृतंप्रायश्चित्तहीनमथाप्यबुद्धिपूर्वकरीषाग्निदाहशुद्धमिति अतएवाहमरीचिः गुर्वंगनायागमनंमतिपूर्वंतु
तद्भवेत् ॥ प्रायश्चित्तविहीनंस्यादमत्याकिंचिदर्हतीति ॥ ६० ॥ अत्रह्यमत्याकिंचिदर्हतीत्युक्त्याकठिनप्रायश्चित्तंबोध्यं एतदाहदेवलः गुर्वंगनाभिगमन
ममत्याकुरुतेयदि ॥ दग्ध्वाकरीषाग्निनासौप्रायश्चित्तसमर्हतीति ॥ ६१ ॥ एतदेवोक्तंस्मृतिपारिजाते गुर्वंगनागमनमज्ञचरन्विमूढो यात्रांविधायसकला
मपिभूतलेसौ ॥ पश्चात्करीषदहनेनविमुक्तपापोजायेतनात्रविदितंपरिहारमस्तीति ॥ ६२ ॥ तदनयावचनसंहत्यासाक्षात्कृतस्यगुर्वंगनागमनपातकस्य
प्रायश्चित्तंनास्ति यद्यपितथापिअनुतापवशात्कृतयात्रावतःगंगास्नायितःसमुद्रस्नायिनोपिविमुक्तिरस्तीतिव्यवहर्तव्यं तथाहपैठीनसिः गंगास्नानंप्रकुरुते-
सागरस्नानमेववा ॥ गुर्वंगनागमनमस्तिवर्षान्मुच्यतेनरइति ॥ ६३ ॥ तथाहयात्रयापातकनिवृत्तौजातायांततःप्रायश्चित्तमर्हतीतीतिसिद्धं एतदाहरल्लः
यात्रयामुक्तपापोसौप्रायश्चित्तंसमर्हति ॥ गुर्वंगनागमनतःप्राजापत्यंचरन्भुवीति ॥ ६४ ॥ तदनेनवचनेनप्राजापत्यकृच्छ्रेचीर्णेततःप्रायश्चित्तहोमविधिःद्विज
मुखात्कृतःसिध्यतीतियुक्तमुत्पश्यामः यदाहवसिष्ठः प्राजापत्यंत्वात्रिवर्षंकृत्वाहोमंविधिततः ॥ ब्राह्मणेभ्यःकृतंलब्ध्वागुरुतल्पीविमुच्यतइति ॥ ६५ ॥ प्रा
यश्चित्तहोमविधिःकीदृश्यइत्यपेक्षायांजमदग्निराह कदलिनालीकेराणांशकलैःसतिलैरथ ॥ हुत्वायुतंतुनिर्मुक्तोगुरुतल्पीशुचिर्भवेदिति ॥ ६६ ॥ निर्णया
मृतेविशेषोलक्ष्यते आयाहीन्द्रेतिमंत्रेणसतिलंकदलीयुतं ॥ नालिकेरंप्रजुहुयाद्गुरुतल्पीविमुच्यतइति ॥ ६७ ॥ तदत्रसमाधानं प्रथमंतीर्थयात्राततोद्विजमु
खेनमंत्रपुरश्चरणंस्वस्यकृच्छ्रादिमध्येप्रायश्चित्तंततोहोमविधिनापातकाद्विमुक्तिरिति एतदाहशाट्यायनिः कृत्वाक्षौरादिकृत्यानियात्रांकृत्वायथाविधि ॥
प्रायश्चित्तस्यहोमेनगुरुतल्पीविशुध्यतीति ॥ ६८ ॥ विस्तरोहेमाद्रौद्रष्टव्यइतिदिक् इतःप्राक्चतुर्विधमहापातकेषुप्रायश्चित्तविधौनिर्णीतेषुपंचमोपि
महापातकइतितत्संयोगसंज्ञंमहापातकमुद्दिश्यप्रायश्चित्तमुदाह्रियते यदाहपैठीनसिः ब्रह्महत्यासुरापानसुवर्णस्तेयकृन्नरः ॥ गुरुतल्पगतोप्येते-
तत्संयोगीचपंचमइति ॥ ६९ ॥ तत्संयोगीब्रह्महत्यादिमहापातककृतांसंयोगवानित्यर्थः यदाहकश्यपः महापातकिभिःसार्धंशयनासनभो-

जनैः ॥ संभाषणैर्महापापंजायतेमासमात्रतइति ॥ ७० ॥ भरद्वाजोपि मासमात्रंवसेद्यस्तुमहापातकिभिःसह ॥ समहापातकीहे-
योनात्रकार्याविचारणेति ॥ ७१ ॥ तदेतैर्वचनैर्महापातकीशब्दार्थेनिर्णीतेतन्यायप्रायश्चित्तंकीदृशमित्यपेक्षायां वसिष्ठआह तीर्थयात्रांचरेदेक-
वत्सरंप्रयतोनरः ॥ तत्संयोगीविमुक्तोयंप्रायश्चित्तेनजायतइति ॥ ७२ ॥ अत्रहिप्रायश्चित्तशब्देनगायत्रीपुरश्चरणंविधेयं यदाहशंखलिखितौ गायत्रीप्रजपे
न्नित्यंतत्संयोगीनरोयदि ॥ सहस्रंप्रत्यहंवर्षाद्विमुक्तोजायतेततइति ॥ ७३ ॥ तदेतस्यप्रायश्चित्तांगतयाअर्धकृच्छ्रंबोध्यंअर्धकृच्छ्रलक्षणमाहजाबालिः अयाचितो
पवासाभ्यांवाहयेद्दिवसद्वयं ॥ तदर्धकृच्छ्रंविज्ञेयंसंवत्सरफलप्रदमिति ॥ ७४ ॥ तथाचतत्संयोगिनःअर्धकृच्छ्रकरणंपातकशोधनमितिवस्तुगतिः गोभिलः अर्धकृ
च्छ्रंचरेद्येवतत्संयोगीतुपातकी ॥ आवत्सरंविमुच्येतततोर्हस्यातिकारतामिति ॥ ७५ ॥ अधिकारतांप्रायश्चित्तहोमाधिकारतामित्यर्थः एतदर्थेगौतमसूत्रं यःप्र-
त्यहंनियतस्तत्संयोगीतदर्धकृच्छ्रंकुर्वन्सहस्रगायत्रीजपन्वत्सराद्विमुक्तोभवतीति कात्यायनः यदाविमुक्तपापोसौतत्संयोगीनरश्चरन् ॥ तीर्थयात्रांततोनूनंप्राय
श्चित्तंसमर्हतीति ॥ ७६ ॥ प्रायश्चित्तविधिर्गालवेनोक्तः पायसेनाद्दिलक्षंतुयतइंद्रभयामहे ॥ हुत्वानेनविमुक्तःस्यात्तत्संयोगाख्यपातकादिति ॥ ७७ ॥ यद्यपित-
त्संयोगिनःतीर्थस्नानादिकक्षालितपातकस्यकृच्छ्राद्विमुक्तिःतथापिहोमविधिंविनापंक्तियोग्यतानास्तीतिविधिरेषविवेकतयाबोध्यः यदुक्तंनिर्णयामृते कृच्छ्राद्वि-
मुक्तपापोपिहोमेनरहितोयदि ॥ अपांक्तेयत्वदोषःस्याद्वह्निहोमोविमुच्यतेति ॥ ७७ ॥ विस्तरस्तुस्मृतिकामधेनौबोध्यः अत्रहिसामान्यतोमहापातकस्यनिर्णय
विधित्सायांविशेषविधिरापत्स्यते तेनाविधवागमनस्यप्रायश्चित्तंनिर्दिश्यते गोभिलः असवर्णासुनारीषुरेतःसेक्तोभवेद्यदि ॥ विप्रःशूद्रत्वमापन्नोभवतीति
विनिश्चयइति ॥ ७८ ॥ गार्ग्यः तदनेनवचनेनजात्यंतरव्यतिरिक्ततयाब्राह्मणस्यस्वजातौविधवागमनेजातेतथाविधाज्ञातपातकस्यकिंप्रायश्चित्तमितिविवक्षायां
लौगाक्षिराह अज्ञानात्ब्राह्मणोगत्वासवर्णांविधवांयतः ॥ कृत्वाचांद्रायणंकृच्छ्रंविशुध्यतिनसंशयइति ॥ ७९ ॥ चांद्रायणकृच्छ्रमित्येतद्राज्ञागृहीतदंडस्येत्यर्थः
एतदाहकात्यायनः ब्राह्मणोविधवांगत्वाकृच्छ्रंचांद्रायणंचरेत् ॥ राज्ञागृहीतदंडश्चेत्तेनमुक्तोभविष्यतीति ॥ ८० ॥ नन्वेतदल्पप्रायश्चित्तमुक्तं तदिदमनुपपन्नमि-
तिचेत्सूमः शातातपः तीर्थयात्रांप्रकुर्वीतविधवागमनेसति ॥ प्रायश्चित्तंततःकुर्यादितिशास्त्रस्यनिश्चयइति ॥ ८१ ॥ गार्ग्यः अज्ञानाद्विधवांगत्वासेतुस्नानंस-
माचरेत ॥ गंगास्नानंप्रकुर्वीतसागरस्नानमाचरेदिति ॥ ८२ ॥ ननुयात्रादिनाक्षालितजातकस्यकिंमतःप्रायश्चित्तंविधीयतइतिचेन्न स्नानेनदेहशुद्धिविधितया

कार्यारंभेस्वमाराध्यवांछितंलभतेजनः ॥ नौमिमातंगवदनंसर्वाभिष्टप्रसिद्धये ॥ १ ॥ अत्राहिगुरुतरप्रायश्चित्तानांब्रह्महत्यादीनांकारणतोनिर्देश्यममत्या कृतामिति लघुप्रायश्चित्तानामितःपरंस्वरूपतोनिर्देशःक्रियते कात्यायनः ब्राह्मणोयादिशूद्रान्नंभुनक्त्यज्ञानतोपिच ॥ प्रायश्चित्तंकिमस्तीतिनिर्देशःक्रियतेतरां ॥ २ ॥ अज्ञानाद्थवाज्ञानात्प्रायश्चित्तंनविद्यते ॥ शूद्रान्नभोजिनंत्यक्ताबांधवाशुद्धिमाप्नुयुरिति ॥ ३ ॥ अत्रबांधवाशुद्धिमाप्नुयुरित्युक्तंकिमत्रविधानमितिविव क्षायांगोभिलआह पतितोयदिजायेतशूद्रान्नभोजनाद्द्विजः ॥ घटस्फोटंप्रकुर्वीरन्बंधवस्तस्यसर्वथेति ॥ ४ ॥ अत्रेयंव्यवस्थाविप्रोयदिशूद्रान्नभोजीतस्यप्राय श्चित्तंनविद्यतइत्युक्तं तद्बंधूनांप्रायश्चित्तंतत्संसर्गविषयावर्तताम्इति एतदाहलौगाक्षिः संसर्गदोषाद्भवतिबंधूनांपातकंयतः ॥ पतितस्यपरित्यागोयावत्तेषांतु सूतकमिति ॥ ५ ॥ तदनेनवचनेनतस्यपरित्यागावाधिबंधवःसूतकमनुभूयततःपंचगव्यादिनाप्रायश्चित्तविधानेनतद्भ्रातृपितृपुत्रादयः शुद्धिमाप्नुयुरिति एत दाहगार्ग्यःजीवतःपतितस्यैवकृत्वाथोपारलौकिकीं स्वयंशुद्धायविष्यंतिज्ञातयोनात्रसंशयइति ॥ ६ ॥ ननुज्ञातीनांसूतकानिवृत्तिरितिरुदाहृतातस्यसंवत्सरश्रा द्धकोदशामितिविवक्षायांबादरायणआह यावज्जीवस्यसौतावद्विष्णुश्राद्धंसमाचरेत् ॥ ततःश्राद्धंप्रकुर्वंतेद्वादशाद्वत्सरात्परमिति ॥ ७ ॥ किमत्रविस्तरेणेति-

शूलीदित्सातिगांयदिप्रशमयेदेकोहरस्तद्भवं। दोषंतेनकरोतिमूर्तिंमापितांशक्त्यासमेतांयथा॥ दत्वामुच्यतएवपातकवशात्तच्छांतिहोमेकृते। नोचेद्यातितथा
न्यजन्मानिशुनोयोनिंवरोनिश्चयादिति ॥ १५ ॥ विस्तरोनिर्णयमरीचौद्रष्टव्यः अत्रह्यश्वप्रतिग्रहेदातुः शुभंप्रतिग्रहीतुररिष्टमितिप्रायश्चित्तंनिर्दिश्यत
मांडव्यः अश्वंददातियोमर्त्यःसरत्नाकरमेखलां ॥ महीददातितत्पुण्यंशेषेणापिनगण्यतइति ॥ १६ ॥ वृद्धयाज्ञवल्क्यः अश्वप्रतिग्रहंकृत्वापातकं
महदाप्नुयात् ॥ जलोदरव्याधियुतोभवेज्जन्मांतरेनरइति ॥ १७ ॥ अत्रपातकंमहदाप्नुयादित्युक्त्याब्रह्महत्यादिपातकसादृश्येभीतिरुद्दिश्यते व्याघ्र-
पादः अश्वप्रतिग्रहंनूनंमहाभीतिमवाप्नुयात् ॥ वृत्तिमाप्नोतिदुरिताद्वत्सरेणनसंशयइति ॥१८॥ तस्मादेतस्यपातकस्यप्रायश्चित्तंवक्तव्यमितिस्मृतिविदांव्य-
वहारः किंतत्प्रायश्चित्तमितिविवक्षायांगालवआह पुण्यक्षेत्रंसमासाद्यक्षौरोपोषणकृन्नरः ॥ मृत्युप्रतारणार्थायरुद्रमेवसमर्चयेदिति ॥१९॥ गोभिलः तिलां
ल्लक्षाहुतिंकुर्यात्पंचाक्षरमनोरथ ॥ गोदानंतत्रदातव्यंमृत्युदोषात्प्रमुच्यतइति ॥२०॥ व्यासः समिदाज्यचरूनेवहुनेत्त्र्यंबकेणतु ॥ अश्वप्रतिग्रहेशांतिर्भवि-
ष्यतिनसंशयइति ॥२१॥ अत्रह्यश्वप्रतिग्रहेष्टिराहिताग्नेर्विहिता वृद्धगार्ग्यः अश्वप्रतिग्रहेष्टिश्चेदाहिताग्नेर्विधीयते ॥ अश्वप्रतिग्रहंकृत्वामृत्युदोषात्प्रमुच्यत
इति ॥२२॥ स्मृतिचिंतामणौ प्रतिग्रहंयोविदधातिविप्रःस्तुरंगमस्यप्रतनोतिशांतिं ॥ तिलानसौलक्षमितांजुहोतिगोदानमेवप्रदिशेद्यथासावीति ॥२३॥
यदन्यद्विवेचनीयं हेमाद्रौस्थितं माहिषीप्रतिग्रहणंपरमृत्युनिवारणं स्वस्यमृत्युलाभइतिस्मृतिविदांमतंयाज्ञवल्क्यः महिषींप्रतिगृण्हातिपरमृत्युविनाशनं ॥ य
स्तस्याधनमृत्युःस्यात्स्वस्यैवेतिविनिश्चयइति ॥२४॥ अत्रव्यवस्थामाहुर्मंडनमिश्रः तुरंगमहिषींचैवगजंकालायसंनरं ॥ ऋणापकरणेदोषोनास्तीत्येवविनिश्च
यइति ॥२५॥ स्मृतिचिंतामणौ तुरंगमंयोमहिषींनरंसाकालायसंमत्तमतंगजंच ॥ यस्माद्दणस्यापकृतिर्नरोयंततःप्रगृण्हातिनदोषएषइति ॥२६॥ एवंविध-
व्यवस्थायांसिद्धायांकिंतत्रप्रायश्चित्तेनेतिचेत्ब्रूमः मांडव्यः महिषींयःप्रगृण्हातिनरकालायसंतथा ॥ ऐहिकांवृत्तिमाप्नोतिनरकंचसमश्नुतइति ॥२७॥ यद्य-
पिऋणापकरणेदोषोनास्तितथापिकिंचित्प्रायश्चित्तंनिर्देष्टव्यमेवेतिसिद्धं यदाहवृद्धगार्ग्यः महिषींप्रतिगृण्हातिपादकृच्छ्रंसमाचरेत् ॥ परलोकेनतत्रास्तिभी-
तिरित्येवनिश्चयइति ॥२८॥ पादकृच्छ्रलक्षणमापस्तंबेनोक्तं पुण्यक्षेत्रेक्षौरविधिंकृत्वातुदिवसत्रयं ॥ उपवासत्रयेजातेपादकृच्छ्रंनिगद्यतइति ॥२९॥ ऐहिकमृ-
त्युविनाशनेकिंतत्प्रायश्चित्तमितिविवक्षायांयाज्ञवल्क्यायानिराह यंतेसहत्र्यंबकंमंत्रेणलक्षमेकंतिलाहुतिं ॥ करोतिमाहिषीदानान्मृत्युदोषःप्रशाम्यतीति ॥३०॥ नन्व

कृतप्रायश्चित्तस्यविधिबलाजीवितमार्कंबाधकमितिचेन्न जन्मांतरेमूत्रकृच्छ्ररोगप्रतिपादनात् जाबालिः जन्मांतरेमूत्रकृच्छ्रंमहिषीयानतोभवेत् ॥ प्राय
श्चित्तंततःकुर्याद्द्विजायैवविचक्षणइति ॥ ३१ ॥ ननुजन्मांतरपातकपरिपाकेनमूत्रकृच्छ्रेजातेतदानींकीदृग्विधाशांतिरितिचेत्प्रश्नः शातातपः पंचाक्षरीमूल
मनुंत्रिलक्षंकुरुतेयदि ॥ ततोहोमेनशांतिस्यान्मूत्रकृच्छ्रस्यनिश्चयइति ॥ ३२॥ होमः कीदृग्विधइतिविवक्षायांस्मृतिचंद्रिकायामुक्तं पंचाक्षर्यास्त्रिलक्षंजप
तिवावेपुनर्मूत्रकृच्छ्रेणमुक्तिःहोमंकुर्याद्दशांशंतिलमपिचततोगांप्रदद्यात्ताद्द्विजाय ॥ मुक्तस्तेनैवरोगाद्भवतिपुनरसौदीर्घमायुःसलब्ध्वान्यूनेचेन्मृत्युरेवेत्युदितम
भिमतंसर्वशास्त्रेषुसारमिति ॥ ३३ ॥ विस्तरोन्यत्रबोध्यः अधुनागजदानप्रतिग्रहमुद्दिश्यप्रायश्चित्तंनिर्दिश्यते त्रिकांडमंडनः गजदानेयोददातिसोश्वमे
धफलंलभेत् ॥ प्रतिगृहीतानरकंयातिनह्यत्रसंशयइति ॥ ३४ ॥ ननुगजदानंदुर्दानंनभविष्यतीतिव्यवस्थितासिद्धयांततःपातककुतःसमापन्नमितिवि
वक्षायांकात्यायनआह मतंगजस्यदानंचेत्दुर्दानंनभविष्यति ॥ पुण्यदंयदितत्प्रोक्तंदातुरेवनसंशयइति ॥ ३५ ॥ अतोगृहीतुर्दोषएवेतिसुव्यक्तमेतत्धृद
यदिवोदासः गजदानंमहादानंमहादोषाकरंस्मृतं ॥ प्रतिगृहीतायदिचेत्प्रायश्चित्तीपतेन्नरइति ॥ ३६ ॥ किंतस्यविहितंप्रायश्चित्तमितिविवक्षायांलोगा
क्षिराह गजप्रतिग्रहंकृत्वाकाशीयात्रांसमाचरेत् ॥ गंगास्नातंप्रकुरुतेतस्यदोषःप्रशाम्यतीति ॥ ३७ ॥ तदनेनवचनेनमहापातकाश्रयतयाबंधूनादर्श
नाभावोविवक्षितइतिबोध्यः यदाहभागुरिः गजप्रतिग्रहोयस्यतन्मुखंनामिरीक्षयेत् ॥ सार्धद्विवत्सरंसर्वैर्बंधुभिर्नात्रसंशयइति ॥ ३८ ॥ ननुगंगास्नानेकृते
कीदृग्विधप्रायश्चित्तविधिरितिविवक्षाजायते चरेत्सांतपनंकृच्छ्रंयोमतंगप्रतिग्रही ॥ तेनमुक्तोयदिभवेद्वन्हिहोमेसमर्हतीति ॥ ३९ ॥ सांतपनंलक्ष
णंगार्ग्येणोक्तं पूर्वेद्युरुपवासःस्यात्पंचगव्यंपरेहनि ॥ प्राशयित्वासांतपनंपरेद्युरुपवासतइति ॥ ४० ॥ वन्हिहोमोवासिष्ठेनोक्तः बिल्वस्यलक्षहोमस्यात्रि
लक्षंतुतिलाहुतिः ॥ चरुणासमिदाज्येनत्रिलक्षंहोममाचरेत् ॥ ४१ ॥ पंचाक्षरेणमंत्रेणकुंजरस्यप्रतिग्रहात् ॥ मुच्यतेनात्रसंदेहोवासिष्ठवचनंयथेति
॥ ४२ ॥ यदिप्रायश्चित्तंनाचरतिजन्मांतरेकःकर्मविपाकइतिविवक्षायांबादरायणआह भवेद्भगंदरोव्याधिर्गजदानप्रतिग्रहात् ॥ तिलायुतप्रकुरुतेसौ
वर्णंतद्दात्यपोति ॥ ४२ ॥ किमतिप्रलापनेत्युपरम्यते सर्वत्रशांतिप्रकरणेश्रोत्रियायगांदद्यादाचार्यायगांदद्यादितिश्रूयते तदेतस्यगजप्रति
ग्रहस्यप्रायश्चित्तमास्तिनोतिसंदेहः व्यासः दीयमानांप्रगृण्हातियोसावुभयतोमुखीं ॥ तदीयामपितत्सर्वैर्निरयंयात्यसंशयमिति ॥ ४३ ॥

त्प्रातिगृण्हातिदद्यात्यकांक्षायचेति ॥ ५० ॥ अत्रेदंप्रायश्चित्तविषयेधाहहोमिकाय वृद्धगार्ग्यः शिवस्यप्रतिबुधोधातिकप्रतिभवेत ॥ [illegible]
होमैर्मुच्यतेगोप्रतिगृहीतिति ॥ ५१ ॥ स्मृतिचिंतामणौ प्रतिग्रहंयःकुरुतेद्विजेंद्रःउपोष्यतस्मिंदिवसेपरस्तात् ॥ जुहोतियोबिल्वदलाक्षतेनसमुच्यतेगोग्रहणस्य
दोषादिति ॥ ५२ ॥ वृद्धमनुः गोप्रतिग्रहतोदोषान्मुच्यतेनियतोयदि ॥ जप्त्वासहस्रंगायत्रींसपूतोभवतिध्रुवमिति ॥ ५३ ॥ विस्तरोन्यत्र
मृग्यइतिदिक ब्राह्मणमनूद्यप्रायश्चित्तप्रकरणेप्रक्रांतेसंध्यालोपस्यब्राह्मणाधिकरणतयातत्प्रायश्चित्तंनिर्दिश्यते गोभिलः राजाज्ञायांराष्ट्रबाधेसंध्यालो-
पोभवेद्यदि ॥ प्रायश्चित्तंनचेतत्स्यादितिचेदत्रकीर्त्यते ॥ ५४ ॥ अर्धकृच्छ्रंप्रकुर्वीततत्पापस्यनिवृत्तये ॥ त्रिंशत्सहस्रंरुद्रस्यगायत्रीजपर्द्यंतइति
॥ ५५ ॥ नन्वेतादृश्यप्रायश्चित्तंकियत्सुदिनेषुकीदृक्प्रकारमितिविवक्षायां लौगाक्षिराह एकसंवत्सरंयत्रसंध्यालोपोभविष्यति ॥ ब्राह्मणस्यतदानीं
स्यात्प्रायश्चित्तविधिःपरइति ॥ ५६ ॥ ननुकोयंसंध्योपशब्दार्थःकालावछिन्नत्वंवाअकालावछिन्नत्वंवाअथवात्यागएववा अत्रकश्यपः उत्तमासूर्यसहि [६]
तामध्यमालुप्ततारका ॥ अधमातारकोपेतासायंसंध्याप्रकीर्तिता ॥ ५७ ॥ उत्तमातारकोपेतामध्यमालुप्ततारका ॥ अधमासूर्यसहिताप्रातःसंध्याप्रकी
र्तितेति ॥ ५८ ॥ अयमभिप्रायः राजसदोदेवोत्सवाक्षिप्तुयादिकालातिक्रमःतदानींभिन्नत्वसमानाधिकरण्यतयासंध्यालोपेनप्रायश्चित्तविधिः एतदा
हगार्ग्यः देवालयेसंभामध्येयात्रायांराजसंनिधौ ॥ संध्यावंदनविछित्तिर्नदोषायकदाचनेति ॥ ५९ ॥ तथाप्येतत्समाधेयं राज्ञोनिगलबंधना

द्गुमस्रगालसारणात्म्लाभोभवतियद्यपितथापियथाकथापितिधिपत्रासंगत्तारव्याधिकरणधर्ममाश्रित्यप्रायश्चित्तंसंपादयेदिति एतदाहपैठीनसिः संवत्सरांते
यस्यकयापिविधयाशोधत ॥ संध्यालोपःसायंप्रातप्रायश्चित्तमर्हतीति ॥ ६० ॥ प्रायश्चित्तविधानंस्मृतिचिंतामणावुक्तं संध्यालोपोभवेद्यत्रनिगलमुखम-
हाविप्लवैस्तस्याकार्यंप्रायश्चित्तंयथापद्धतितदिहचेत्सुरुद्रगायत्रीहोमः ॥ तत्राज्यंबिल्वपत्रैःसतिलंमधुयुतंहोममेकंतुलक्षंकृत्वैवंविप्रमुक्तोभवतिविधिरयंशा
स्त्रमार्गानुसारीति ॥ ६१ ॥ विस्तरोनिर्णयादिनकरादृष्टव्यः कस्यचिद्बालिश्यस्यपातकाविदुषोरजस्वलागमनेनिकपातंतत्प्रायश्चित्तंकिमितिविवक्षायांकात्या
यनआह रजस्वलांसकृद्गच्छेत्सकृद्वाकाममोहितः ॥ प्रायश्चित्तंविनिर्दिष्टंतस्यास्तीतिविनिश्चयइति ॥ ६२ ॥ सूत्रकारोप्याह रजस्वलायांस्वयोषिति
सकृद्गतावात्रिरात्रंघृतप्राशनमिति अत्रैवपैठीनसिर्विशेषमाह स्वयोषितंसवर्णांवाथोविप्रःकाममोहितः ॥ रजस्वलांसकृद्गच्छेत्त्रिरात्रोपोषणंततमिति
॥ ६३ ॥ नन्वेतदल्पीयःप्रायश्चित्तंकिमिदंनिर्धार्यतइतिविवक्षायांगोभिलेनोक्तं प्रायश्चित्तंतुवाग्दोषेस्वल्पेनैवप्रशाम्यति ॥ पतितंयदिसाक्षाच्चेत्प्राय
श्चित्तंतुसत्तमाति ॥ ६४ ॥ भृगुर्याज्ञवल्क्यः रजस्वलांस्पृशेद्यस्तुःरेतःसेकंकरोतिचेत् ॥ सागरःस्नानतःशुध्येत्प्रायश्चित्तविधानतइति ॥ ६५ ॥
[illegible]

र्येणात्रैवैयाधिकरण्येप्रायाश्चित्तमुद्दिष्टं मार्जारश्चाथमंडूकसर्पस्तोविप्रजातयः ॥ हत्वासंस्कारमर्हतितेनपापंमहत्तरामीते ॥ ७१ ॥ संस्कारमर्हतीत्युक्त्या
दहनादिक्रियायोग्यतालक्ष्यते एतदाहशातातपः दहनादिक्रियांकुर्युःसर्पमार्जारयोस्तथा ॥ मंडूकस्याथकाकस्यहतसतियथाविधीति ॥ ७२ ॥ तेनगोव
धप्रायश्चित्तोद्देशतदेकदेशप्रायश्चित्तंयुक्तमुत्पश्यामः एतदाहवृद्धमनुः प्रायश्चित्तंप्रकुर्वीतियेहत्वासर्पजातयः ॥ पुण्यक्षेत्रेषुगमनंकृत्वापातकिनोनरइति
॥ ७३ ॥ एतदेवाभिमेत्यवृद्धवसिष्ठआह उपपातकसंघातेवधेयंप्राणिदोषजा ॥ क्षौरपूर्वेणविधिनातिलहोमेनशुध्यतीति ॥ ७४ ॥ अत्रविस्तरोवक्तव्यो
यदिनावकाशइत्युपरम्यते अधुनाअयाज्ययाचकप्रायश्चित्तंनिर्दिश्यते लोगाक्षिः ब्राह्मणाक्षत्रियाविश्याश्त्रयोब्राह्मणयाजकः ॥ तदन्योन्योयजेद्यस्तुसपापी
नात्रसंशयइति ॥ ७४ ॥ पैठीनासिः अयाज्ययाजकंदृष्ट्वाभानुमतांविलोकयेत् ॥ अन्यथापातकस्यास्यप्रायश्चित्तंनविद्यतइति ॥ ७५ ॥ अत्राभानुमंतं
विलोकयेदित्युक्तंयोयमर्थवादइतिवक्तुशक्यइतिचेत्भ्रमः अयाज्ययाजकोविप्रःकुंभीपाकेनिपात्यते ॥ ततोजन्मांतरेकाकयोनिप्राप्नोत्यसंशयइति ॥ ७६ ॥
अतएवायमनार्थवादइत्यर्थः तथाहिवेदाध्ययनंवेदकृत्…र्णिकानामेवयुक्तं यद्यतिशये ब्राह्मणेष्वेव तथाविधब्राह्मणाचारमुल्लंघ्ययोविप्रःपातकमाचरतितस्यै
…गाकारशासनविशेषं कात्यायनः निर्दोषावेदमंत्रायेसदोषायन्मुखात्स्मृताः ॥ तंपरित्यज्यगच्छातिमृत्युकालेनसंशयइति ॥ ७७ ॥ तेनेदमत्रविज्ञेयं यवै
दोकंकर्मत्रैवर्णिकार्हंशूद्रेष्वाचरतिसब्रह्महत्याकृत्समःशूद्रोतितरांनरकंयातीत्यत्रा…मुक्तव्यं अनर्हकर्मकर्तृत्वात् अतआहव्यासः अनर्हकर्मकरणेयमशासन
भीरित ॥ क्रिमिकीटादियोनौतुनरकांतेभविष्यतीति ॥ ७८ ॥ यद्यपि…विद्वानीययाकयापिविधयायाज्ययाज्यकःतस्यप्रायश्चित्तमल्पतरंनिर्दिश्यते
त्रिकांडमंडनोपि गिरिप्रस्रवणंकृत्वाज्ञात्वाप्रत्यहमेवतु ॥ अयाज्ययाजका…वान्मुच्यतेनात्रसंशयइति स्मृतिचिंतामणौ कृच्छ्रपराकंयदिवाचरेताप्ययाज्य
याजीयदिसोमयाजी ॥ समुद्रगायामभिमज्यमानोमासाद्विमुक्तिंप्रजतीतिसत्यामिति ॥ ७९ ॥ वृद्धगार्ग्यः अयाज्ययाजकोविप्रःमासमेकंव्रतंचरेत् ॥ जप्त्वा
तुरुद्रगायत्रींतिलहोमंततश्चरेदिति ॥ ८० ॥ यद्यप्यत्राविशेषः…यावक्तव्यहेमाद्रौस्थितमितिदिक् आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये ॥ पूर्णोद्वितीय
उल्लासःकाम्यकांडेशुभावहः ॥ ८१ ॥ इतिश्रीआनंदगिरिस्वा…भेते स्मृतिसारसमुच्चये काम्यकांडेद्वितीयउल्लासः

निर्गुणःसगुणोप्येषविघ्नराजोजगद्गुरुः ॥ आदौसंपूज्यतेयस्मात्तंवंदेकरुणालयं ॥ १ ॥ अधुनाअभक्ष्याभक्षणप्रायश्चित्तंनिर्दिश्यते मांडव्यः अभक्ष्यभक्षणंकृत्वाब्राह्मणःपतितोभवेत् ॥ अपांक्तेयोयमित्युक्तोबंधुभिस्त्यज्यतेतरामिति ॥ २ ॥ ननुअभक्ष्याभक्षणंकृत्वेतिव्याख्यातं यागेपशुपुरोडाशभक्षणेकुतःपातकमितिचेत्ब्रूमः वृद्धवासिष्ठः स्वर्गाययागःक्रियतेयजमानःपवित्रतां ॥ यातितेनाऽस्कर्तव्यंप्रायश्चित्तंकथंचनेति ॥ ३ ॥ ननुकिमत्राभक्ष्याभक्षणंयागेकथंतन्निमित्तंप्रायश्चित्तमितियदुच्यतेतदत्रमनूद्यवृद्धगार्ग्यआह पश्वालंबनमेतद्धिश्रुतिसिद्धंपुरातनं ॥ हुतशेषंप्रगृण्हातिदीक्षितोनात्रसंशयइति ॥ ४ ॥ अत्रेयंस्वरूपपरतानिर्दिश्यते हृदयस्याग्रेवद्यत्यथजिव्हायाअथवक्षसइति तत्तदवदानतत्तद्दैवतेभ्योविधीयते यस्मिन्कर्मणियन्मुख्यतमंद्रव्यंतत्हुतशेषंतस्मिन्गृहीतंदीक्षितेनायंदोषःप्रतिभातीत्यर्थः तथापिब्राह्मणानामभक्ष्यरूपतयायागंकृत्वापश्चात्प्रायश्चित्तंनिर्देष्टव्यमित्यर्थः प्रायश्चित्तंकीदृशमित्यपेक्षायांशातातपआह यागीयपशुहिंसांपुरोडाशस्यभक्षणे ॥ पुण्यक्षेत्रंसमासाद्यप्रायश्चित्तंसमाचरेदिति ॥ ५ ॥ पैठीनसिः आपावमानमंत्रेणसमिदाज्यचरून्हुनेत् ॥ छागस्यहुतशेषस्यभक्षणाच्छुध्यतेद्विजइति ॥ ६ ॥ किंबहुनेत्युपरम्यते फलोद्देशेनव्रतमाचरतांकयापिविधयातत्परित्यागेकिंप्रायश्चित्तमितिविवक्षायांनि-र्णीयते वृद्धवासिष्ठः चतुर्थ्यामिंदुवारेचतथाभार्गववासरे ॥ एकभुक्तंचरन्विप्रःपुण्यमानंत्यमश्नुतइति ॥ ७ ॥ वृद्धगार्ग्यः एकादश्याममायांचसोमवत्सरएवच ॥ उपवासंप्रकुर्वाणःफलंचानंत्यमश्नुतइति ॥ ८ ॥ एतादृशेउपवासैकभुक्तादौनियमोयुक्ततरः एतदाहशाट्यायनिः जन्मव्रतंप्रकुर्वंतितेषांलोपोभवेद्यदि ॥ सप्रायश्चित्तमर्हतिनात्रकार्याविचारणेति ॥ ९ ॥ गोभिलः जन्मव्रतस्यनियमंपरित्यज्यभुनक्तियः ॥ रौरवेघोरनरकेमज्जत्याचंद्रतारकमिति ॥ १० ॥ ननुकृतव्रतस्यमध्येज्वरादिबाधायांस्वाधीनताभावेनयद्युपघातोभवतितत्रकिंप्रायश्चित्तमितिविवक्षाक्रियते वृद्धयाज्ञवल्क्यः अत्यापादिविनष्टेतुनियमेयेनकेनचित् ॥ प्रायश्चित्तंविधायैवपुनरारभतेबुधइति ॥ ११ ॥ वृद्धमनुरपि यद्देवतासमुद्देशाद्व्रतलोपोभविष्यति ॥ तदुद्देशेनकर्तव्यंप्रायश्चित्तंनसंशयइति ॥ १२ ॥ प्रायश्चित्तविधिर्हेमाद्रौप्रतीयते उपोष्यैकादिनंमर्त्योव्रतलोपोभवेद्यदि ॥ पंचगव्यंप्राशयित्वागोदानेनाविशुध्यतीति ॥ १३ ॥

पंचयोजनाद्गत्वापंचविंशतिकृच्छ्रभागिति ॥२०॥ वृद्धहारीतः विष्णुक्षेत्रेशिवक्षेत्रेसर्वपातकनाशने ॥ शतयोजनतो [illegible]
क्षिः प्राजापत्यसांतपनंभवेद्गोकर्णयात्रया ॥ दशयोजनतोगत्वापातकैःपरिमुच्यतइति ॥२२॥ पैठीनसिः कृच्छ्रातिकृच्छ्रमुद्दिष्टंकाशीगमनतोनृणां ॥ योजनात्स
हस्रशतःपातकानांविमोचनमिति ॥२३॥ गोभिलः शतसेतुंहृदाद्गच्छेत्पातकीभक्तिभावतः ॥ चांद्रायणोलभेन्नूनंत्रिंशद्योजनतोव्रजन्निति ॥२४॥ कात्यायनः
क्षेत्रेषुभास्करक्षेत्रंपातकानांविशुद्धिकृत् ॥ शतयोजनतोगत्वासर्वकृच्छ्रफलंलभेदिति ॥२५॥ पराशरः सेतुस्नायीनरोयस्तुसर्वपापैःप्रमुच्यते ॥ कृच्छ्रातिकृच्छ्र
मुख्यानिद्विशताद्योजनाल्लभेदिति ॥२६॥ स्मृतिचिंतामणौ गोकर्णेरामसेतौव्रजतियदिनरःपातकीयोपिकाशीं । दूरादेवोपवासाद्यखिलनियमयुङ्मुच्यतेपा
तकेभ्यः ॥ पंचाशद्योजनानांयदिगमनमिहप्राप्यतेपुण्ययोगात् । कृच्छ्रंचांद्रायणाद्यंविधिविहितमनेनोतिसिद्धंकृतंस्यादिति ॥२७॥ शेषस्यहेमाद्रौविलिखितत्वा
त्तत्रप्रदर्शयामः क्षेत्रकृच्छ्रानंतरंनदीकृच्छ्रप्रायश्चित्तंनिर्दिश्यते गार्ग्यः पातकीयोव्रजेद्गंगांशतयोजनतःपथि ॥ कृच्छ्रंचांद्रायणंपूर्णंलभतेनात्रसंशयइति ॥२८॥ [८]
गालवः कृष्णांनदींसमुद्दिश्ययोयःकृच्छ्रजातिव्रती ॥ त्रिंशद्योजनतोदूरंकृच्छ्रंसांतपनंलभेदिति ॥२९॥ वृद्धवासिष्ठः गौतमीमघकाद्विप्रःपंचाशद्योजनाद्व्रजेत् ॥ ल-
भेत्ससकृच्छ्रंतुपातकैःपरिमुच्यतइति ॥३०॥ वृद्धमनुः तुंगभद्रांसमुद्दिश्यभक्तियोगेनयोव्रजेत् ॥ दशयोजनतोदूरात्स्यादकृच्छ्रंसमाप्नुयादिति ॥३१॥ वृद्ध-
याज्ञवल्क्यः योव्रजेदघकाद्विप्रस्ताम्रकर्णींप्रभातिभाक ॥ पंचाशद्योजनात्दूरंपादोनंकृच्छ्रमाप्नुयादिति ॥३२॥ लौगाक्षिः कावेरींभक्तियोगेनत्रिंशद्योजनतोव्र-

जेत् ॥ प्राजापत्यंकृच्छ्रमेकंलभतेनात्रसंशयइति ॥३३॥ ब्रह्मांडपुराणे यमुनांयोव्रजेद्भक्त्यापंचाशद्योजनावधि ॥ कृच्छ्रातिकृच्छ्रंलभतेपातकीनात्रसंशयइति ॥
॥३४॥ स्कांदपुराणे नर्मदांयोव्रजेन्मर्त्यःसंकल्पंहृदिभावयन् ॥ चत्वारिंशद्योजनेनसौम्यकृच्छ्रंसमश्नुतइति ॥३५॥ महागणेशपुराणे शोणभद्रांसमुद्दिश्ययो
यात्रार्थंव्रजेत्सुधीः ॥ कृच्छ्रपराकंलभतेपंचाशद्योजनाद्व्रजोदिति ॥३६॥ कालिकापुराणे अघकृच्छ्रेत्सदाचारोयोभक्त्याफल्गुनींव्रजेत् ॥ षष्टियोजनतोदूरंचांद्रा
यणफलंलभेदिति ॥३७॥ विष्णुपुराणे भक्त्याभानुमतींगच्छेत्सकृत्पातकवान्नरः ॥ चत्वारिंशद्योजनेनयातिचांद्रायणंलभेदिति ॥३८॥ भविष्योत्तरपुराणे
हरिद्रतांनदींपुण्यांपातकीयदिगच्छति ॥ चत्वारिंशद्योजनेनोशिशुचांद्रायणंलभेदिति ॥३९॥ वराहपुराणे पातकंमहदुद्दिश्ययोभक्त्यागंडकींव्रजेत् ॥ कृच्छ्रा-
तिकृच्छ्रमुख्यानिशतयोजनलोकभेदिति ॥४०॥ एवमन्यान्यपिवचनानिहेमाद्र्यादौतत्रयानालिख्यते नदीकृच्छ्रप्रायश्चित्तानंतरंसमुद्रकृच्छ्रंनिर्दिश्यते कात्यायनः
दशयोजनतोगत्वासमुद्रेस्नातियोनरः ॥ लभेत्सांतपनंकृच्छ्रंपातकीनात्रसंशयइति ॥४१॥ गोभिलः स्नानार्थंयोव्रजेद्भक्त्यानरोविंशतियोजनात् ॥ सागरंतस-
कृच्छ्रंसात्तेनलब्धंनसंशयइति ॥४२॥ लौगाक्षिः त्रिंशद्योजनतोगच्छन्सागरेस्नातिमानवः ॥ पादकृच्छ्रंभवेन्नूनंपातकीनात्रसंशयइति ॥४३॥ वृद्धगार्ग्यः अर्ध-

शववाहस्यसंसर्गंयःकरोतिद्विजाधमः ॥ सोपित्याज्यःप्रयत्नेनगार्ग्यस्यवचनंयथेति ॥ ५४ ॥ अत्रशववाहकस्यत्रिवत्सरात्पूर्वंपातकंनास्तीत्यापातित
तथापितस्यसूतकादिकमास्तिनेतिसंदेहः आश्वलायनः त्रिदिनसूतकंकृत्वापंचगव्येनशुध्यति ॥ शवस्यवाहकाद्विप्रस्त्रिवर्षात्पूर्वमेवात्विति ॥ ५५ ॥ यद्वचनेन
वचनेनात्रिवत्सरात्पूर्वंपंचगव्येनशुद्धिरुक्तासाप्यगतिकशववाहकविषयामिति स्मृतिनिबंधनविदआहुःकात्यायनः बंधवोयस्यदायादाःनसंतिचमृतोयदि ॥
अनाथतंद्विजंदग्ध्वाकोटियज्ञफलंलभेदिति ॥ ५६ ॥ तदेतद्वचनमवलंब्यदोषाकरत्वंनिषिद्धं वृद्धयाज्ञवल्क्यः त्रिवत्सरादुत्तरेणप्रत्यहंशववाहकः ॥
गंगास्नानेनसंशुद्धोभवतीतिविनिश्चयइति ॥ ५७ ॥ वृद्धमनुः योविप्रःकामकारेणशववाहंकरोतिचेत् ॥ सागरस्नानतःशुद्धोभवतीतिविनिश्चयइति
॥ ५८ ॥ आंगिराः रुद्रगायत्र्याकुर्यात्सहस्रंतुतिलाहुतिः ॥ शववाहकदोषेणमुच्यतेनात्रसंशयइति ॥ ५९ ॥ एवमन्यान्यपिवचनानिनिबंधनस्थानियोज्या
नि देशांतरागतस्यसंस्कारात्द्वाविंशतिवत्सरात्परमितिसूत्रानुरोधेनकृतसंस्कारस्यजीवतःपुनरागमने भार्यायांजीवत्यांप्रायश्चित्तमस्तिनेतिविचार्यते शाता
तपः देशांतरादागमनेसंस्कारेसतिजीवति ॥ प्रायश्चित्तंकिमस्तीतिनास्तीत्येवनहिसंशयः ॥ ६० ॥ घृतकुंडेनिमज्जैनंगोगर्भाद्योनिमस्यच ॥ गर्भाधाना
दिसंस्कारंविवाहांतंसमाचरेदिति ॥ ६१ ॥अत्रवासिष्ठेनोक्तं तीर्थस्नानादिकंकृत्वाकृच्छ्राद्यन्यतपश्चरेत् ॥ कृत्वाविवाहांतकृत्यंसशुध्यतिनसंशयइति ॥ ६२॥
गौतमः देशांतरादागतस्यत्वज्ञानात्कृतकर्मणः ॥ पुनर्जन्मादिसंस्कारैःशुद्धिर्भवतिनान्यथेति ॥ ६३ ॥ वृद्धयाज्ञवल्क्यः शिखांतंघृतकुंडेनतदुन्मज्जनतः
परं ॥ संस्कारेणविशुद्धःस्यान्नान्यथातीर्थकोटिभिरिति ॥ ६४ ॥ अत्रहेवंव्यवस्थापनीया देशांतरादागमनंयदिजातंतस्यपुण्यक्षेत्रगमनादिनातीर्थयात्र
याचविशुद्धदेहस्यनतस्तदुक्तप्रायश्चित्तरीत्याकृच्छ्राद्यन्यतमेष्वेकंनिर्दिश्यहोमसहितंकृत्वाततःपूतोभवतिपरलोकादागतोयमितिविज्ञायघृतकुंडेनिमज्जयित्वागो
गर्भजननंविधायजातकर्मादिविवाहांतंसर्वाःक्रियाःकारयेयुरिति वृद्धगार्ग्यः सर्वाःक्रियाःप्रकुर्वीरन्देशांतरगतस्यहि ॥ पुनर्जातोयमित्येवजानंत्येवविचक्ष
णाइति ॥ ६५ ॥ स्मृतिरत्नाकरे विप्रोदेशांतरस्थोभवतियदिपुनःस्वस्यगेहेऽजनिष्टसंस्कारंसर्वमस्यप्रथिततावधितयाशास्त्रतोनिर्दिशेच ॥ प्रायश्चित्तंगहे
मांचितरतिमनुनाविश्वतश्चक्षुरस्माल्लक्षंव्रीह्याज्ययुक्तंतिलमपिसपुनर्बंधुभिःस्वीक्रियेतेति ॥ ६६ ॥ एतावताव्यवहारेणसिध्यत्येवंप्रपंचइतिविस्तरधीसमा
कर्षणेन प्रेतभोजनेकृच्छ्रपराकंवाकुर्यादितिसंप्रदायः एतदाहवृद्धगार्ग्यः कृच्छ्रपराकंकुर्वीतद्विजश्चेत्प्रेतभोजने ॥ अन्यथापांक्तिसाह्यासौब्राह्मणैर्नयुज्यतइति॥६७॥

लोमशः सपिंडीकरणेचैवमेकोद्दिष्टमथापिवा प्रेतभोजनमुद्दिष्टंभुक्त्वाचांद्रायणंचरेदिति ॥ ६८ ॥ तदयंनिर्गलितार्थः सपिंडीकरणमंतराप्रेतत्वंननिवर्तते
द्वादशेऽन्हिसंस्कारांतेवाकुर्वंतीतिव्यवस्थेति जाबालिः संवत्सरांतेकर्तव्यंसपिंडीकरणंबुधैः ॥ अथवाद्वादशेऽन्हिस्यात्संकोचमवलंब्यत्विति ॥६९॥ तदयमर्थः
विस्तरपक्षःसंकोचपक्षइति पक्षद्वयंसंवत्सरांत्यकरणंविस्तरपक्षः अथवाद्वादशमासाःसंवत्सरइतिश्रुतिमवलंब्यद्वादशमासेषुव्यतीतेषुकर्तव्यइतितेनमार्गेण
पक्षांश्चमासांश्चदिनमितिऱ्हाससिद्धिरिति ऱ्हासावधिपक्षेद्वादशेऽह्निकर्तव्यताप्रतीयते तस्मिन्सपिंडीकरणभोजनेप्रायश्चित्तंनिर्देष्टव्यं ननुब्राह्मणावधायकं
श्राद्धब्राह्मणैरेवभोक्तव्य तत्कथंप्रायश्चित्तमर्हतीतिचेन्न लोभवशाद्धुक्ततःप्रायश्चित्तप्रतीयते एतदाहपैठीनसिः एकादशेद्वादशेह्नियच्छ्राद्धंप्रेतभोजनं ॥
तल्लोभाद्ब्राह्मणोभुक्त्वाव्रतंचांद्रायणंचरेदिति ॥ ७० ॥ तदत्रनियततयाव्यवस्थाक्रियते संवत्सरमध्येविप्रेणप्रेतभोजनंलोभाद्दारिद्र्याद्वाकरोतिसतटाकतीरं
गत्वाक्षौरंविधायतिलांजुहोतीति एतदाहकात्यायनः संवत्सरेतुकुरुतेद्विवारंप्रेतभोजनं ॥ क्षौरपूर्वंजुहोत्येषतिलान्व्याहृतिपूर्वकानिति ॥ ७१ ॥ अत्रजुहो
तीतिक्रियायाःसंख्यानियमोनोद्दिष्टइतिशतमेवाहुतिःप्रतीयते शौनकः व्याहृत्यातुतिलैर्होमःशतंस्यात्प्रेतभोजने ॥ आहुतेरेवमुद्दिष्टंनन्यूनमधिकंततइति
एतेनशतमेवाहुतिर्भवतीतिनिर्देष्टव्यमायुष्मता भगिनीगमनप्रायश्चित्तमाह देवलः रेतःसेकंप्रकुरुतेभगिनींकाममोहितः ॥ कुंभीपाकेवसेत्पापीकुयोनौकुक्कु
टोभवेदिति ॥ ७३ ॥ पैठीनसिः एकोदरेसमुत्पन्नाभगिनीदेवतासमा ॥ तांश्लाघ्यांयःस्पृशेन्मूढोनारकीयातनांव्रजेदिति ॥ ७४ ॥ यदेताभ्यांवचनाभ्या
मात्मभगिन्यागमनंनरकहेतुरित्यवसीयते तदेतादृशात्मभगिनीगमनपातकस्यप्रायश्चित्तंखंडमरीचावुक्तं भगिनीगमनंकृत्वाविप्रःकाश्मीरमंडले ॥ गोकर्णं
क्षिप्रमेवाशुगत्वापापैःप्रमुच्यतइति ॥ ७५ ॥ कात्यायनः यआत्मभगिनींगच्छेद्द्विप्रोगोकर्णमंडले ॥ काशींप्राप्यविमुच्येतनान्यथातीर्थकोटिभिरिति ॥ ७६ ॥
त्रिस्थलीसेतौ सेतुमंडलमध्यस्थोयआत्मभगिनींव्रजेत् ॥ काशीगोकर्णयोरन्यतरक्षेत्रेविशुध्यतीति ॥ ७७ ॥ तत्रविधेयंप्रायश्चित्तंकीदृगितिविवक्षायांस्मृति
चिंतामणावुक्तं स्नात्वागोमयकूपमभ्यान्निलयःक्षौरंविधायात्मन। स्तत्रोपोष्यपरेऽन्हिसाधुकुरुतेवन्हौसमाराधनं ॥ शंभोरेवविमिश्रिताक्षततिलैःपंचाक्षरेणाहु
ना ॥ गोदानंप्रददातितेनाविगताऽघोजायतेसर्वथेति ॥ ७८ ॥ दिनकरग्रंथेविशेषस्थितइतिसिद्धिक यद्यत्रात्मभगिनीमभिगंतुः प्रायश्चित्तमभिहितंतर्हितस्या
कामकारायाःकिंप्रायश्चित्तमितिविवक्षायांब्रह्मांडपुराणेभिहितं भगिनीभ्रातरंयत्नाद्व्रजेद्वाकाममोहिता ॥ तेनोपपतिनासाकंनरकेपच्यतेचिरमिति ॥ ७९ ॥

कृतेस्मृतिसारसमुच्चये काम्यकांडेतृतीयउल्लासः ॥ स्वस्ति ॥

चतुर्भुजंविशालाक्षंशुंडामंडितविग्रहं॥ शूर्पकर्णमहाकुक्षिंवंदेविघ्नपतिंमुदा ॥ १ ॥ गणिकायांद्रव्यसंपत्तियुतायांतत्रादीयमानवसुनायोविप्रोजीवति तस्यप्रायश्चित्तंकिमितिविवक्षायां कात्यायनआह प्रतिग्रहंतुसर्वत्रविप्रश्चेत्कुरुतेयदि ॥ वेश्याप्रतिग्रहोनैवकर्तव्योयेनकेनचिदिति ॥ २ ॥ मांडव्यः वारस्त्रीधनमुद्दिश्यमहापातकमुत्थितं ॥ गृहीतंयदिविप्रेणप्रायश्चित्तीयतेततइति ॥ ३ ॥ जातूकर्णिः स्वमांसविक्रयंकृत्वाद्रव्यमार्जयतेतरां ॥ तद्द्रव्य मुपजीवंतितेमहापापिनःस्मृताइति ॥ ४ ॥ तदेतैर्वचनैर्वेश्याप्रतिग्रहोदुरवग्रहइति प्रायश्चित्तंनिर्दिष्टवयं वृद्धमनुः गणिकान्नंद्विजोभुंक्तेपापराशींभुनक्त्य सौ ॥ प्रायश्चित्तंप्रकुरुतेततःपुण्येनकर्मणेति ॥ ५ ॥ संवर्तः शिरसोवपनंकृत्वागणिकान्नंगृहीष्यति ॥ तप्तकृच्छ्रंचरन्सद्यःपातकैःपरिमुच्यतइति ॥ ६ ॥ शंखलिखितावाहतुः गणिकान्नंपातकान्नंनान्यदस्मात्परंस्मृतं ॥ शिरोमुंडीतकृच्छ्रान्मुच्यतेनात्रसंशयइति ॥ ७ ॥ स्मृतिचिंतामणौ रूपाजीवायदि दिशतितद्द्रव्यमादायभुंक्ते पुण्यक्षेत्रंव्रजतिचयतःक्षौरपूर्वोविधिःस्यात् ॥ कृत्वावन्हौविमलमनुनातत्रशंभोप्रसादाद्रांदत्वैवप्रभवतिपुनःशुद्धदेहीद्विजोयमि- ति ॥ ८ ॥ यदन्यत्सर्वनिर्णयमरीचौस्थितं धर्माधिकारप्रायश्चित्तमाह शातातपः धर्माधिकारंकुरुतेयःसमार्जयतेधनं ॥ श्वानयोनिशतंगत्वाचांडालोको

वृद्धगार्ग्यः पश्चाच्चित्तेनकर्तव्यप्रायश्चित्तंद्विजेनतु ॥ अन्यथाक्षीयतेनैवपापमित्येवनिश्चयइति २१ ननुवश्यागमनपातपुनादिहीनतयासिद्ध ...
दोषाकरत्वमितिचेन्न ॥ जात्यंतराविशिष्टतयाबहुजनसंसर्गवशेनपापभाजनतायानिवारयितुमशक्यत्वात् ॥ अन्यथाकुलटासाम्येनतदल्पतरप्रायश्चित्तयो-
ग्यत्वात् ॥ एतदाहमरीचिः ॥ सवर्णांकुलटांगच्छन्पातकंनैवाप्नुयते ॥ गणिकांनव्रजेत्नूनंबहुपापस्यभाजनमिति ॥ २२ ॥ स्मृतिचिंतामणौ योवे-
श्यागमनंकरोतिनियतंपश्चेनचित्तेनचे । द्रछेत्पुण्यतरंगिणीप्रथमहाक्षेत्रगताद्योभवेत् तत्रक्षौरविधिंविधायनियतंकृच्छ्रंचचांद्रायणं कृत्वाहोममपिप्रकृष्टमनु
नाशंभोर्गताद्योभवेदिति ॥ २३ ॥ आपस्तंबः समिदाज्यचरूनेवउपास्यैगायतानरः ॥ गणिकागमनाद्दोषान्मुच्यतेहोमकृन्नरइति ॥ २४ ॥ संवर्तोपि अश्व
त्थसमिधाहोमस्तिळसप्तशताहुतिः ॥ समिदाज्यचरून्कृत्वावेश्यागमनतः शुचिरिति ॥ २५ ॥ इदमेवेत्थंदिनकरग्रंथेस्थितमितिदिक् गर्भिणीगमनप्राय
श्चित्तंनिर्दिश्यते संवर्तः गर्भिणीगमनंकृत्वासागरः स्नानमाचरेत् अन्यथारौरवंयातिनात्रकार्याविचारणेति ॥ २६ ॥ गोभिलः संगाद्यायास्तुसरितः
सागरंयांतिसर्वतः सागरस्नानमात्रेणसर्वपापविशोधनमिति ॥ २७ ॥ प्रकारांतरेणप्रायश्चित्तंहेमाद्रावुदाहृतं ॥ अज्ञानाद्गुर्विणींगत्वाक्षौरंकृत्वायथाविधि
॥ २८ ॥ तिळहोमेनसंशुद्धोभवतीतिविनिश्चयइति ॥ २९ ॥ गर्भिणीगमनेभर्तुःप्रायश्चित्तोद्देशेनतत्पत्न्याअपिप्रायश्चित्तंनिर्देष्टव्यं देवलः पंचगव्यप्राश
यित्वागर्भिणीभर्तृसंगमात् ॥ मुच्यतेतिळहोमेनभर्तृपूर्वेणशुध्यतीति ॥ ३० ॥ स्मृतिचंद्रिकायां याभर्त्रारमतेस्वयंतुवानितामासाच्चतुर्थात्परं । सागर्भिण्य
घमाप्नुयातितितरांभर्तापिपाप्येवतत् ॥ भर्ताक्षौरविधिंविधायकुरुतेभार्यासमेताप्यसौ प्रायश्चित्तमिदंत्वमुष्याविहितयत्पंचगव्याशनमिति ॥ ३१ ॥ स्मृति
सारसर्वस्वे गर्भिणीस्वेच्छचारीचेत्चतुर्मासात्परंस्वयं ॥ भर्त्रासहसमाप्नोतिपातकंनात्रसंशयइति ॥ ३२ ॥ वृद्धगार्ग्यः चतुर्मासात्तुत्तरंचेद्गर्भिणीपातकं
तदा ॥ भर्त्रासहैवरमतेभर्तुरप्यघामिष्यतइति ॥ ३३ ॥ त्रिकांडमंडनः भर्तुःक्षौरंविधातव्यंभार्यायाःप्राशनंस्मृतं ॥ पंचगव्यस्यनियतंशास्त्रमेतद्विनिश्च
यइति ॥ ३४ ॥ वृद्धमनुराह प्रायश्चित्तंद्वयोःसाम्यंभर्तुःक्षौरंविशिष्यते ॥ भार्यायाःपंचगव्यस्यप्राशनंनात्रसंशयइति ॥ ३५ ॥ यदन्यद्विमृग्यंदिनकर

ग्रंथेस्पष्टं शय्यादानमतिदोषदुष्टमितितत्प्रतिग्रहेप्रायश्चित्तमुच्यते यदाहव्यासः शय्याप्रतिग्रहंकृत्वाचांडालीयोनिमश्नुते ॥ नारकींयातनांलब्ध्वाप्राय
श्चित्तंततश्चरेदिति ॥ ३६ ॥ वसिष्ठः गजदानंचाश्वदानंशय्यादानमितित्रयं ॥ एषांप्रतिग्रहेविप्रोनारकींयातनांलभेदिति त्रिकांडमंडनः शय्यांप्रतिग्रही
ताचेत्तन्मुखंनाभिरीक्ष्यते ॥ आषण्मासंबंधुभिश्चमहादोषोयमीरितइति ॥ ३८ ॥ कात्यायनः शय्याप्रतिग्रहेनूनंकाशीयात्रांसमाचरेत् गोकर्णयात्रामथवा
सेतुस्नानमथाचरेदिति ॥ ३९ ॥ वृद्धयाज्ञवल्क्यः गंगास्नानंसागरस्यस्नानंपुण्यनदीभवं ॥ हरत्यघमशेषेणशय्याग्रहणहेतुकमिति ॥ ४० ॥ तदेतैर्व
चनैःपातकस्यमहार्घ्यप्रयुक्ततयायात्रादौनिमित्तोद्देशेनप्रायश्चित्तांतरमस्तीतिप्रतिपन्नं वृद्धमनुः कृच्छ्रंचांद्रायणंकृत्वाशुचिशय्याप्रतिग्रहे ॥ समिदाज्यचरून्मंत्र
जुहोत्यापःपुनंत्विति ॥ ४२ ॥ वृद्धगार्ग्यः मानस्तोकेतिमंत्रेण तिलमाज्यांक्षतान्वितं ॥ जुहोतिभक्तियोगेनतूर्णंशय्याप्रतिग्रहीति ॥ ४२ ॥ स्मृतिरत्ना
करे शय्यादानमिदंसमस्तदुरितावासंद्विजोयोमुदा गृण्हात्येषससागरस्यनियतंस्नानंविधायान्वहं ॥ हुत्वावन्हिमुखेतिलाक्षतयुतंसाज्यंचहोमंततः। पू
तःपुण्यनदीतटाकसविधेगोदानमत्राचरन्निति ॥ ४४ ॥ अत्रहिऋणापकरणेशय्यादानग्रहणंनदोषायेतिस्मृतिमार्तंडाः गजदानंचाश्वदानंशय्यादानमितित्र
यं ॥ ऋणापकरणेगृण्हन्नदोषंभजतेद्विजइति ॥ ४५ ॥ तदप्येतद्वचनंयुक्तिवत्तयाप्रतिपन्नंतथापिकिंचित्प्रायश्चित्तमस्त्येवेतिसिद्धं यदाहजाबालिः ऋणा
पकरणंयत्रतिलहोमेनशुध्यति ॥ महादानस्यदोषेणमुक्तोभवतिनिश्चयइति ॥ ४६ ॥ विस्तरोहेमाद्रौस्थितइतिदिक् अधुनागोदानकृच्छ्रंनिर्दिश्यते वसिष्ठः
प्रायश्चित्तस्यकरणेयोसमर्थोभवेद्द्विजः ॥ गोदानंकुरुतेतत्रकृच्छ्रंसांतपनंभवेदिति ॥ ४७ ॥ वृद्धगार्ग्यः गोदानाद्वितयंयस्तुकरोतिप्रीतिपूर्वकं ॥ तस्यकृच्छ्र
स्यदशकंतेनचीर्णंनसंशयइति ॥ ४८ ॥ वृद्धमनुः ददातिभक्त्यायोविप्रोगोदानात्रितयंयदि ॥ तेनचीर्णंसप्तदशपादकृच्छ्रंनसंशयइति ॥ ४९ ॥ स्कांदपु
राणे पंचगोदानकृद्यस्तुप्रायश्चित्तांतमेवतु ॥ विंशत्यादीनकृच्छ्रंतुतेनचीर्णंनसंशयइति ॥ ५० ॥ शंकरसंहितायां प्राजापत्यासमर्थस्तुदशगोदानकृद्यदि ॥
पंचविंशतिसंख्यातंप्राजापत्यकृतंभवेदिति ॥ ५१ ॥ विष्णुसंहितायां कृच्छ्रातिकृच्छ्रमुद्दिष्टंपंचाशत्तेनसंशयः ॥ पंचविंशतिदानंयश्चरेद्भक्तिपूर्वकमिति ॥ ५२॥
यदत्रप्रायश्चित्तांगतयागोदानकृच्छ्रमुक्तं तदेतदगम्यागमनेष्वपिनिर्दिष्टंवेदितव्यं स्मृतिचिंतामणौ अगम्यागमनंकृत्वापातकैरभिताडितः गोदानकृच्छ्रतःशुध्येदिति
शास्त्रस्यनिश्चयइति ॥ ५३ ॥ स्मृतिरत्नाकरे गोदानंसर्वदानादतिशयितमिदंपातकेभ्योविमोक्षं । कांक्षंदद्याद्यथावद्विधिसहितविहितंदक्षिणापूर्व
विधेयं ॥ सालंकारंयदिष्टंभवतिमुनिमतंदक्षिणाभिश्चयुक्तं । मुक्तोसौकिल्बिषेभ्यःप्रतिनियतमिदंविष्णुवृद्धादिवाक्यमिति ॥ ५४ ॥

[१२] त्कृतस्यपुत्रीगमनस्यपारलौकिक[illegible]
तदाप्रायश्चित्तंसमर्हतीति ॥ ६१ ॥ स्वपुत्रीगमनंकृत्वास्वपुत्रीगमनंचरेत् ॥ तेनमुक्ताभवेन्नूनंपरलोकविशुध्यतीति ॥ ६२ ॥ [illegible]
द्विक कन्याविक्रयेपातकंमहदस्तीतितत्प्रायश्चित्तंनिर्दिश्यते कात्यायनः कन्यायाविक्रयंकृत्वानरकेप्रपतेध्रुवं ॥ सविप्रोनात्रसंदेहोयावदाचंद्रतारकमि
ति ॥ ६३ ॥ गोभिलः कन्याविक्रयदोषोहिमहानेषःप्रकीर्तितः ॥ पतंतिपितरः स्वर्गात्कन्याविक्रयदोषतइति ॥ ६४ ॥ अत्रेयंव्यवस्थाप्राजापत्येन
विवाहेनविधानंयुक्ततरं तदातिरिक्तश्चेदार्षेणविवाहेनकन्यांप्रादेशादिति एतदाहवृद्धगार्ग्यः आर्षोविवाहःकथितोरिक्तस्येतिविनिश्चयः ॥ गोविक्रयद्रव्य
मत्रगृहीत्वाप्रादिशेत्सुतामिति ॥ ६५ ॥ गोयुग्मविक्रयद्रव्यंगोद्वितयविक्रयद्रव्यमित्यर्थः एतस्मिन्नतथाहमांडव्यः सप्तनिष्कप्रमाणंतुगोद्वयस्यैवनिष्क्रयः॥
तावत्गृहीत्वाप्रदिशेद्विकश्चेत्स्वसुतांद्विजइति ॥ ६६ ॥ नन्वस्यप्रायश्चित्तमस्तिनवास्तेनास्तिसंदेहः दोषाधिकरणत्वेप्रायश्चित्तमस्त्येवेतियुक्तं व्यासः गोनिष्क [१२]
यद्द्रव्यमत्रगृहीतंचेत्तद्विजन्मना ॥ क्षौरपूर्वेणविधिनातिलहोमेनशुध्यतीति ॥ ६७ ॥ स्मृतितरंगिण्यांविशेषः कन्यानिष्क्रयमौल्यमार्जितमिदंपापाद्विकूटं
स्मृत त्यक्त्वागेहमतोव्रजेद्विजवरः क्षेत्रंमहेशाश्रयं ॥ क्षौरंतत्रविधायपुण्यदिवसेहुत्वातिलाज्याहुतिं यःपंचाक्षरमंत्रतोगतमहापापोभवेत्सर्वथेति ॥ ६८॥
वृद्धवसिष्ठः रश्चरणलक्षतुपवाश्चर्याः प्रकारयत् ॥ कन्याविक्रयदोषेणमुच्यतेनात्रसंशयइति ॥ ६९ ॥ अत्रेदंतत्वं यदिकन्याविक्रयतादौर्भाग्यहीनो

दोषमजानन्सपश्चात्पातपुण्यक्षेत्रंगत्वाक्षौरपूर्वेणविधिनापंचाक्षरपुरश्चरणेनातिलहोमेनशुध्यतीति युक्तमेतावत्याव्यवस्थित्या कस्यचिद्व्रणजाततत्रक्रिमि
पूतपक्षेषुव्रणेशांत्युत्तरं किंप्रायश्चित्तमितिचिंत्यते कात्यायनः व्रणेषुक्रिमयोयत्रजायंतेब्रह्मयोनिषु ॥ यावत्तच्छांतिरुदितातावत्सूतकमिष्यतइति ॥६९॥गोभि
लः व्रणेषुनिर्गिमितेनजातेषुद्विजजन्मसु ॥ प्रायश्चित्तंप्रकर्तव्यंशास्त्रदृष्टेनकर्मणेति ॥७०॥व्यासः शिरोमुंडनकंकृत्वाक्रिमिभक्षोद्विजोयदि ॥ प्रायश्चित्तंचरेत्प्रास्तः
शास्त्रदृष्टेनवर्त्मनेति ॥ ७१ ॥ वृद्धगार्ग्यः स्नात्वैवगोमयेकुंडेप्राशयेत्पंचगव्यकं ॥ क्रिमिभक्षेणसंशुद्धोभवत्येवनसंशयइति ॥ ७२ ॥ वृद्धमनुः यज्ञो
पवीतंधृत्वैवक्रिमिभक्षोद्विजोयदि ॥ पंचगव्यविधानेनक्षौरपूर्वेणशुध्यतीति ॥ ७३ ॥ वृद्धवसिष्ठः होमंकरोतिपितरांतिलैर्व्रीहिभिरन्वितैः ॥ पंचाक्षरेण
मंत्रेणक्रिमिभक्षोविशुध्यतीति ॥ ७४ ॥ आपस्तंबः क्रिमिभक्षंयदिप्राप्तोद्विजोसौशुध्यतेतरां ॥ पंचगव्येनहोमेनशिवपंचाक्षरेणचेति ॥ ७५ ॥ केचि
दाहुरत्रविष्णुगायत्र्याहोमइति तदपियुक्तमुत्पश्यामः एतदाहदेवलः क्रिमिभक्षोभवेद्विप्रोविष्णुगायत्र्याहुनेत ॥ तिलव्रीहिभिराज्यैश्चतेनमुक्तोभविष्य
तीति ॥ ७६ ॥ स्मृतिचिंतामणौ विप्रोयादस्यात्क्रिमिभक्षयुक्तः स्नात्वैवकुर्यादथशांतिहोमं ॥ आज्यैस्तिलैर्व्रीहिभिरेवनूनं पंचाक्षरेणेतिमतंस्तुवेद
[illegible] प्रायश्चित्तानंतरंभषकदंशप्रायश्चित्तंनिर्दिश्यते वृद्धमनुः विप्राभषकदष्टश्चे

तिसाज्यांविप्रत्वमेतीतिविनिश्चयोयामीति ॥ ८५ ॥ यदत्र्यव्यासवचनादिक्रमलेखनीयंविस्तरभीतेरुपरम्यते आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये पूर्ण
श्चतुर्थउल्लासःकाम्यकांडेशुभावह ॥ ८६ ॥ इतिश्रीआनंदगिरिस्वामिकृतेस्मृतिसारसमुच्चये काम्यकांडेचतुर्थउल्लासः ॥

शिवाभ्यामेवसर्वत्रशिवंभवतिसर्वथा ॥ तयोरपांगमाकांक्षेसर्वकार्येषुसर्वदा ॥ १ ॥ उदकीसंस्पृशेप्रायश्चित्तंनिर्दिश्यमिति ब्राह्मणाचारवत्तयात्द
त्तनिर्दिश्यते व्यासः उदकींसंस्पृशेद्यस्तुविप्रःशूद्रत्वमाव्रजेत् ॥ प्रायश्चित्तंततःकार्यमितिशास्त्रस्यनिश्चयइति ॥ २ ॥ वृद्धपराशरः उदकीस्पर्शनंयत्रवि
प्रस्यप्रभवेद्यदा ॥ ब्रह्मतेजोविनाशस्यात्प्रायश्चित्तंततश्चरेदिति ॥ ३ ॥ तत्प्रायश्चित्तमांडव्यआह स्नात्वैवतद्दिनेनूनमुदकींसंस्पृशेन्नरः ॥ यज्ञोपवीतंधृत्वै
वपंचगव्यंपिबेत्ततइति ॥ ४ ॥ वृद्धयाज्ञवल्क्यः उदकींसंस्पृशन्यस्मिन्दिनेविप्रस्तुतद्दिने ॥ उपवासंप्रकुर्वीतगायत्रीजपतत्परइति ॥ ५ ॥ अत्रगायत्रीजप
तत्परइत्युक्तं तत्संख्यायाविवक्षायांशातातपआह जप्त्वासहस्रगायत्रीमुदकींस्पृशतिद्विजः ॥ उपवासेनगव्येनशुध्यतीतिविनिश्चयइति ॥ ६ ॥ उपवा
सोयंएकरात्रिसंगवएवेति स्कंदेनोक्तं उदकीस्पर्शनेनूनमेकरात्रोपवासता ॥ पंचगव्यप्राशनेनशुद्धिरस्यसमीरितेति ॥ ७ ॥ वसिष्ठः प्रथमंस्नानमुद्दिष्टंततः
सूत्रस्यधारणं ॥ ततोगव्यप्राशनंचदुदक्यास्पर्शनेविधिरिति ॥ ८ ॥ एकरात्रोपवासः स्वल्पएवेतिब्राह्मणस्यसहस्रगायत्रीजपोयंनियतएवभवति एतदाहगा
लवः जप्त्वासहस्रगायत्रीमुपवासंसमाचरन् ॥ उदकीस्पर्शनाद्दोषान्मुच्यतेद्विजपुंगवइति ॥ ९ ॥ तदेतत्स्ववर्णधर्मनिष्ठमितिस्वल्पमेतदुक्तं जपतोनास्तिपातक
मितिलक्षणमनुसृत्यतदिदानींगायत्रीजपकृच्छ्रलक्षणमुच्यते भरद्वाजः गायत्रीजपतःकृच्छ्रंशतादूर्ध्वंयदाभवेत् ॥ पादकृच्छ्रमिदंज्ञेयमुपपातकनाशनमिति
॥ १० ॥ उपपातकेब्रह्मवधाद्यतिरिक्ताभिर्व्यर्थः वृद्धयाज्ञवल्क्यः गायत्रीत्रिशतंजप्त्वाकृच्छ्रसांतपनंलभेत् ॥ पातकस्यविनाशायरोगस्यैवौषधंस्मृतमिति
॥ ११ ॥ वृद्धगार्ग्यः भवेत्सहस्रगायत्रीजपतःसंख्ययायदि ॥ अर्धकृच्छ्रमिदंप्रोक्तंप्रायश्चित्तांगमुच्यतइति ॥ १२ ॥ व्यासः सार्धसहस्रगायत्र्याजपमाचरते
द्विजः ॥ चांद्रायणफलंलब्ध्वापातकैःपरिमुच्यतइति ॥ १३ ॥ वसिष्ठः सहस्रत्रितयंयत्रगायत्रीजपतोयदि ॥ सर्वकृच्छ्रफलंलब्ध्वापातकैःपरिमुच्य
तइति ॥ १४ ॥ मांडव्यः प्राजापत्यंपराकंवाशिशुचांद्रायणंतुवा ॥ लभेत्फलंतुसंपूर्णंगायत्रीलक्षजापकइति ॥ १५ ॥ स्मृतिरत्नाकरे गायत्रीमंत्रजापं
जपतिनियमतस्त्वल्क्षमेकंत्रिलक्षं । कृच्छ्रंसर्वंतुचीर्णंभवतितदपरंपातकेभ्योविमुच्येत् ॥ १६ ॥ दत्वागोदानमत्रप्रतिनियमतिलैर्लक्षमेकंतु
होमं । कृत्वासर्वाघहानिंप्रभवतिमनुनाविप्रवृंदेषुगण्यइति ॥ १६ ॥ कृच्छ्रातिकृच्छ्रादिकंगायत्रीजपमुद्दिश्ययदुक्तंतत्स्मृतिसारसर्वस्वेद्रष्टव्यः
दशाक्षरीजपकृच्छ्रंनिर्दिश्यते गोभिलः जप्यतेयेनविप्रेणपंचाक्षर्याःशतंजपः ॥ प्राजापत्यंतेनचीर्णंनात्रकार्याविचारणेति ॥ १७ ॥

नालंबनंपुरस्फूर्तिकस्यप्रायश्चित्तस्ययोग्यताघटकमिति एतदाहमरीचिः तीर्थयात्रादिनायश्चजपेनापिसमार्जितं ॥ पुण्यंप्रायश्चित्तसिध्यैयोग्यत्वंघटयेदि होति ॥ २५ ॥ कारणांतरव्युदसनंप्रस्तावनामूलमितिद्रष्टव्यः अग्रहारप्रतिग्रहेयजमानस्यपुण्यकीर्तंयोग्रहीतुःपातकमितिस्मृतिविदांमतं गोभिलः सीद तेसकुटुंबाययोग्रहारंददात्यसौ ॥ यजमानःस्वर्गभाक्स्यात्गृहीतानरकंव्रजेदिति ॥ २६ ॥ लागाक्षिः योग्रहारेनिवसातिसकुटुंबोद्विजोयदि ॥ जपहो मादिकंसर्वंदातुरेवफलंदिशेदिति ॥ २६ ॥ यदेताभ्यांवचनाभ्यामग्रहारप्रतिग्रहोविप्रस्यदोषजनकइतिव्यवस्थितिः कात्यायनः दरिद्रश्चेत्कुटुंबिस्वदग्र हारंगृहीष्यति ॥ नदोषस्तस्यविज्ञेयोदातुरर्धफलंलभेदिति ॥ २८ ॥ एतदर्थेप्रायश्चित्तकरणंयुक्तमितितदधुनानिर्दिश्यते वृद्धयाज्ञवल्क्यः पुण्यक्षेत्रं समागछेदग्रहारप्रतिग्रही ॥ शिवंसंतोषयेत्तत्रलक्षबिल्वार्चनादिनेति ॥ २९ ॥ वृद्धमनुः लक्षबिल्वार्चनंकृत्वायोग्रहारप्रतिग्रही ॥ शिवस्यतेनदोषेण मुक्तोभवतिनिश्चयइति ॥ ३० ॥ नन्वग्रहारप्रतिग्रहदोषःगृहीतुमात्रपरःनपुत्रादिविषयइतिचेन्न तेषामपिवासाधिकारतया यत्किंचित्पातकस्यविवक्षित त्वात् तेनेदमुन्नीयते योग्रहारप्रतिग्रहीसयदिसीदत्कुटुंबी पुण्यक्षेत्रेगत्वाशिवस्यलक्षबिल्वार्चनविधिनाग्रहणदोषविमुक्तः यजमानस्यार्धफलप्रदिस्तुभव तीति एतदाहत्रिकांडमंडनः यजमानस्यार्धफलंप्रायश्चित्तकृतोभवेत् ॥ अन्यथारौरवंयातियजमानस्यपुण्यतेति ॥ ३१ ॥ यदत्राशास्यंदिनकरभट्टीये

व्यवस्थितं सूतकान्नभोजनंनिषिद्धमेवेति तद्भोजनेप्रायश्चित्तमितिप्रायश्चित्तंनिर्दिश्यते खंडमरीचिः सूतकान्नंभुंजानःपातकंप्रभुनक्त्यसौ ॥ प्रायश्चि त्तंततःकुर्यादज्ञानाद्भोजनेसतीति ॥ ३२ ॥ ज्ञानकृतभोजनेपितत्पश्चात्तापेनप्रायश्चित्तमर्हतीतिसिद्धं व्यासः ज्ञानादज्ञानतोवापिसूतकान्नंभुनक्त्यसौ ॥ प्रायश्चित्तंविधायैवशुद्धोभवतिनान्यथेति ॥ ३३ ॥ कात्यायनः सूतकान्नंदोषदुष्टंभुंजीयाद्ब्राह्मणोनहि ॥ भुंजानसंकटेविप्रःप्रायश्चित्तंसमर्हतीति ॥ ३४ ॥ ननुसूतकान्नभोजनेनियामकत्वमस्तिवानवा गोभिलः कुर्वन्बंधुजनेभुक्तिंनप्रायश्चित्तमर्हति ॥ अन्यत्रसूतकान्नस्यभोजनेतुतादिष्यतइति ॥ ३५ ॥ अनेन वचनेनस्वबंधुषुसूतकान्नभोजनेनदोषोन्यत्रेतिसिद्धं त्रिकांडमंडनः प्रायश्चित्तमिदंप्रोक्तंसूतकान्नस्यभोजने ॥ जप्त्वासहस्रगायत्रींधृत्वायज्ञोपवीतकमिति ॥ ३६ ॥ वृद्धगार्ग्यः सूतकान्नंप्रभुंजानाधृत्वायज्ञोपवीतकं ॥ जप्त्वासहस्रगायत्रींमुक्तोभवतिकिल्बिषादिति ॥ ३७ ॥ ननुब्रह्मचारिणःबंधुवर्गेभिक्षा ग्रहणंयुज्यतेनवेतिसंदेहः वृद्धमनुः भिक्षान्नंनैवगृण्हीयाद्ब्रह्मचारीस्वबंधुषु ॥ यावद्गुरुकुलेवासस्तावन्नैवास्यसूतकमिति ॥ ३८ ॥ ननुदैवयोगेनसूत कान्नंभुंजानस्यब्रह्मचारिणःकिंप्रायश्चित्तमितिविवक्षायां हारितआह ब्रह्मचारीकदाचिद्वासूतकान्नंभुनक्त्यसौ ॥ क्षौरंकृत्वासोपवीतिपावमान्येनशुध्यती

पुमंक्षेपतोनिर्दिष्टोवेदितव्यः अधुनाराजप्रतिग्रहप्रायश्चित्तंनिर्दिश्यते गार्ग्यः राजप्रतिग्रहंकृत्वाविप्रोनरकमश्नुते ॥ तत्रस्तत्परिहारायप्रायश्चित्तंसमाचरे
दिति ॥ ४७ ॥ वृद्धमनुः राजप्रतिग्रहोयत्रवेश्यायाश्चप्रतिग्रहः ॥ तस्यप्रतिग्रहोयत्रसदोषोनरकावहइति ॥ ४८ ॥ तदेताभ्यांवचनाभ्यांराजप्रतिग्रहस्यत
दितरप्रतिग्रहेभ्योविशेषदोषोनिर्दिश्यते हारितः राजप्रतिग्रहंकृत्वासागरस्नानमाचरेत् ॥ गोदानंतत्रदातव्यंप्रायश्चित्तेनशुध्यतीति ॥ ४९ ॥ नन्वत्रवेश्याप्र
तिग्रहस्यसमानाधिकरण्यव्यवस्थितिरुक्ता तदिदमनुपपन्नमितिचेन्न व्यासवचनेननिर्वाहात् सर्वप्रतिग्रहोकार्योद्वयमेवपरित्यजेत् ॥ राजप्रतिग्रहंवेश्याप्रति
ग्रहमतःपरमिति ॥ ५० ॥ ननुसर्वाधारतयाराज्ञोग्रहणमेवदानस्यसर्वत्रप्रतीतिः किमत्रदूषणंप्रतिपादलइतिचेन्न भूम्यादिप्रतिग्रहस्यतथाविधदोषाभावात
एतदाहकश्यपः भूम्यादिसौम्यदानानिराज्ञःप्रतिगृह्णीयादिति ॥ गजदानाश्वदानादिपरित्यजतिसत्तमइति ॥ ५१ ॥ यद्यपिभूम्यादिदानस्यराज्ञोग्रहणेन
दोषोनिरूपितस्तथापियत्किंचित्प्रायश्चित्तंकर्तव्यमेव एतदाहपैठीनसिः महादानंगृहीतंचेन्महानेषप्रकीर्तितः ॥ सौम्यदानेनविप्रस्यप्रायश्चित्तंलघुमेवहि
॥ ५२ ॥ लघुप्रायश्चित्तंसागरस्नानादिकमेवेतिसिद्धं तथाहरलः सागरस्नानतःशुद्धेत्प्राजापत्येनवाद्विजः ॥ राजप्रतिग्रहंकृत्वासौम्यदानंयथाविधीति ॥ ५३ ॥
नाविस्तरोत्रमृग्यइतिदिक् तटाकखनेनेपिकोधारोपिहीनजातिसंस्पर्शनेनजलस्यास्पृश्यत्वात्पातकाधिकरणमितितत्प्रायश्चित्तानुरोधेनशांतिरुक्ता कालान्तरे
हीनजातिस्पर्शनेनतटाकखननेकृते ॥ तत्पापपरिशुध्यर्थंशांतिंकुर्वीतयत्नतइति ॥ ५४ ॥ वृद्धमनुः खातमात्रतटाकस्ययोविप्रः वहेज्जलं ॥ सपतेन्नरके
कुंभीपाकेभयंकरइति ॥ ५५ ॥ अतोत्रजलशुद्धयेशांतिर्निर्देष्टव्यइतिविवेकः वृद्धगार्ग्यः तत्तीरेकश्चिदेकस्मिन्तटाकखननेसति ॥ स्नानेनैवापिकांकुर्याच्चशां
तीमितिनिश्चयइति ॥ ५६ ॥ व्यासः तिलव्रीहिश्चगोधूमःश्यामाकोदूर्वएवच ॥ होमद्रव्याणिनिर्दिष्टंतटाकपरिशांतयइति ॥ ५७ ॥ बोधायनः समिदाज्य
चरूस्तमहुनेदेवशताहुति ॥ रुद्रगायत्र्यानूसाविष्णुगायत्र्याथवेति ॥ ५८ ॥ गोभिलः मंटपेकलशान्यस्यपूजयेदत्रमंत्रतः ॥ पंचाक्षरेणवाकुर्यात्पूजनंनात्रसं
शयइति ॥ ५९ ॥ वृद्धपराशरः एकादशोत्तरंकुर्यात्शतकुंभांस्तथाव्रणान् ॥ अद्वैवतात्मकैर्मंत्रैःपूजयेन्नात्रसंशयइति ॥ ६० ॥ वसिष्ठः कलशैस्तैःपूरितै
श्चपूरितैराम्रपल्लवैः ॥ शोभितैरभिषिंचस्तत्तटाकंसर्वतोदिशोति ॥ ६१ ॥ स्मृतिचिंतामणौ तटाकशांतिंविधिवद्विधायजलैरथापःपरितोभिषिंचेत् ॥ विप्रान्स
हस्रत्रितयंप्रभोज्यंतटाकशांतिर्भवतीतिसिद्धमिति ॥ ६२ ॥ हेमाद्रौविशेषोवगंतव्यइतिदिक् यस्यकस्यचिद्रोगाग्निगलबंधाद्याद्विजस्यप्रातिषिद्धस्यस्नानस्याक्रम

प्रायश्चित्तमेमितिविवक्षायां जातूकर्णिराह निर्गलस्योयदाविप्रोरोगार्तोवभविष्यति ॥ स्नानहीनेरुतितदाप्रायश्चित्तेनशुध्यतीति ॥ ६३ ॥ तदेताभ्यांवच
चनदाभ्यांप्रतिषिद्धस्नानस्यप्रायश्चित्तक्रमोविवक्षितः तत्रमाहहस्तोभिलः क्षौरंचमृत्तिकास्नानमुपवासस्ततःपरः ॥ तिलहोमश्चगोदानंकमश्चात्स्नानभोजनं
इति ॥ ६४ ॥ लोगाक्षिः चांद्रायणंपराकंवाततृच्छ्रमथापिवा ॥ कृत्वाविशोर्विशुध्येतयद्यप्यस्नानभोजनइति ॥ ६५ ॥ मांडव्यः पुण्यदेवंसस्नानंछेद्थवा
देवताग्रहे प्रायश्चित्तीयतेविप्रोयद्यप्यस्नानभोजनइति ॥ ६६ ॥ ननुकियत्सुदिवसेष्विदंप्रायश्चित्तमितिविवक्षायां मनुराह षण्मासादधिकंय यद्यप्यस्ना
नभोजिनः ॥ प्रायश्चित्तंतदाज्ञेयंविधिदृष्टेनवर्त्मनेति ॥ ६७ ॥ अत्राविधिदृष्टेनवर्त्मनेत्युक्त्याप्रागुक्तक्रमोबोध्यः हारितः निर्निमित्तेनयोविप्रोदिनमेकंतु
त्यजेत् ॥ विप्रस्नानंसपापात्मारौरवंनरकंव्रजेदिति ॥ ६८ ॥ तदेतद्वचनेनप्रतिपादितंनिर्निमित्तपरित्यक्तस्नानवतोनिरूपितमितिस्मृतितरंगिण्यांस्थित
यदिकोपिधर्मविक्रयंकरोतितस्यकिंप्रायश्चित्तमितिविवक्षायांनिर्दिश्यते मांडव्यः विक्रीणातिहयोधर्मंकष्टेनसमुपार्जितं ॥ नरकंतस्यनिर्दिष्टंकुंभीपाकाभिधं
महदिति ॥ ६९ ॥ कात्यायनः धर्मविक्रयिणंसूर्द्धंयःपश्यतिकदाचन ॥ सूर्यदर्शनतःशुद्धिस्तस्यस्यातिनसंशयइति ॥ ७० ॥ तदेताभ्यांवचनाभ्यांधर्मविक्रया
भिमतेप्रायश्चित्तंमनुराह पुनः प्रदक्षिणंकुर्यात्गंगास्नानमथापिवा ॥ अन्यथानैवशुद्धोयंधर्मविक्रयकारकइति ॥ ७१ ॥ विदूरथः धर्मविक्रयकृन्मर्त्यस्त्रिषुलोकेषु
निंदितः ॥ गंगास्नानादेवशुध्येतनान्यथास्नेततःशुचिरिति ॥ ७२ ॥ अत्रहिप्रायश्चित्ततःशुचिरित्युक्तंतस्यायमभिप्रायःगंगास्नानादिनाविधूतपापस्यतदूर्ध्वं
प्रायश्चित्तंचांद्रायणादिष्वन्यतमंमुक्तमिति एतदाहलोगाक्षिः चांद्रायणत्रयंकुर्यात्धर्मविक्रयकृन्नरः ॥ पश्चाद्विधूतपापोसौसागरेस्नातुमर्हतीति ॥ ७३ ॥
अत्रेयंविवक्षाक्रियते किंसागरस्नानंपूर्वमुत्तरंवेति तत्रेदुत्तरंबोध्यं ॥ क्रमेणतीर्थयात्रांकृतवतोस्यगंगास्नानादिषुयद्यप्यधिकारः तथापिसागरस्नानस्यप्रा
यश्चित्तानंतरकरणमुक्तं एतदाहपैठीनसिः गंगास्नानेनशुद्धोसौधर्मविक्रयकृन्नरः ॥ चांद्रायणंविनाशोसागरेस्नातुमर्हतीति ॥ ७४ ॥ स्मृतिकामधेनौ
विक्रीणातीहधर्मंचरतिचपृथिवींतीर्थयात्रादिनासौ । गंगायांस्नानकृत्स्यात्तदनुचजलधौस्नातःशुद्धोविधत्ते ॥ हुत्वापंचाक्षरेणाप्यथतिलमयुतंगोप्रदानंविधा
य । मुक्तोसौपातकेभ्योजगतिबहुमतोजायतेपुण्यकामेति ॥ ७५ ॥ तदत्रवेदंप्रायश्चित्तंबहुलतयाविनहेमाद्रौद्रष्टव्यं आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्च
ये ॥ पूर्णःपंचमउल्लासःकाम्यकांडेशुभावह ॥ ७६ ॥ इतिश्रीआनंदगिरि० स्मृतिसारसमुच्चये काम्यकांडेपंचमउल्लासः ॥ ॥ ॥

यदिश्वरत्पातकैर्य्याविमुक्तः ॥ समाज्यब्राह्मणानांशतमाममतवाछितयातिनूनं । नाचितपापाद्विजायाद्विजतातथुसमर्पकमावित्युक्तइति ॥ ८ ॥ विस्त
रोस्मृतितरंगिण्यांद्रष्टव्यः अधुनालक्षतुलसीपूजाकल्पउच्यते कात्यायनः विष्णोःसमर्पणंकुर्यात्तुलसीलक्षमंजरी ॥ विष्णुलोकंसमभ्येत्यमोदतेशाश्वतीः
समाइति ॥ ९ ॥ विष्णुवृद्धः लक्षसंख्यांतुतुलसींयोविष्णौतुसमर्पयेत ॥ ससर्वपापविनिर्मुक्तोविष्णुलोकेमहीयतइति ॥ १० ॥ पूजाक्रमोवरनंतुनो
क्तः क्षौरपूर्वेणविधिनास्नात्तिकास्नानतःशुचिः ॥ सहस्रनाम्नाकुरुतेविष्णोरर्च्यांयथाविधीति ॥ ११ ॥ होमस्वरूपंगार्ग्यआह हुनोतिविष्णुगायत्र्यातुल
स्यालक्षसंख्यया ॥ ब्राह्मणान्भोजयेत्तद्वदितिशास्त्रस्यनिश्चयइति ॥ १२ ॥ मरीचिः लक्षपूजातुलस्यस्याद्धोमोदशसहस्रकं ॥ सहस्रंब्राह्मणानांतुभोज १६
नंक्रमतोभवेदिति ॥ १३ ॥ वासिष्ठः सहस्रनामाभिःकुर्याद्ब्राह्मणानांतुपूजनं ॥ भोजयेत्पड्रसैरन्नैर्विष्णुलोकंसगच्छतीति ॥ १३ ॥ याज्ञवल्क्यः गोदान
ंक्षितंदद्यात्फलाभेसानलभ्यते ॥ दशगोदानमत्रैवप्रमितिशास्त्रस्यनिश्चयइति ॥ १४ ॥ एतत्करणफलमाह मांडव्यः रोगाःप्रशान्समायांतिक्षयापस्मारपूर्व
का ॥ तुलसीलक्षपूजायामहाविष्णोःफलंमहदिति ॥ १५ ॥ यदत्रयोग्यानुरोधेनफलांतरानिर्देश्यं तदर्थवादतयाविरम्यते अधुनामहारुद्रपद्धतिरुच्य
ते स्कांदपुराणे शिवालयेप्रकुर्वीतमहारुद्राभिषेचनं ॥ सर्वपापैर्विनिर्मुक्तोरुद्रलोकेमहीयतइति ॥ १६ ॥ शिवधर्मोत्तरे स्नात्वाक्षौरंप्रकुर्वीतमृत्तिकास्ना

नमाचरेत् ॥ नित्यकृत्यंविधायैवप्रविशेदेवमंदिरमिति ॥ १७ ॥ ब्रह्मांडपुराणे संपूज्यदेवंगणपतिंततःपुण्याहपूर्वकं ॥ विप्रान्वृणीतेविधिवदागमोक्ते
नवर्त्मनेति ॥ १८ ॥ शिवरहस्ये रुद्रस्यैकादशावृत्तिंक्रमकेनसमन्वितं ॥ कुर्यादेकादशत्वमहारुद्रोभिधीयतइति ॥ १९ ॥ व्यासः एकैकावृत्ति
पूर्वेणचमकेनसमंबुधः ॥ करोतिहोमंनयनंतिलैराज्याप्लुतैस्तथेति ॥ २० ॥ वृद्धगार्ग्यः दद्यादेकादशगोदानंपूजांतेविधिवन्नरः ॥ कलशान्रुद्रसंख्यां
कानभिषिंचेन्महेश्वरमिति ॥ २१ ॥ वृद्धमनुः नानाविधानिदानानिदातव्यानियथाविधि ॥ शिवस्यप्रीतयेभक्त्याप्रयातिशिवमंदिरमिति ॥ २२ ॥
कात्यायनः ब्राह्मणान्भोजयेदन्नतावत्संख्यामहात्मनः ॥ सर्वपापैर्विनिर्मुक्तःशिवलोकंलभावजेदिति ॥ २३ ॥ अत्रनिबंधनकाराआहुः जपदशांशेनहोमो
होमदशांशेनद्विजभुक्तिरिति तदप्यादरणीयमेव यदुक्तंरहेन जपाद्दशांशतोहोमोहोमाद्ब्राह्मणभोजनं ॥ महारुद्रस्यनियमोकथितोयंमहात्मभिरिति ॥ २४ ॥
विस्तरोनिर्णयपारिजातेद्रष्टव्यः प्रायश्चित्तनिर्देशेप्रकरणांतरानुरोधःसौकर्यविधिरिति महारुद्रपद्धतिमुद्दिश्यपुनरेवप्रायश्चित्तंनिर्दिश्यते चंडालीगमनेप्राय
श्चित्तंनास्तीतिवस्तुगतिः तथाप्यस्यवाग्दोषेप्रायश्चित्तंनिर्देष्टव्यमिति तदधुनानिर्दिश्यते गार्ग्यः चंडालीगमनंसाक्षात्करोतियद्विमंदधीः ॥ सचंडालोभ
वेन्नूनंप्रायश्चित्तंनविद्यतइति ॥ २५ ॥ वृद्धमनुः वाग्दोषेसतिकर्तव्यंप्रायश्चित्तंद्विजन्मनः ॥ पुण्यक्षेत्रतद्धिधेयंनान्यत्रेतिविनिश्चयइति ॥ २६ ॥ या

पुल्कसीगमनेविप्रोब्रह्मदोषाद्विनिवर्त्ततइति ॥ ३४ ॥ त्रिकांडमंडनः पुल्कसीगमनंसाक्षाद्यः करोतिद्विजाधमः ॥ द्विवारि[illegible]तन्मुखे[illegible]त्यर्तसतुशुध्य
तीति ॥ ३५ ॥ तदेतेनवचनेनयोऽयंताविद्ध[illegible]प्रायश्चित्तविषयेप्रतीयते ज्ञानमार्तंडः अज्ञानात्पातकंकृत्वाजन्मांतरविशुद्धिभाक् ॥ पुल्कसीगमनेनूनं
जातिभ्रंशोविधीयतइति ॥ ३६ ॥ तस्मादज्ञानदोषमात्रस्यप्रायश्चित्तमुक्तमेतदितिसिद्धांतः तत्प्रायश्चित्तंकीदृशमित्यपेक्षायां गोभिलआह पंचाक्षरेणलक्षंस्यात्
द्विलक्षंतुतिलहुतिः ॥ अष्टाक्षरेणविप्रेंद्रपुल्कसीगमनेस्मृतमिति ॥ ३७ ॥ पुल्कसीवाग्दोषप्रतिपादनमित्यर्थः स्मृतियापरिजाते वाग्दोषोजायतेचेद्विविक्तविध
यापुल्कसीसंगमेन । प्रोक्तोविप्रःप्रशुद्ध्येद्युतमपितिलंलक्षमेकंविधत्ते ॥ मंत्रंपंचाक्षरोयंतदनुविधिमतोजायतेचाष्टाक्षरेण । प्रोक्तंतत्साद्विलक्षंप्रभवतिनियुतंपा
तकाद्विप्रमुक्तइति ॥ ३८ ॥ नात्रसिद्धसाधनस्यगवेषणंयुक्तमित्युपरम्यते जलेषुमूत्रपुरीषोत्सर्गेनदीवनदीतीर्थादिपरिनिष्ठितेयदिदोषोयमापतितइतिप्राय
श्चित्तंनिर्दिश्यते कात्यायनः मूत्रंपुरीषंविसृजेद्यदितीर्थजलादिषु ॥ सपापेनान्वितोज्ञेयःप्रायश्चित्तंविनिर्दिशेदिति ॥ ३९ ॥ वृद्धमनुः नदीतीर्थजलं
गत्वायःकुर्यात्तुविमूढधीः ॥ मूत्रंपुरीषंवोत्सृज्यप्रायश्चित्तंविनिर्दिशेदिति ॥ ४० ॥ तदेताभ्यांवचनाभ्यांजलेमूत्रपुरीषोत्सर्गः पातकावहइतिप्रायश्चित्तं
निर्दिष्टं तदधिककरणसावधीदर्गावीहन्नदेवप्रायश्चित्तमितिविवक्षायां वृद्धवसिष्ठआह चांद्रायणत्रयंकुर्याद्विप्रोमूत्रपुरीषणं ॥ जलेकरोतिनियतंतत्पापं
नविशुध्यतीति ॥ ४१ ॥ वृद्धयाज्ञवल्क्यः क्षीरवियार्याथीक्कजलेमूत्रपुरीषकृत् ॥ चांद्रायणंचकृत्वाप्रायश्चित्तंनशुध्यतीति ॥ ४२ ॥ प्रायश्चि
त्तहानमविनीकाकाडक्येनोक्तः [illegible] ॥ [illegible]नैवपातकेनाविशुध्यतीति ॥ ४३ ॥ स्मृतिचिंतामणौ जलेद्विजोमूत्र
पुरीषकर्त्ताकुर्यात्सहस्रेणसुहोतिविप्रः ॥ समिद्भिरन्नाज्यसुतान्यथावत्ततोविमुच्येतसपातकेभ्यइति ॥ ४४ ॥ गोभिलः पातकेभ्योविमुच्येतसमिदाज्य
चरुसुमैः ॥ जलेमूत्रपुरीषंतुकृत्वा[illegible]इति ॥ ४५ ॥ [illegible]परिशुद्धिरवसूलमितिवस्तुतत्त्वंविज्ञेयं ब्राह्मणःकामप
[illegible]निर्दिश्यते वृद्धमनुः यद्विप्यश्वतरीगोषुरतःसेकंकरोतियः ॥
जातिभ्रंशसाविशेषः पातित्यंदिराकेतराणामिति ॥ ४६ ॥ वसिष्ठः पातित्यमस्याविज्ञेयंरेतःसेक्तुर्द्विजन्मनः ॥ भविप्यश्वतरीगोषु[illegible]इति ॥ ४७ ॥
तथाविधपातकिनः प्रायश्चित्तंकिमितिविवक्षायांकश्यपआह नद्यांगत्वानिमज्ज्यैनमुद्धरेत्स्रोतसोबलात् ॥ दुर्योन्यांरेतःसेकेनविशुध्येत्ब्राह्मणोयदीदिति ॥ ४८ ॥

कोटदाग्निजलकुर्याद्रात्तद्वयमुतोशिरः ॥ तन्मध्यादुद्धरेदेनंरेतःसेक्ताविशुध्यतीति ॥ ४९ ॥ तद्त्रायमर्थः मद्यांतटाकेवाकाटिद्रम्रेपयाशोभासि
द्वयंकृत्वापदुपर्येकांभित्तिरचयेत् तत्रदुर्योनिरेतःसेक्तारमपरपार्श्वादुद्धरेद्वयंगंगायांपुनरुद्धवद्दातिपातकाद्विमुक्तिः एतदाह शांडिल्यः गंगागर्भादुत्थूतोस्मिन्
रेतःसेक्तारिपातकात् ॥ विमुक्तिर्जायतेनूनंदुर्योनिषुविशुध्यतीति ॥ ५० ॥ तदुत्तरंप्रायश्चित्तक्रमोमांडव्यः क्षौरात्पवित्रितंकृत्वाप्राजापत्यंतुकारयेत् ॥
ततोविमुक्तिर्भविताहोमकर्मणिचार्हतेति ॥ ५१ ॥ अत्रहिहोमकर्मणिचार्हतीत्युक्त्यातदुपयुक्तहोमविधिरात्रिणोक्तः आपउंदंतुमंत्रेणतिलव्रीहियवान्हुनेत् ॥
रेतःसेकेनदोषेणाविमुक्तोभवनिश्चयमिति ॥ ५२ ॥ निर्णयकामधेनौ निबंधस्यन्यतराद्विवेक्तव्यं गंडमालादिरोगविशेषेछागीमनुष्यजाक्षीरपानंतंनिघ्नसेहेतु
रिलासिद्धैतेनपातकंप्रविष्टमितिप्रायश्चित्तंनिरूप्यते कात्यायनः छागीपयोमनुष्यस्त्रीपयःपिबतियोद्विजः ॥ नारकीयातनांयातिनात्रकार्याविचारणेति ॥ ५३ ॥
व्यासः रोगार्तोयःपिबेद्विप्रश्छागीक्षीरंततःपरं ॥ मनुष्यस्त्रीपयःपीत्वाकृच्छ्रंचांद्रायणंचरेदिति ॥ ५४ ॥ एतेताभ्यांवचनाभ्यांरोगार्तोविप्रोरोगप्रशमनायछा-
गीमनुष्यस्त्रीपयःपिबतिसतिततःपातकंसमुत्पन्नमितिरोगप्रशमनानंतरंप्रायश्चित्तंसमाचरणीयमितिप्रतीयते गौतमः ताम्रवर्णीपयःपीत्वामनुष्यस्त्रीपयःपिबन्
छागीपयःपिबन्वापिमुच्यतेनात्रसंशयइति ॥ ५५ ॥ पैठीनसिः सिंधुगंगापयःपानंविप्रःप्रकुरुतेयदि ॥ छागीमनुष्यजाक्षीरपानपातकतःशुचिरिति
॥ ५७ ॥ वस्तुतस्तुविशेषविषयाप्रायश्चित्तंवक्तव्यमेव वृद्धगार्ग्यः क्षौरंचैवनदीस्नानंकृत्वाशंभोस्तुदर्शनं ॥ छागीमनुष्यजाक्षीरपानाच्छुद्धिमवा
प्नुयादिति ॥ ५८ ॥ स्मृतिचिंतामणौ रोगार्तोयोहिविप्रःपिबतितदुपघातायचक्रेमजेन । छागीक्षीरंमनुष्यप्रतिघातितत्क्षीरपानंयथावत् ॥
क्षौरंकृत्वाथनद्यांतदनुचकुरुतेक्षीरदूर्वाख्यहोमं । यस्तेमन्युंचमंत्रंप्रजपतिसभवेद्विप्रमुक्तोथपापादिति ॥ ५९ ॥ अत्रत्योविस्तरः स्मृतिचंद्रिकायां
व्यवस्थितइतिदिक् ब्राह्मणाभासेषुपंक्तिभोजनं ब्राह्मणानांनिषिद्धमेवेतियत्प्रायश्चित्तंनिर्दिश्यते गार्ग्यः ब्राह्मणायेप्रतीतास्युरपांक्तेयैर्द्विजातिभिः ॥
सहभोजनमात्रंचेत्प्रायश्चित्तंविनिर्दिशेदिति ॥ ६० ॥ वृद्धमनुः अपांक्तेयैर्द्विजैःसार्धंभुंजतेयेद्विजाधमाः ॥ तेत्याज्यादूरतोनूनंब्राह्मणत्वंसमेषुवाति
॥ ६१ ॥ तस्मात्तु अग्रंथव्ह्योपासनगुर्जरकाण्वमाध्यंदिनादिषुब्राह्मणाभासत्वंप्रतीतत्वमेववर्तते तेषुयेमहाराष्ट्रादयोविप्राःसहभोजनंकुर्वंतितेषांप्रा
यश्चित्तमितिसिद्धं पैठीनसिः चांद्रायणंप्रकुर्वीतयश्चपांक्तेयभोजनं ॥ क्षौरंविधायविधिवत्प्रायश्चित्तमतःपरमिति ॥ ६२ ॥

शीदेशजोयंगोकर्णयात्रांकुर्यादितिविवेकः यद्ययंगोकर्णदेशजःसकाशीयात्रांकुर्यादिति यदिमध्यदेशजःसेतुस्नायीभवेदिति एतदाहशौनकः देशान्दिनिम
त्तंकृत्वायात्रांकुर्वीतयत्नतः ॥ संकरोनामदोषोयंनिवर्ततेनसंशयइति ॥ ७१ ॥ यात्रापिदंपत्योर्विहितंनकेवलंभर्तुरेवेतिवृद्धमनुः दंपत्योःसंकरेदोषेयात्रा
भवतिनिर्णयः ॥ नैकस्माद्धिनिवर्तेतपातित्यंत्वन्यथास्थितेरिति ॥ ७२ ॥ अत्रायंविचारः नतस्तद्वंशःभर्तृवंशःपत्नीविषयोवेति कात्यायनः संकरेतुसमु
त्पन्नेभर्तृवंशंसमुद्धरेत् ॥ यात्रयाविनिवृत्तेतुप्रायश्चित्तेनकर्मणाति ॥ ७३ ॥ प्रायश्चित्तमाहवृद्धयाज्ञवल्क्यः मयापत्येनमंत्रेणसमिदाज्यचरून्हुनेत् ॥ पय
स्विनींचगांदद्यात्संकरोविनिवर्ततइति ॥ ७४ ॥ निर्देशोयंमहत्तरोयदिसंकुचितोऽपगंतव्यः आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये ॥ पूर्णःषष्ठोयमुल्लास
काम्यकांडेशुभावहः इतिश्रीआनंदगिरिस्वामिकृतेस्मृतिसारसमुच्चयेकाम्यकांडेषष्ठउल्लासः श्रीगोकर्णमहाबलेश्वरायनमः

प्रत्यूहभिदुरंवंदेविघ्नराजंजगद्गुरुं ॥ कल्याणदांवरांदुर्गांनत्वासर्वार्थसाधकां ॥ १ ॥ अधुनाकर्मविपाकोद्देशेनकफरोगशांतिविधिरुच्यते कात्यायनः करोति
द्रव्यलोभेनपरपांथकंठमोटनं ॥ कफरोगीभवेन्नूनंनरकांतियनाशयोर्दिति ॥ २ ॥ वृद्धवासिष्ठः कंठमोटनकृन्मर्त्यःपरेषांकफरोगवान् ॥ प्रायश्चित्तेनमुच्येत
नान्यथौषधकोटिभिरिति ॥ ३ ॥ शांतिविधानगार्ग्यआह समिदाज्यचरून्हुत्वायोरुद्रइतिमंत्रतः ॥ गांदत्वाविप्रवर्यायमुच्यतेकफरोगभागिति ॥ ४ ॥
त्रिकांडमंडनःकफरोगाद्विमुच्येतातिलाहुत्यातुलक्षतः ॥ गांदत्वाविप्रवर्यायनात्रकार्याविचारणेति ॥ ५ ॥ पराशरः जन्मांतरेकृतंपापंकफरूपेणपीड
येत् ॥ रुद्रमूर्तितुविप्रायदातव्यंशांतिकर्मणीति ॥ ६ ॥ रुद्रमूर्तिस्वरूपंव्यवहारदीपिकायामुक्तं पंचवक्त्रंदशभुजंचतुर्निष्कप्रमाणकं ॥ रुद्रमूर्तिविजानीयाच्छां
तिकर्मणिशस्यतइति ॥ ७ ॥ गोभिलः कफरोगप्रशांत्यर्थंरुद्रमूर्तिंदिशेन्नरः ॥ शांतिकर्मणिसंपूज्यविप्रायाविदुषेध्रुवामिति ॥ ८ ॥ सर्वसमंजसमित्युप
रम्यते गंडमालारोगस्यदीर्घरोगतयाबाधकत्वंप्रतीतेजन्मांतरेगोमहिष्यादिचौर्यदोषादेतत्प्रसक्तमितिकर्मविपाकेनप्रायश्चित्तानिर्दिश्यते यदाहमांडव्यः गो
महिष्यादिकंहृत्वागंडमालायुतोभवेत् ॥ दीर्घरोगीतत्पापात्प्रशांत्यासुखमवाप्नुयादिति ॥ ९ ॥ वात्स्यायनः गंडमालायुतोमर्त्यःशांत्यामुक्तोभविष्यति
॥ जन्मांतरकृतंपापंदीर्घरोगमिदंस्मृतमिति ॥ १० ॥ प्रायश्चित्तंव्यासआह क्षीरंकृत्वैवविधिवल्लक्षमेकंतिलाहुतिः ॥ जुहोतिरुद्रगायत्र्यातेनमुक्तोभ

लशुनंदूषितंसदा ॥ विप्रोसौसेवमानश्चेल्लशुनंपातकीभवेदिति ॥ १७ ॥ तदेताभ्यांवचनाभ्यांलशुनस्यनिषिद्धत्वेसिद्धेप्रायश्चित्तंमनुराह रोगप्रशमनार्था
यलशुनंभक्षितंयदि ॥ त्रिरात्रोपोषितोभूत्वाशुद्धिंविप्रःसमाप्नुयादिति ॥ १८ ॥ वृद्धगार्ग्यः निषिद्धंलशुनंगृण्हन्क्षौरंकृत्वाविशुध्यति ॥ उपोषितोस्त्रि
रात्रेणगायत्रीजपतःशुचिरिति ॥ १९ ॥ गायत्रीजपसंख्यायाज्ञवल्क्येनोक्ता कृत्वासहस्रंगायत्रींलशुनंभक्षतःशुचिः ॥ तनुरस्यभवेन्नूनंब्राह्मण्यंतेनलु
प्यतइति ॥ २० ॥ कात्यायनः अभक्ष्यभक्षणंकृत्वालशुनंतुलितंयतः ॥ पतिताद्योद्विजोनूनंलशुनस्यतुभक्षणादिति ॥ २१ स्नातोचल्यमलो प्रा-
याश्चसंसर्गमेवोक्तं जक्षयोगविशेषतस्तुलशुनंतत्पातकंशोधयन् । कृत्वाक्षौरमथप्रपूज्यचहरंयत्नत्रयोपोषितः ॥ हुत्वात्रैवतिलंत्र्यंबकमनोःस्वाचार
युक्तोयदा ॥ तत्पापंपरिशुध्यतीतिविदितंस्मृत्यर्थसारादिष्विति ॥ २२ ॥ अत्रैवयत्किंचिदुपयोगितयानिर्णयमरीचौ परितिष्ठितत्वंबोध्यं परद्रव्याप
हारेणदारिद्र्यंप्रतीयतइति तद्दोषनिवृत्तयेपार्थिवलिंगपूजाविधिरुच्यते कात्यायनः कृत्वापार्थिवलिंगंतुयःपूजयतिनित्यशः ॥ दारिद्र्यदोषहानिःस्या
त्त्रिवर्षादितिनिश्चयइति ॥ २३ ॥ वासिष्ठः आत्रिवर्षंपूजयतिपार्थिवलिंगमन्वहं ॥ दारिद्र्यदोषंनिर्धूयसुखीभवतिसर्वथेति ॥ २४ ॥ तदेता
भ्यांवचनाभ्यांपार्थिवलिंगस्यकर्तव्यतायांप्रतीतायांकतिलिंगानिकर्तव्यानीतिविवक्षाक्रियते वृद्धमनुः संपूज्यदशलिंगानिप्रत्यहंनियमेनतु ॥ आत्रिवर्षेण
निर्मुक्तोदारिद्र्याद्भवतिध्रुवमिति ॥ २५ ॥ अत्रेयंव्यवस्था प्रत्यहंदशलिंगानिकृत्वातदुक्तपूजाविधयाविवक्तव्यमिति नियमात्तुस्पदशकंपार्थिवस्यतुपूजने ॥
तन्नतुष्टोभवेच्छंभुरितिशास्त्रस्यनिश्चयइति ॥ २६ ॥ त्रिकांडमंडनः पुण्यतीर्थेसरसिवास्नात्वाभक्तिसमन्वितः ॥ क्षौरंविधिवदाधायसोपदेशंसमारभेद
ते ॥ २७ ॥ शांडिल्यः प्रारब्धस्यावसानेतुहोमोहात्रसमीप्सितः ॥ समिदाज्यचरून्हुत्वाप्रपूर्तयातिनिश्चयादिति ॥ २८ ॥ शौनकः तिलैर्बिल्वदलैः
सार्धंपंचाक्षर्यात्रहोमयेत् ॥ पार्थिवोद्यापनाविधिःस्कंदगेषसमीरितइति ॥ २९ ॥ स्मृतिचिंतामणौ दारिद्र्यस्याविमुक्तयेयादितरस्तत्पार्थिवपूजये । दद्या
न्मंत्रितैश्चसादरंतथैवोद्यापनंकारयेत् ॥ लक्षैर्बिल्वदलैर्जुहोतिसतिलंपंचाक्षरेणोदितैः । प्राप्नोत्येवदरिद्रदोषविहतिंशंभोःकटाक्षात्स्फुटमिति ॥ ३० ॥
वत्कृतात्पर्यनिर्णयाविशीर्णापिसंकराकृत्यसमाधानंवेदितव्यं अधुनापुराणश्रवणादौकृच्छ्रफलंनिर्दिश्यते व्यासः पुराणश्रवणंकुर्यात्पातकानांनिवृत्तये ॥ ब्रह्म
हत्यादयोयेनानिवृत्ताःस्युर्नसंशयइति ॥ ३१ ॥ वृद्धमनुः शृणोतिभारताख्यानंयोभक्त्यानियमेनतु ॥ ब्रह्महत्याविशुद्धोसौजायतेनात्रसंशयइति ॥ ३२ ॥

जाबालिः शृणोतिस्कांदमध्यस्थंकाशीखंडंनरोयदि ॥ सुरापानाद्विशुद्धोसौजायतेनात्रसंशयइति ॥ ३३ ॥ वृद्धयाज्ञवल्क्यः हरिवंशंयःशृणोतिसाक्षि
माधायचेतसि ॥ स्वर्णस्तेयकृतंपापंनश्यत्येवनसंशयइति ॥ ३४ ॥ गार्ग्यः सेतुखंडंनरोयस्तुशृणोतिनियमेनहि ॥ गुरुतल्पगतात्पापाद्विमुक्तो
भवतिध्रुवमिति ॥ ३५ ॥ वृद्धकात्यायनः गोकर्णखंडश्रवणंकरोतिनियमेनतु ॥ गोवधस्त्रीवधादीनांनाशोभवतिनिश्चयइति ॥ ३७ ॥ एवंविध
स्मृतिवचनैःपुराणश्रवणेश्योविमुक्तपापेषुतत्तत्तीर्थयात्रयाकृच्छ्रादिसंसेवयाविमुक्तोभवतीतिविज्ञेयं पैठीनसिः आधूताखिलपापस्यपुराणश्रवणेनहि ॥ कृ
च्छ्रादिकंफलंदद्यादितिशास्त्रस्यनिश्चयइति ॥ ३८ ॥ स्मृतिकामधेनौ चांद्रायणादिकृच्छ्राणिप्रायश्चित्तार्थमाचरन् ॥ पुराणश्रवणंकुर्यात्प्रश्वसंत्वघ्नो
घ्नमिति ॥ ३९ ॥ निर्णयसर्वस्वेविस्तरःसर्वेषांव्यवस्थापितइतिना विस्तरविवेकः औपासनवन्हेर्नदीसंतरणेशूद्रस्यस्पर्शनादोषसंभवतितदाकिं
मत्रप्रायश्चित्तमितिविवक्षायां जातूकर्णिराह नदीसंतरणेवन्हौशूद्रसंगमनेसति ॥ प्रायश्चित्तंभवेत्तत्रनान्यथावन्हिरिष्यतइति ॥ ४० ॥ याज्ञव
ल्क्यः प्रायश्चित्तंप्रकर्तव्यंनदीसंतरणेसति ॥ वन्हेरौपासनस्येतिशास्त्रस्यैवाविनिश्चयइति ॥ ४१ ॥ तदेताभ्यांवचनाभ्यांप्रायश्चित्तंदत्तमितिव्यव
स्थितेतदंतदनुसरन्मनुराह समुद्रज्येष्ठामंत्रेणसमिदादीन्जुहोत्यथ ॥ प्रायश्चित्तमिदंप्रोक्तंनदीसंतरणेसतीति ॥ ४२ ॥ कश्यपः शंनोदेवीरयंमंत्रंनदीसं
तरणेसति ॥ प्रायश्चित्तविनिर्दिष्टंशुद्धिरौपासनस्यत्विति ॥ ४३ ॥ त्रिकांडमंडनः मानोमहांतमंत्रेणनदीसंतरणेभवेत् ॥ प्रायश्चित्तमिदंवन्हौवन्हिरस्पृ
श्यतीति ॥ ४४ ॥ ननुवन्हेस्तावत्प्रायश्चित्तकरणंयुक्तंविवादबहुलतयाकिमत्रसमाधानमितिचेत्सूक्ष्मः पैठीनसिः अग्निर्मूर्धेतिमंत्रेणसमिदाज्यचरून्हुनेत्
॥ प्रायश्चित्तमिदंनूनंनदीसंतरणेविधीरिति ॥ ४५ ॥ यद्यप्यत्रकाललोपस्तद्दिनेप्रायश्चित्ताभावेकथमेतदाचरणीयमितिचेन्न तद्दिनेपंचगव्यादिनातदौपास
नंसंस्कृत्यपरेद्युराचरणीयस्ययोग्यत्वात् यदाहलौगाक्षिः संस्कृत्यकाललोपेतुपरेद्युर्विधिमाचरेत् ॥ वन्हिर्हिलिप्यतितत्कालेनान्यथाव्यर्थतांव्रजेदिति ॥ ४६ ॥
नचैतन्नित्यौपासनविधिविषयं यदाहगार्ग्यः नित्यौपासनकर्तुश्चेत्काललोपोनविद्यते ॥ तत्कालेसंस्कृतिर्बोध्यावन्हिर्हिलिप्यतिसर्वथेति ॥ ४७ ॥ विधिविवे
काहिस्मृतितरंगिण्यांदृष्टव्यइतिनात्रविस्तरभीत्युपरम्यते रात्रौब्राह्मणानांभोजनसमयेदीपनाशोयदिभवतितदाकिंप्रायश्चित्तमितिविवक्षायां कात्यायनआह

[illegible]

[२०] सः भ्रातृभार्यासंगमनार्थमूढःकरिष्यति ॥ याभांतितस्यभवतिप्रायश्चित्तंयथाविधीति ॥ ५४ ॥ सांवर्त्यः भ्रातृभार्यांव्रजन्मूढोनरकेषुपतिष्यति ॥ याभां

तितस्यकर्तव्यंप्रायश्चित्तंयथाविधीति ॥ वासिष्ठः भ्रातृभार्यांगमनेदोषोयस्यमहान्भवेत् ॥ याभांतिसप्रकुरुतेप्रायश्चित्तंयथाविधीति ॥ ५५ ॥ अत्राक्षमा

क्षेपः गमनकर्तुःकिंप्रायश्चित्तं तस्याःकिंप्रायश्चित्तंतदुत्पन्नाबालो किंप्रायश्चित्तमिति याज्ञवल्क्यः भ्रातृभार्यास्वयंमूढस्तज्जातश्चशिशुस्तथा ॥ प्रायश्चित्ते [२०]

नशुध्येरन्नात्रकार्याविचारणेति ॥ ५६ ॥ वृद्धगार्ग्यः स्वयंपापीविशुध्येततीर्थयात्रादिनायदि ॥ उभयोःकलत्रबालयोःशुद्धिरस्तीतिनिश्चयइति ॥ ५७ ॥

ज्ञानमार्तंडः तत्सूर्यस्येतिमंत्रेणसमिदाज्यचरून्हुनेत ॥ तिलहोमंप्रकुरुतेव्याहृत्येतिविनिश्चयइति ॥ ५८ ॥ स्मृतिकामधेनौ भ्रातुर्भार्यांव्रजतियदिवा

तीर्थयात्रांप्रकुर्यात्तत्सूर्यमंत्रयवतुमनुपायनिःतोषंकरोति ॥ पर्वाज्यैस्तथ्यनिर्गादैस्तत्पलाशैःसमिद्भिः भ्रातुर्भार्यागमनजनितोदोषएषःप्रणश्यादिति ॥ ५९ ॥

अत्रेयंव्यवस्था भ्रातृभार्यागमनकर्तुःपापनाशप्रथमंतीर्थयात्रांकुर्यात् ततस्ताभ्यांमहप्रायश्चित्तशांतिहोमेनविशुद्धिरिति एतदाहरत्नः प्रायश्चित्तेनसंशुद्धिं

गमनेस्तीर्थयात्रया ॥ यतोनिष्कलुषोजातस्ततःशुद्धिमवाप्नुयादिति ॥ ६० ॥ विस्तरोहेमाद्रौद्रष्टव्यः कांचिन्नारीविश्वास्यतांबलात्गृण्हातितत्प्रायश्चित्तं

निर्दिश्यते कात्यायनः कार्यांतरेप्रविश्वस्तांबलाद्गृण्हातियोनरः ॥ रौरवंनरकंयातिप्रायश्चित्तंततश्चरेदिति ॥ ६१ ॥ त्रिकांडमंडनः विश्वासेनागतांसा

ध्वीबलाद्भुंक्तेनराधमः ॥ श्वानयोनिशतंगत्वाचांडालोजायतेततइति ॥ ६२ ॥ तस्मादीदृश्यपातकस्यप्रायश्चित्तंविनिर्देष्टव्यमितिविवेकः नारदः लुंगभ

द्रा जलस्नायीविश्वतांवनितांव्रजन् ॥ पातकेनविमुच्येतनात्रकार्याविचारणेति ॥ ६३ ॥ जाबालिः ताम्रपर्ण्यांचकावेर्यांशुक्तिमत्यामथापिवा ॥ स्नात्वावि

श्वस्तवनितागमनात्परिमुच्यतइति ॥ ६४ ॥ वराहपुराणे सागरस्नानकृन्मर्त्यःविश्वतांवनितांव्रजन् पातकेनविमुच्येतसत्यंसत्यंनसंशयइति ॥ ६५ ॥ अय

मत्रसिद्धांतः नदीस्नानंकाचित्कविषयं सागरस्नानंनियतमेवेति प्रायश्चित्तंपैठीनसिराह देवालयेनदीतीरेक्षौरंकृत्वायथाविधि ॥ प्राजापत्यंचरन्नग्नस्ततः

शांतिसमृच्छतीति ॥ ६६ ॥ गोभिलः यामिधुंगिरिशंतेतिसमिदाज्यंचरून्हुनेत् ॥ विश्वस्तागमनात्पापान्मुच्यतेनात्रसंशयइति ॥ ६७ ॥ युक्तमेतावताप्रपं

चेनेतिदिक् योद्विजोवैश्यवृत्त्योपजीवति तत्प्रतिप्रायश्चित्तंनिर्दिश्यते लोगाक्षिः द्विजोभूत्वावैश्यवृत्तिंयःकरोतिद्विजाधमः ॥ नरकांतेचचंडालीयोनिमृच्छ

त्यसंशयइति ॥ ६७ ॥ कात्यायनः द्विजस्यनिंदितंह्येतद्वैश्यवृत्त्योपजीवनं ॥ तत्कृत्वानरकंयातिप्रायश्चित्तंततश्चरेदिति ॥ वैश्यवृत्तिःपण्यव्यवहारः

गजाश्वगोमहिष्यादीनांविक्रयश्च एतदाहशाट्यायनिः गजाश्वगोमहिष्यादीन्विक्रीणातिद्विजाधमः ॥ वैश्यवृत्त्यासनरकंयातिनात्रसंशयइति ॥ ६९ ॥

[illegible]

लघुर्यतिविवस्तंब्राह्मणस्याश्चिदेवतं ॥ .नीमिमकृत्वाजगत्साक्षीकपिंगजगदीश्वरं ॥ १ ॥ पितृव्यपत्नीगमनंगुरुतल्पसमंविदुर्मुनयस्तथापिप्रकरणांतरेणक्वचिद्दर्श-
यामिसितिवीयिते जाबालिः पितृव्यपत्नीगमनंमातृसंगमसंमतं ॥ महापातककंसिद्धंप्रायश्चित्तंततश्चरेदिति ॥ २ ॥ कात्यायनः पितृव्यपत्नीगत्वातु
कामतापेनपीडितः ॥ नरकयोमहीभुंक्तेततश्चाजायतेध्रुवमिति ॥ ३ ॥ एवंविधप्रकर्णिदोषसंगमनेनभयहेतुतयाज्ञानतःप्रायश्चित्तसमाचरणाद्यामितिसिं-
धुं विदूरथः गोकर्णमथकाशींवाप्रयमसेतुंव्रजन्नरः ॥ पितृव्यपत्नीगमनेप्रायश्चित्तार्थमुद्यतइति ॥ ४ ॥ काशकृत्स्नः शिरसोवपनंकृत्वाप्राजापत्यंत्र
यंचरेत् ॥ गायत्रीजपकल्पेनत्रिलक्षेणविशुध्यतीति ॥ ५ ॥ ततोविधूतपापस्यप्रायश्चित्तप्रतिपादनंवन्हिमुखेसिद्धं गालवः लक्षगायत्र्याहोमः समि-
ध्यादिभिःक्रमात् ॥ त्रिलक्ष्यंतुतिलाहुत्याव्याहृत्यासौविशुध्यतीति ॥ ६ ॥ एतदेवप्रायश्चित्तंत्रिकांडमंडनआह तिलाहुत्यात्रिलक्षेणलक्षेणसमिधादिना ॥
पितृव्यपत्नीगमनादाहुत्यासौविशुध्यतीति ॥ ७ ॥ विविक्तमेतत्समंजसमितिदिक् येनकेनचिदज्ञानादग्रहान्मत्सराद्वाविप्राणांगृहदाहेकृते तस्यप्रायश्चि-
त्तंकिमितिविवक्षाक्रियते व्यासः परेषांगृहदाहंयःकरोतिपापिमंदधीः ॥ तस्यवन्हौतुदहनंकर्तव्यंनात्रसंशयइति ॥ ८ ॥ गौतमः विप्रप्रहारंदहतियोमूढो
विप्रमंदधीः ॥ तृणैराच्छाद्यतद्देहंप्रथमंतुप्रदाहयेदिति ॥ ९ ॥ एतद्राजदंडात्परमितिविवेक्तव्यं एतदाहमनुः राजदंडंगृहत्वैवप्रायश्चित्तंतुकारयेत् ॥
परगेहेवन्हिदातुःसर्वदग्ध्वाशरीरकमिति ॥ १० ॥ अयमर्थः परितःशरीरंतृणैराच्छाद्यतृणानिदहेदिति भरद्वाजः पुण्यक्षेत्रंप्रविश्यैवप्रायश्चित्तंप्रकृष्णह
तः ॥ प्रथमंक्षौरमुद्दिष्टंगव्यस्यप्राशनंपरमिति ॥ ११ ॥ पैठीनसिः चरेत्सांतपनंकृच्छ्रंपरगेहेग्निदोद्विजः ॥ ततःकृच्छ्रःप्रशांतःस्यात्पातकेननसंशयइति ॥१२॥
वसिष्ठः परगेहेग्निदातारंकृतसांतपनंद्विजं ॥ प्रायश्चित्तार्थमुद्युक्तंविप्रागृण्हीयुरादरादिति ॥ १३ ॥ स्मृतिचिंतामणौ योविप्रःपरगेहमग्निदहनंकृत्वा
ततःपातकी । पुण्यक्षेत्रनिवासभूयतितरांनिष्कल्मषोजायते ॥ कृत्वासांतपनंचवन्हिहवनंपंचाक्षरेणाणुना । लाजैःक्षीरयुतैःसहस्रमितयाहुत्याविधिःकीर्ति
तइति ॥ १४ ॥ हेमाद्रौ विस्तरशोनिर्णीतइत्युपरम्यते विषप्रयोक्तुर्विप्रस्यकृतस्यमहतःपातकस्यनिष्कृतिर्विचिन्त्यते गार्ग्यः विषप्रयोक्तायोविप्रो
ब्रह्महत्यासमंत्वघं ॥ प्राप्नोतिनात्रसंदेहःप्रायश्चित्तंततश्चरेदिति ॥ १५ ॥ वृद्धवसिष्ठः प्रायश्चित्तंगुरुतरंविषप्रदिशतोयतः ॥ चांद्रायणानिद्वादशकीर्ति
र्तिर्छनात्रसंशयइति ॥ १६ ॥ वृद्धमनुः महानद्यांमहाशैलेविषप्राशयितानरः ॥ चरन्भिक्षाशनंनित्यंयात्रांकुर्वन्विशुध्यतीति ॥ १७ ॥ वृद्धहारितः

संवत्सरविदाकोयंयात्रयापरिवर्तते ॥ विषप्रापयितुर्जातोमहादोषोयदीक्षितइति ॥ १८ ॥ तत्रायंनिर्णयः विषप्रापयितारंनरंसर्वेबंधवः समेत्ययावत्तवाचि
शुद्धिस्तावत्वंपतितोसीतिवदेयुः अन्यथातेषामपिपातित्यंसिद्धं यदाहलौगाक्षिः यावत्यातिस्य निर्वाहः बंधूनामपिपातकं ॥ ततस्तस्यैवनिर्दिष्टमितरेषांनिंदि
तेतइति ॥ १९ ॥ ननुतेषामपिपातकनिवृत्तौकउपायइतिचेत्ब्रूमः क्षौरंकृत्वातुगव्यंचगृहीत्वाशिवदर्शनं ॥ कृत्वासर्वोविशुध्येरन्नात्रकार्याविचारणेति
॥ २० ॥ तस्यतत्सरांतेकर्तव्योविधिः याज्ञवल्क्यः का‍ यित्वाविलक्षंतुशिवपंचाक्षरीजपं तेनैवमनुनानूनंजुहोत्येवनसंशयइति ॥ २१ ॥ कात्यायनः
गोदानंनिलयंकृत्वा विषप्रापयितानरः ॥ शुद्धोभवतितेनासौप्रायश्चित्तांतएवहीति ॥ २२ ॥ वस्तुतः स्वरूपंसम्यगेवसमभ्यस्तामितिदिक् यद्यपिवैष्णवे
नस्मार्तत्वंगृह्यतेतथापिस्मार्तस्यवैष्णवत्वमयुक्तं तत्तनुद्राधारणस्वरूपस्यदोषस्यदुष्परिहारत्वात् एतदुक्तंपाद्मपुराणे चक्रांकिततनुर्यत्रतत्रकोपिनसंवसेत् ॥
यदितिष्ठेन्महापापिसहस्रब्रह्महाभवेदिति ॥ २३ ॥ एतद्ब्राह्मणविषयमिति स्मृतिसारविदः कूर्मपुराणे ब्राह्मणस्यतनुर्मध्यासर्वदेवसमाश्रया ॥ साचेत्संतापिता
राजन्किंनुवक्ष्येमहत्तमा ॥ २४ ॥ राजाभितिमनुभातिसंबुद्धिः कूर्मवचनं शिवरहस्ये शंखचक्राद्यंकनंचनृत्यगीतादिकंतथा ॥ एकजातेरयंधर्मो
नजातुस्याद्द्विजन्मनइति ॥ २५ ॥ तस्माज्ज्ञानतोब्राह्मणेनवैष्णवत्वंग्रहणेस्मार्तत्वग्रहणेप्रायश्चित्तंग्राह्यमितिविवेकः एतदाहकश्यपः स्मार्तोवैष्णवतांगृण्हन्
ब्राह्मणोनरकंव्रजेत् ॥ प्रायश्चित्तंप्रकृत्वैवस्मार्तत्वमुत्तमाश्रयेदिति ॥२६॥ स्मार्तत्वप्रगहणप्रायश्चित्तावधिमाहमनुः स्नात्वागोमयकुंडेतुक्षौरंकृत्वायथाविधि ॥
उपवासंविधायैवप्रायश्चित्तेनशुध्यतीति ॥ २७ ॥ तदर्थोयंविवेकः यद्यपिगोपीचंदनतुलसीमालादिधारणवर्णवार्चनहतथापिदनदुष्यमेवतत्तमुद्राधारणंतदाद्य
विषयमेवेति अस्मिन्विषयेपराककृच्छ्रंकार्यमित्याहपैठीनसिः स्मार्तोवैष्णवतांगृण्हन्पराककृच्छ्रमाचरन् ॥ शुद्धोभवतितेनासौत्रिरावृत्योतिनिश्चयइति
॥ २८ ॥ वृद्धगार्ग्यः यामिपुगिरिशेतेतिसमिदाज्यचरून्हुनेत् ॥ तप्तमुद्रांकितदोषपरित्यक्तासुखीभवेदिति ॥ २९ ॥ विस्तरः स्मृतिकौस्तु-
धेनाद्रष्टव्यः प्रायश्चित्तानुकूल्ये नदीस्नानंप्रशस्तमितियदुपपादितंतत्ररजस्वलादोषप्रवृत्तौकथमेतत्संगच्छतइति तत्राभिधीयतेलौगाक्षिः संवत्स
रव्यतीतेतुसर्वानद्योरजस्वलाः ॥ तस्मात्तद्धर्मयुक्त धीरैर्मासंवर्जयेत्सुधीरिति ॥ ३० ॥ ननुद्विमासंवर्जयेदित्युक्तंमासद्वयंकिंमिति
मित्याशङ्क्य शाक्त्यनितद उरेउत्पत्याद्यनारतविमप्रदीपप्रवर्तकौ ॥ तावेतौवर्जयित्वैवस्नानंतासुप्रशस्यतइति ॥ ३१ ॥

[२२] पुनर्जन्मनिशूद्रत्वंलभतेनात्रसंशयइति ॥ ३८ ॥ मांडव्योपि जन्मांतरेतुशूद्रत्वंस्त्रीहत्यांकुरुतोभवेत् ॥ प्रायश्चित्तनचाणनौपशुद्धोभवतिवुधासति ॥३९॥
तदेतास्यांविवक्षास्यांप्रायश्चित्तस्यकर्तव्यतायांप्रसक्तायांमनुराह चांद्रायणशतंकृत्वातीर्थयात्रांसमाचरन् ॥ स्त्रीहत्ययाविमुक्तःस्योन्यत्वंलभतेतरामिति
॥ ३९ ॥ वसिष्ठः क्षौरंकृत्वाब्रह्मदंडंपुण्यक्षेत्रेयथाविधि ॥ वन्हिहोमेनशुध्येतिस्त्रीहत्याकरणेपुमानिति ॥ ४० ॥ वन्हिहोमोजाबालिनोक्तः लांगुलक
दलीपक्वांमिश्रीकृत्यतुहोमयेत् ॥ रुद्रगायत्र्या.नूनंसहस्रंशतमेवहीति ॥ ४१ ॥ गार्ग्यः चरुणापायसेनापिसहस्राहुतिमाचरेत् ॥ तिलेनरुद्रगायत्र्या.स्त्रीह
त्यायांविमुच्यतइति ॥ ४२ ॥ एतदमत्यावाग्दोषेवासंभवतीतिविवेकः वस्तुतस्तुस्त्रीहत्याकरणंब्राह्मणेषुवैपरीत्यविधायकमिति शांडिल्यः मत्यायःकुरुते
नूनंस्त्रीहत्यामातिर्निंदितः ॥ ब्राह्मणेपुनगण्योसौलक्ष्यतेदूरतोह्यसाविति ॥ ४३ ॥ विस्तरःस्मृतिकामधेनौस्थितइतिदिक् भ्रूणहत्यास्त्रीहत्यातोलघीयसी
तितत्प्रायश्चित्तंनिर्दिश्यते त्रिकांडमंडनः भ्रूणहत्यासमंदोषमन्यदस्त्युपपातकं ॥ प्रायश्चित्तंकथंतस्ययथाहंवच्मिसांप्रतं ॥४४ ॥ त्रिभागब्रह्महत्यायाःप्रायश्चि [२२]
त्तंविनिर्दिशेत् ॥ पृथक्तेनग्रहीतव्यंतत्प्रायश्चित्तमादरादिति ॥ ४५ ॥ कात्यायनः त्रिभागकल्पनीयंस्याद्ब्रह्महत्याविधिंप्रति ॥ यतोहिशिशुहत्यायाःकृ-
च्छ्रादौलुप्तवृत्तितेति ॥ ४६ ॥ आदिशब्देनयात्रादिकंसंगृहीष्यते ज्ञानमार्तंडः प्रमादात्तुशिशुहत्यांयःकरोतिसनरोव्रजेत् ॥ तीर्थयात्रांसमुद्दिश्यपुण्यक्षेत्रमि
तिश्रुतिरिति ॥ ४७ ॥ तदेतैर्वचनैःशिशुहत्याप्रायश्चित्तेयात्राविधिरुक्तःसकीदृशइतिविवक्षायांवृद्धमनुराह चरेत्सांतपनंकृच्छ्रंवत्सरार्धंनसंशयः ॥ भ्रूणह

त्यां.......तोनरकालि ॥ ४८ ॥ वृद्धगार्ग्यः वत्सरार्धेव्यतीतेतुपुण्यक्षेत्रेतुमुंडनं ॥ कृत्वोपवासंकुर्वीतब्राह्मणाज्ञयातत्त्वानि ॥ ४९ ॥ होम
कल्पोमांडव्येनोक्तः त्रियंबकस्यमंत्रस्यपुरश्चरणलक्षणं ॥ दशांशेनैवहोमस्स्याच्चन्मंत्रेणतिलाहुतिरिति ॥ ५० ॥ वृद्धवसिष्ठः गवांशतंप्रदातव्यंभ्रूणहत्यांकृ
तेनरैः ॥ शिशुमूर्तिःप्रदातव्याकृतास्वर्णमयीततइति ॥ ५१ ॥ तत्प्रमाणंगोभिलआह निष्कत्रयप्रमाणेनशिशुमूर्तिर्भविष्यति ॥ कुर्यात्तेनक्रमस्ताहिभ्रूणहत्या
निवर्तकेति ॥ ५२ ॥ केचिदाहुः शिशुमूर्तिःकुलाकुलेतितत्र तदभावेप्यनेनयोगात् ....कात्यायनः शिशुहत्यानिवृत्तिश्चेत्सम्यक्छक्तितेंराधमः ॥
कृत्वास्वर्णमयींमूर्तितत्पापेनविमुच्यतीति ॥ ५३ ॥ ....शिशुहत्याप्रायश्चित्तं......निर्दिष्टमितिविदितव्यं॰ वेदपारायणमपिकल्मषनिवर्त
कंभवतीतिप्रायश्चित्तांगत्वात्............ब्रह्महत्यादिकल्मषंनिवर्तयितुमक्षमः ॥ ब्राह्मणेभ्योवरंदत्वावेदपारायणंश्रयेदिति ॥ ५४ ॥ संवर्तः वेद
पारायणंकुर्यात्..........॥ ....लिंगंयस्मात्तत्पूर्वोभवकुर्वीरन्ति ॥ ५५ ॥ लौगाक्षिः ज्ञात्वाभ्रूणोदितिनियतंवेदपारायणंनरः ॥ सर्वाघदोषभंक
..........................ति ॥ ५६ ॥ तथाचवेदपारायणेकर्तव्येनियमोप्यवातिष्ठते यदाहमरीचिः नियमंकुरुतेतत्रवेदपारायणस्थितौ ॥ यावत्समाप्तिर्भव

तुष्यामिति ॥ ६४ ॥ नन्वेतेषांतत्त्वाम्नाप्रतीतनयापौरुषेयत्वेपारायणंव्यर्थमितिचेन्न वेदकाढकादिसमायाजयन्मोक्षार्थेविरोधाभावोगात् अन्यथाव्युत्प
न्नानिनः जन्मांतराभ्याससमागतवेदानुशासनस्यपौरुषेयतापत्तेः ननुशास्त्रस्य पारायणकर्तव्यमित्युक्तं सूत्रवार्तिकभाष्येष्वनोक्तमितिचेत्तन्न कात्यायनः
पातंजलमहाभाष्यंसूत्रवार्तिकसंमतं ॥ पारायणंकरोत्यत्र ब्रह्महत्यानिवर्ततइति ॥ ६५ ॥ वृद्धवसिष्ठः गौतमीयेनसूत्रेणवार्तिकेणविशुध्यता ॥ पठेद्रुद
यत्नंभाष्यंसुरापानंनिवर्ततइति ॥ ६६ ॥ पैठीनसिः पठेच्छाबरभाष्यं गवाते वै विभावसोः ॥ आम्नायंसूत्रजातंस्वर्णस्तेयंनिवर्ततइति ॥ ६७ विद्व
रथः भट्टभास्करभाष्येणकण्ववार्तिकसंश्रयात् ॥ पठेद्व्यासकसूत्रंगुरुतल्पनिवर्ततइति ॥ ६७ ॥ पराशरः पंचाक्षरेणगायत्र्यारुद्रगायत्र्यातथा ॥
होमेनाष्टाक्षरेणापिशास्त्रपाठोविशिष्यतइति ॥ ६८ ॥ चिरन्तनानिर्णयान्नकरद्रष्टव्यइतिदिक् यादृशस्य यद्दोषः प्रायश्चित्तमर्हतिब्राह्मणेनशूद्रवधेकृतेकिं
प्रायश्चित्तमितिविवक्षायां गौतमआह नहंतिब्राह्मणाशूद्रराज्ञादंडंसमर्हति ॥ प्रायश्चित्तायतेतस्मादितिशास्त्रस्यनिश्चयइति ॥ ६९ ॥ वृद्धमनुः प्राय-
श्चित्तंप्रकर्तव्यंब्राह्मणेनाविजानता ॥ शूद्रंहत्वामहाक्षेत्रंव्रजेद्वनसंशयइति ॥ ७० ॥ प्रायश्चित्तंकात्यायनआह क्षौरंकृत्वाब्रह्मदंडेब्राह्मणानांसमक्षतः
दत्वोपवासंकुरुतेपुण्यक्षेत्रनिवासभूः त्रियंबकेनमंत्रेणतिललक्षाहुतिंचरेदिति ॥ ७१ ॥ स्मृतिचिंतामणौ शूद्रहत्यायांद्विजाप्रजीतेचेत् शिवस्याल
ये स्नात्वासर्वतुतीर्थानियतंवन्हौहुनेत्यादरात् ॥ लक्षंतथातिलाहुतिंप्रतिदिशेऽपापयुक्तान्युत् । तद्ब्राह्मणवधुपत्यानकचवान्मुक्तः सुखीजीवतीति ॥७२॥
किंबहुनेत्युपरम्यते आनंदगिरिणाप्रोक्तेस्मृतिसारसमुच्चये पूर्णोऽप्यष्टमउल्लासः काम्यकांडेशुभावहः ॥ ७२ ॥ इतिश्रीआनंदगिरिस्वामिकृतेस्मृतिसारसमु
च्चयेकाम्यकांडेअष्टमउल्लासः ॥

ब्राह्मण्यांशूद्रसंगमनेविधिविकल्पआपतितः तद्विषयेविचार्यते
जगदंकुरविद्रायसांबायपरमात्मने ॥ शिवायश्रेयसांहेतुभूतायमहतेनमः ॥ १ ॥ ब्राह्मण्यांजातगर्भायांशूद्रात्तांपरि
कात्यायनः ब्राह्मण्यांयदिशूद्रोयंसंगतस्त्यज्यतेनवा ॥ सकृत्संगमनेनस्यास्त्यागोनैवप्रशस्यतइति ॥ २ ॥ विद्वत्थः
वर्जयेत् ॥ तदन्यथाभवेद्ग्राह्याप्रायश्चित्तैर्विशुध्यतेति ॥ ३ ॥ अत्रशाट्यायनवचनं यदिसंगमोनास्तिवाग्दोषमात्रंसाग्राह्यातदन्यथापारत्याज्येति
विश्वावसुः सकृद्गमनतःशुद्धाब्राह्मणीशूद्रसंगमात् ॥ प्रायश्चित्तविधानेनवाग्दोषसाशुचिर्नतेति ॥ ४ ॥ प्रायश्चित्तमनुराह तप्तकृच्छ्रपराकंवाकारयित्वा
विधानतः ॥ तांशुद्धांपरिगृह्णीयाद्वह्निहोमेनसादरामिति ॥ ५ ॥ जाबालिः नवोनवोभवेन्मंत्रःसमिदाज्यचरून्हुनेत ॥ शूद्रसंगमनान्मुक्ताब्राह्मणीसा
शुचिर्मतेति ॥ ६ ॥ एवंब्राह्मणोपिव्यक्तिविषयेप्रायश्चित्तमर्हतीतिविवेकः वस्तुतस्तुत्यागोगरीयानिति व्यासः कुलार्थेतांपरित्यज्यशूद्रसंगमनींवधूं ॥
प्रायश्चित्तंप्रकुर्वीरन्बंधवःसर्वएवहीति ॥ ७ ॥ वृद्धगार्ग्यः पंचगव्याशनंपीत्वाबंधवःसर्वएवहि ॥ तांत्यक्तापवसेयुस्तेतत शुध्यतसादरामिति
॥ ८ ॥ विस्तरेणनिर्णयामृतेद्रष्टव्यः अधुनारोगशांतिविधिरुच्यते पूर्वकर्मविपाकेनजायतेरोगजातयः ॥ क्षयाद्यास्तेप्रणश्यंतिशांतिकर्मततश्चरेदिति
॥ ९ ॥ वृद्धवसिष्ठः क्षयरोगोगुल्मरोगःतथापस्मारएवच ॥ सर्वरोगाःप्रणश्यंतिशांतिकर्मकृतंयदीति ॥ १० ॥ वृद्धमनुः वीरगुल्मादयोरोगायेक्षिमांद्यादयःपरे ॥
सर्वेरोगाःप्रणश्यंतिकृतेचशांतिकर्मणीति ॥ ११ ॥ तदेतैर्वचनैःप्रायश्चित्तविधौप्रसक्तेतत्प्रायश्चित्तरूपंशांतिकर्मकीदृशमितिविवक्षायां बादरायणआह मृड
नोरुद्रमंत्रेणसमिदाज्यचरून्हुनेत ॥ आहुतीनांसहस्रस्यात्रितयंनात्रसंशयइति ॥ १२ ॥ वृद्धगार्ग्यः महारोगप्रशांत्यर्थमुपहोमंतुकारयेत् ॥ गोधूमपायसेनैव
रुद्रगायत्र्यायतइति ॥ १३ ॥ वृद्धयाज्ञवल्क्यः पंचाक्षरेणमंत्रेणमहारोगप्रशांतये ॥ तिलहोमंप्रकुर्वीतसहस्रंत्रितयंपुनरिति ॥ १४ ॥ भरद्वाजः रुद्रमूर्तिःप्रदा
तव्यासाक्षसूत्रकमंडलुः ॥ सदक्षिणाप्रदातव्यामहारोगप्रशांतयइति ॥ १५ ॥ शंखलिखितावाहतुः महारोगप्रशांतिचेज्जिवृक्षुर्यःप्रदापयेत् ॥ त्र्यंबकंवाप्येकंवा
महारोगःप्रशाम्यतीति ॥ १६ ॥ एतावद्व्यवहारेणयुक्तमेवप्रतिपादितमितिदिक् शंक्यानेकवधूसंगमनेवाग्दोषआपतितेतत्प्रायश्चित्तंनिर्दिश्यते कात्यायनः अनेका
सांवधूनांचेत्संगमंतुसमापतेत ॥ वाग्दोषसतिविप्रेणप्रायश्चित्तंसमाचरेदिति ॥ १७ ॥ पैठीनसिः यद्येवबहवोवध्वःवाग्दोषस्यासचेतिच ॥ प्रायश्चित्तेकृतेनूनंतस्याः
पंक्तिनिवर्ततइति ॥ १८ ॥ त्रिकांडमंडनः पृथिव्यामदनंकृत्वावाग्दानेबहुसंगमे ॥ सागरस्नानतःशुद्धोभवत्यंतेविनिश्चयइति ॥ १९ ॥

[illegible]तुगीतिः तत्र [illegible]कलंजभक्षणे [illegible] अतएव श्रुतिः नकलंजंभक्षयेत् सुरां पिबेत् अपि लिपिछीमाजिघ्रेदेषब्राह्मणधर्मइति तदत्रत्रया
[illegible]बोध्यं कात्यायनः त्रयाणांतुसमत्वेपितारतम्यंविशिष्यते ॥ निषेधःश्रुतिसिद्धापिकलंजस्यतुभक्षणइति ॥ २६ ॥ कलंजभक्षणादपि
[illegible]नाशइतिकेचिदंगीकारमाहुः तत्रकृतेपिभक्षणेप्रायश्चित्तंयुक्तमेव वृद्धमनुः तीर्थस्नानेनविधिनाव्याहृत्यातिलहोमतः ॥ कलंजभक्षणेदोषोविन
[illegible]संशयइति ॥ २७ ॥ मध्येपिलिपिछीसमाघ्राणव्यारव्यानंप्रसंगादागतंविज्ञेयं तत्प्रपंचोहेमाद्रौनिश्चितएवेति विस्तरभीतेरुपरम्यते अधुनाग्राम
शांतिविधिरुच्यते सूर्याचंद्रमसोर्यत्रपरिवेषोभविष्यति ॥ ग्रामशांतिःप्रकर्तव्याराज्यारिष्टनिवृत्तयइति ॥ २८ ॥ वृद्धगार्ग्यः देवतायतनेयत्रदेवाश्रिक
तिरूपतां ॥ शांतिशांतिःप्रकर्तव्याग्रामिणामभिवृद्धयइति ॥ २९ ॥ लौगाक्षिः दिग्दाहधूमकेतौचवल्मीकेमधुपक्षिणी ॥ देवालयेभवेद्यत्रग्रामशांतिंप्र
कारयेदिति ॥ ३० ॥ वृद्धवसिष्ठः देवालयेप्रकर्तव्याग्रामशांतिर्विभागिता ॥ सर्वोत्पातनिवृत्त्यर्थग्रामशांतिरियंस्मृतेति ॥ ३१ ॥ एतद्विधानंमाण्डव्य
आह कुंडेवाग्रामेग्रामशांतिंप्रकारयेत् ॥ समिदाज्यचरून्हुत्वातिलैर्व्याहृतिपूर्वकैरिति ॥ ३२ ॥ मरीचिः कृसरान्नेनहोतव्यंकूश्मांडशकलैरपि ॥
ग्रामदोषनिवृत्त्यर्थंगोदानंतत्रनिश्चितइति ॥ ३३ ॥ इयमत्रव्यवस्था ग्रामेचंद्रसूर्योपरागेदेवालयेवल्मीकोत्पत्तौमधुपस्युत्पत्तौचदेवानांवैपरीत्येदिग्दाह [२४]

[illegible]शांतिः कार्या [illegible]ग्रामस्थैः [illegible] तथैतावत्संख्याकान्ब्राह्मणान्भोजयेदिति शातातपः उत्पातदो
[illegible] ॥ [illegible] ॥ यत्रयोधमन्यवत्[illegible] राजानोप्युपद्रवास्युःपलदाहकाशक
[illegible] ॥ [illegible]दर्शनेप्रशाम्यतीति ॥ ३४ ॥ विस्तरोग्रंथांतरेष्वितइतिदिक् अज्ञातकरणे
[illegible]स्मृतिविशंमतं कात्यायनः अज्ञातकरणंसर्वंयत्पातकमुदीरितं ॥ सर्वप्रायश्चित्तशुद्धंभवतीतिविनिश्चयइति ॥ ३५ ॥
माण्डव्यः भुक्ताभुक्तंसदागास्तिर्पतिंपीतमथापिवा ॥ सर्वप्रायश्चित्तशुद्धंभवतीतिविनिश्चयइति ॥ ३६ ॥ तथाहि योयमज्ञातकरणजन्यःपातकजातः
प्रायश्चित्तांतरविधिरहितोपिसर्वप्रायश्चित्तेनशुद्धोभवति यदिदंसर्वप्रायश्चित्तविधानंसन्यासात्पूर्वमग्निहोत्राद्यपीत्यवसीयते तथारोगातुरेणापिकर्तव्यं पर
[illegible] अक्षयंप्रायः व्यासः पुण्यक्षेत्रेथवागेहेनदीतीरेशिवालये ॥ विष्णवायतनेवापितत्प्रायश्चित्तमिष्यतइति ॥ ३७ ॥ तस्मा
[illegible] ॥ भुक्ताभुक्तादिनत्स्वं द्रव्यंदत्वाप्रवाचयेदिति ॥ ३८ ॥ वृद्धमनुः
[illegible] ॥ [illegible] ॥ ३९ ॥ विश्वामित्रः [illegible]

न्यादानादिसंकल्पंकुर्यात्तत्रविचक्षणः ॥ दशदानानिकुर्वीरंस्तद्यागपरिपूर्तयइति ॥ ४९ ॥ त्रिकांडमंडनः ततोवभृथपर्यंतसूतकादेर्निरीक्षणं ॥ मध्ये
नास्तीतिविज्ञेयमारंभस्यावसानतइति ॥ ५० ॥ विस्तरस्मृतिमार्तंडेस्थितइतिदिक यागादिकदन्नभोजनेप्रायश्चित्तंसर्वस्मृतिषुप्रसिद्धं कात्यायनः चौ
लान्नंचविवाहान्नंकर्णवेधनसंभवं ॥ अन्नमग्निष्टोममुख्यंहंतिपुण्यंपुराकृतामिति ॥ ५१ ॥ वसिष्ठः निषिकान्नंचचौलान्नंकर्णवेधनसंभवं ॥ तथैवनामकरण
मन्नंतत्परिवर्जयेदिति ॥ ५२ ॥ व्यासः मांसोपाकृतिसंयुक्तंयागान्नंपरिवर्जयेत् ॥ निष्पापोजायतेपापीभुक्त्वाचांद्रायणंचरेत् ॥ ५३ ॥ तदेतैर्वचनैःतद
न्नपरित्यागतासिद्धौदैवात्प्रासवतः किंप्रायश्चित्तमितिविवक्षायांगौतमआह तदन्नपरिभोक्तायःकृत्वाक्षौरादिकमर्चयेत् ॥ पंचगव्याशनंपीत्वापंचरात्रेणशुध्यती
ति ॥ ५४ ॥ आपस्तंबः प्रायश्चित्तमिदंप्रोक्तंकदन्नपरिभोजयेत् ॥ पंचरात्रंपंचगव्यप्राशनेनविशुध्यतीति ॥ ५५ ॥ मांडव्यः शिवगायत्र्याहोमंहुत्वाते
नविशुध्यतीति ॥ समिद्भिश्चभिराज्यैश्चकदन्नपरिभोजनादिति ॥ ५६ ॥ एवंविधव्यवस्थायांज्ञात्वायःकरोतिसजन्मांतरेशूद्रयोनिंगत्वा ततोजन्मांतरेशूल
रोगीभवतीतिसिद्धं एतदुक्तंस्मृतिपारिजाते शूलरोगीभवेद्विप्रःकदन्नपरिभोजनात् ॥ तस्माद्विजानताऽतेनभोक्तव्यंनसंशयइति ५७ ॥ स्मृतिचिंता
मणौ कदन्नभोक्ताविहितोपवासोयःपंचरात्रंपिबतीहगव्यं ॥ अंतेजुहोत्येवशिवस्यमंत्राद्विमुक्तपापःपरिशुद्धिमेतादिति ॥ ५८ ॥ तद्विषयेहेमाद्रिरेवशरणं
अधुनायागेसोमपानप्रायश्चित्तंनिर्दिश्यते गार्ग्यः सोमपानंयःकरोतिपरार्थंस्वार्थमेववा ॥ ततोविशुध्यर्थेकार्यंप्रायश्चित्तंनसंशयइति ॥ ५९ ॥ हारितः
प्रायश्चित्तंप्रकर्तव्यंसोमपानेकृतेसति ॥ अन्यथारौरवंयातिनात्रकार्याविचारणेति ॥ ६० ॥ ननुपुण्याहेशेनसोमपानविधिःतत्कालेकथंप्रायश्चित्तमर्हती
तिचेन्न यागसमनंतरभाविनःप्रायश्चित्तस्यकर्तव्यनिरूपयितुंशक्यत्वात् एतदाहशाट्यायनिः यागांतरप्रकर्तव्यंसोमपानंयदास्थितं ॥ तत्समाप्तौप्रकर्तव्यं
प्रायश्चित्तंसमीरितमिति ॥ ६१ ॥ शौनकः प्रायश्चित्तंसमर्हतियजमानोप्यथर्त्विजः ॥ यागांतेसावधानेनसोमपानेकृतेसतीति ॥ ६२ ॥ वृद्धमनुः सोमपान
मिदंप्रोक्तंदेवतोद्देशतःप्रति ॥ तत्फलंनगृहीष्यंतिप्रायश्चित्तंततश्चरेदिति ॥ ६३ ॥ कात्यायनः सोमपानेनपुण्यंस्यात्परलोकार्थमादरात् ॥ प्रायश्चित्तेनसंशु
द्धिःशरीरस्येतिनिश्चयइति ॥ ६४ ॥ स्मृतिरत्नाकरे कृत्वायागादिकर्मप्रतिवदितत्वयासोमपानंयथावत् । क्षौरंकृत्वाथगव्यंपिबतिचयजमानोपितेप्यृत्विजश्च ॥
होमंकुर्युःपरस्ताच्चरुभिरथसमिद्भिर्घृतैःपुष्पकाद्यैः । शैवःपंचाक्षरोयमनुरपिविदितस्तेनतेमुक्तपापाइति ॥ ६५ ॥ युक्तमेतावदेवसमाधानमितिदिक

अज्ञानपतितसंसर्गेपातित्यमापद्यतइति प्रायश्चित्तंनिरूप्यते कात्यायनः अज्ञानतस्तुसंसर्गःपतितस्यभवेद्यदि ॥ ज्ञात्वाकुर्वीतनियतंप्रायश्चित्तंनसंशय
इति ॥ ६६ ॥ वृद्धमनुः प्रायश्चित्तंप्रकुर्वीतपतिताज्ञानसंगमात् ॥ यतोविमुक्तिर्जायेतनकुर्याच्चरकृच्छ्रजोदिति ॥ ६७ ॥ इयमप्यव्यवस्था गोवधादि
कारिणामुपपातकिनांसंकलीकरणमलिनीकरणादीनामपितत्वर्तृत्वदर्शश्च ॥ ई कानियःसंगमंकरोतितस्याज्ञानतःप्रवृत्तस्यप्रायश्चित्तं ज्ञात्वापियोप्यचीर्णप्रा
यश्चित्तमानिरयंलभतइतिवस्तुगतिः वृद्धवासिष्ठः अज्ञातपतितानांतुसंगमेसतिकेवलं ॥ तिलाज्यतःप्रहोमेनविशुद्धिमभियास्यतीति ॥ ६८ ॥ गार्ग्यः
शौरकृत्वाशास्त्रसिद्धंतिलहोमंविधायच ॥ रुद्रगायत्र्यायुक्तस्ततःसंसर्गीनसंशयइति ॥ ६९ ॥ तत्संसर्गीपतितसंसर्गीत्यर्थः एतदाहात्रिः उपपातकसंस
र्गमज्ञात्वायःकरोत्यपि ॥ तिलहोमेनमुच्येत्सौविरजाजायतेनरइति ॥ ७० ॥ एतदवलंबनेनशास्त्रव्यवस्थितिरित्युपरम्यते आनंदगिरिणाप्रोक्तेस्मृति
सारसमुच्चये ॥ पूर्णोनवमउल्लासःकाम्यकांडेशुभावहः ॥ ७१ ॥ इतिश्रीआनंदगिरिस्वामिकृतेस्मृतिसारसमुच्चयेकाम्यकांडेनवमउल्लासः ॥ ॥ ॥

मेवचेत् ॥ प्रत्यहंस्नाननियमोवर्ततेनात्रसंशयइति ॥ ७ ॥ वृद्धमनुः स्नानंसंध्याजपोहोमोनित्यमेवविधीयते ॥ चतुर्थदिवसेस्नानमुपनीतबटोर्भवेद्
ति ॥ ८ ॥ पुनःस्नानशद्वार्थोमंगलस्नानवाचकः अन्यथाप्रथमस्नानपदादेवचारितार्थ्यात् कात्यायनः स्नानंचतुर्थेदिवसेविवाहेचोपनायने ॥ मंगलस्नान
मवेष्टस्नानंनैमित्तिकंभवेदिति ॥ ९ ॥ अत्रिः नित्यस्नानंविधायैवकर्मकुर्वीतनित्यशः ॥ नैमित्तिकंभवेत्स्नानंनित्यंनैवतुलोपयेदिति ॥ १० ॥ अंगिराः
नैमित्तिकेतुसंप्राप्तेनित्यस्नानंयादित्यजेत् ॥ सशूद्रवद्बहिष्कार्योनात्रकार्याविचारणेति ॥ ११ ॥ भरद्वाजः स्नानमूलाः क्रियाःसर्वाःस्नानेसतिविवर्जिते ॥
जपहोमादिकंसर्वंनिष्फलंनात्रसंशयइति ॥ १२ ॥ शातातपः नित्यस्नानंप्रसाध्यैवनैमित्तिकमथाचरेत् ॥ नित्यस्नानेविलुप्तेतुब्रह्महत्यांसविंदतीति ॥ १३ ॥
स्मार्तचिंतामणौ दीक्षायत्रभवेत्किमत्रविधेयस्नानंचतुर्थदिने तन्मांगल्यमिहोदितंप्रतिदिनंस्नानंविशिष्टंमतं ॥ उद्वाहेप्युपनायनेविधिरयंदीक्षासुसर्वत्रवा
यज्ञार्थंवमृथंभविष्यतिपुनः स्नानंस्मृतेःसंमतमिति ॥ १४ ॥ बहुषुनिबंधनेषुविमृश्यसारोयंस्मृतिविवेचनयाप्रकृतिप्रस्तावनेतिकिंबहुना सूतकमृतकयोः २६
यज्ञोपवीतस्यप्राक्तनस्य नूतनधारणेपरित्यागोयुज्यतेनेतिविचार्यते वसिष्ठः सूतकेमृतकेप्राप्तेनत्याज्यमुपवीतकं ॥ गायत्र्यासपरिभ्रष्टोब्राह्मण्यादपिहीयत
इति ॥ १५ ॥ अत्रिः सूतकंमृतकंवापिनारोप्यंब्रह्मसूतके ॥ ब्रह्मघातीसविज्ञेयः सूतकारोपकोद्विजइति ॥ १६ ॥ मांडव्यः सूतकंनास्यविज्ञेयंब्रह्मसू
त्रस्यकेनाचित् ॥ यदारोपणकर्तासौपातकीनात्रसंशयइति ॥ १७ ॥ जाबालिः यज्ञोपवीतंध्रियतेब्राह्मणत्वप्रसिद्धये ॥ छिनत्तियः स्वयंतच्चयेत्सब्राह्मण

बहिष्कृतइति ॥ १८ ॥ वृद्धमनुः त्रिगुणीकृतमेतद्धिब्रह्मविष्णुशिवात्मकं ॥ तच्छेदनाशेदेवानांविनाशाद्दोषआपतेदिति ॥ १९ ॥ वृद्धयाज्ञवल्क्यः
ब्राह्मण्यदेवतानूनंब्रह्मसूत्रंप्रकीर्तितं ॥ तद्विनाशेसतिकृतेकुतोसौब्राह्मणस्मृतइति ॥ २० ॥ नन्वेवंसत्युपनीतकालादारभ्यधृतस्यब्रह्मसूत्रस्यनकदाचिन्नाशो
स्तीतिचेन्न छेदावांतरतंतुनाशयोस्त्यागप्रतिपादनात् एतदाहवृद्धगार्ग्यः अछिन्नंवानोपहतमुपवीतंनसंत्यजेत् ॥ यदित्यजतिमूढात्मारौरवंनरकंव्रजेदि
ति ॥ २१ ॥ पराशरोपि सुखास्थितंब्रह्मसूत्रंयश्छिनत्तिद्विजाधमः ॥ नकेवलंब्रह्महत्याब्राह्मणेषुनगण्यतइति ॥ २२ ॥ कात्यायनः सूतकेमृतकेवापिनोप
वीतंपरित्यजेत् ॥ स्वतएवपवित्रत्वात्पवित्रमृषयोविदुरिति ॥ २३ ॥ नचैवंसूतकादिव्यवस्थायांसूत्रांतरधारणंव्यर्थमितिवाच्यं पंचगव्ययज्ञोपवीतधारणयो
र्विधानियतत्वात् एतदाहशाट्यायनिः जाताशौचेमृताशौचेउपाकर्मणिधारणं ॥ नवयज्ञोपवीतस्यब्राम्हणत्वप्रसिद्धयेइति ॥ २४ ॥ श्राद्धारंभेसूतकांते
मृतकांतेयथाविधि ॥ उपाकर्मणितद्धार्यंनवयज्ञोपवीतकमिति ॥ २५ ॥ लोगाक्षिः शूद्रस्पर्शेतथोच्छिष्टविवाहोपक्रमादिषु ॥ नवयज्ञोपवीतानिधार्याण्ये

स्मृतिसार समुच्चये काम्यकांडं समाप्तम्